Chapter-5

# पञ्चम-परिच्छेदः

## (उभयपक्षयोः कारकमीमांसा)


i. क्रिया तथा कारकम्

ii. कर्तृकारकम्

iii. कर्मकारकम्

iv. करणकारकम्

v. सम्प्रदानकारकम्

vi. अपादानकारकम्

vii. अधिकरणकारकम्

(पृष्ठसंख्या-९७ तः २३७ पर्यन्तम्)

।। ॐ ।।

# पञ्चमो परिच्छेदः

## ।। क्रिया तथा कारकम् ।।

### क्रियया कारकाणामन्वयः –

सर्वस्वीकृतः सिद्धान्तः एषः यत् सर्वेषां कारकाणां धात्वर्थे अन्वयो भवति[1]। यस्य कस्यापि क्रियया सह कारकाणां यत्किमपि रुपेण सम्बन्धो भवति। स सम्बन्धः साक्षाद्भवेद्वा परोक्षः। सर्वैः वैयाकरणैः क्रियाविषयं यत्किञ्चित् योगदानमकारि।

संसारस्य अस्थिरतायाः चर्चा प्रायः सर्वत्र भवति। नास्तिको भवेद्वा आस्तिकः, सर्वे इमां सृष्टिं परिवर्तनशीलमनुभवन्ति[2]। यः पदार्थः अद्य एकस्मिन् स्थाने पश्यामः, स्वः तमपरस्मिन् स्थानेऽपररुपेण द्रक्ष्यामः। एकस्मिन्नेव स्थाने अपि तिष्ठतां (स्थावर) पदार्थानां रुपगुणयोः कालान्तरे परिवर्तनं पश्यामः। एतत् परिवर्तनं कालदेशरुपयोः उभयोः द्रव्ययोराधारेण भवति। कालान्तरे देशान्तरे द्रव्यं भिन्नरुपमापद्यते। अस्य कालिकदैशिकपरिवर्तनस्य पृष्ठभूमौ क्रिया एव तिष्ठति। पदार्थानां परिवर्तनं ज्ञापयति यत् तस्मिन् कापि क्रिया सञ्जाता, देवदत्तः किञ्चित्कालपूर्वं काश्यामासीत्, सम्प्रति पाटलीपुत्रे वर्तते, अवश्यमत्र क्रियाऽभवत्। अन्यथा एतस्य देशपरिवर्तनस्य व्यवस्था भवितुमशक्या। ये तण्डुलाः किञ्चित्कालपूर्वं प्रक्षाल्य स्थाल्यां स्थापितवान्, कठोरस्पर्शवन्तः आसन्, वर्तमानकाले स्थाल्यां मृदुस्पर्शवन्तः (विक्लृत्तिरुपाः) सन्ति। अत्रापि कापि क्रिया आसीत्। फलितार्थस्तु क्रिया पदार्थानां परिवर्तनस्य कारणं वर्तते, पदार्थश्च दृष्ट्वा सा अनुमीयते।

### क्रियायाः स्वरुपम्–क्रिया, धातुः आख्यातश्च

भारतीयदार्शनिकसाहित्ये क्रिया, धातुः आख्यातः एषां त्रयाणां परस्परभेदेऽपि प्रायः सम्बन्धरुपे प्रयोगो भवति। गम्, पच् आदयः ये शब्दानां मूलं वर्तते, ते एव

१. 'तत्र सर्वकारकाणां धात्वर्थेऽन्वयः'। – ल.म.पृ. ५४४.

२. 'परिवर्तनशीलसंसारे मृतः को वा न जायते'। – रघुवंशः।

धातवः उच्यन्ते[1], यान् पाणिनिः धातुपाठे भ्वादिः, अदादिः इत्यादिदशगणेषु सानुबन्धं पठितवान्। आ.हेमचन्द्रः अत्र क्रिया = कारकव्यापारविशेषो यस्य सः धातुः इति प्रतिपादितवान्[2]। यास्कस्य पूर्ववर्तिनि काले अस्मिन्नेव अर्थे आख्यातशब्दस्यापि प्रयोगो वर्तते। यथा 'सर्वाणि नामान्याख्यातजानि' इति शाकटायनो नैरुक्तसमयश्च (निरुक्त: १/१२)। सर्वाणि नामानि (संज्ञाशब्दाः) आख्याततः समुत्पन्नानि। अयं शाकटायनस्य निरुक्तकारस्य सिद्धान्तो वर्तते। अस्य सिद्धान्तस्य निरुपणं यदा पतञ्जलिः करोति तदा सः 'नाम च धातुजमाह निरुक्ते' (भाष्य ३/१/१) इति वदन् आख्यातस्य स्थाने धातोः प्रयोगं करोति। तथा अग्नि शब्दस्य निर्वचने शाकपूणिमतस्य उल्लेखं कृत्वा यास्कः धातुमाख्यातञ्च पर्यायरुपेण दर्शयति – 'त्रिभ्य आख्यातेभ्यो जायते इति शाकपूणिः' (निरुक्त ७/१४)। एते सर्वे यास्कात्पूर्वमुद्धृतानामाचार्याणां प्रयोगाः सन्ति। स्वयं यास्कः आख्यातस्य प्रयोगः पूर्णक्रिया (तिङन्त) रुपे कुरुते- 'प्रथमपुरुषैश्चाख्यातस्य' (नि. ७/१) अर्थात् त्रिधा ऋक्षु परोक्षकृताः ऋचः ते एव उच्यन्ते यत्र आख्यातः (क्रिया) प्रथमपुरुषे वर्तते। तथा नाम्नः सर्वाः विभक्तयः प्रयुज्यन्ते। निरुक्तारम्भे आख्यातस्य लक्षणं कुर्वाणस्य यास्कस्य सामान्यरुपेण क्रियोपरि एवं ध्यानं वर्तते, धातौ न (भावप्रधानमाख्यातम्)। क्रिया एषां सर्वेषां धातुकृदन्ततिङ्न्तानां सामान्यनाम वर्तते, यतो हि अत्र सर्वेषां धातुनामर्थो प्रगटितो भवति। अत एव क्रिया शब्दः धात्वर्थपर्याये प्रयोज्यते[3]।

**कर्तृवाच्ये व्यापारप्राधान्यम् –**

कर्तृवाच्ये यत्र कर्ता अभिहितो भवति, धात्वर्थे व्यापारः विशेष्यं फलञ्च विशेषणं वर्तते। अस्य कारणं वर्तते यत् फलं कर्तृप्रत्ययस्य समभिव्याहारस्थले तत्सम्बद्धधात्वर्थाद् (व्यापारविशेष्यकार्थाद्) उत्पद्यते[4]। तदनुसारं 'फलानुकूलो व्यापारः'

१. भूवादयो धातवः। – पा. सू. १/३/१

२. 'क्रियाऽर्थो धातुः' ३/३३ – सिद्धहेम. बृ.वृत्ति-पृ.२

३. दृष्टव्य - ल.म.पृ.५४४

४. 'एकस्य बुद्ध्यवस्थाभिर्भेदे च परिकल्पिते।।
कर्मत्वं करणत्वं च कर्तृत्वंचोपजायते'।। – वा. प. ३/७/१०४

इति धात्वर्थो भविष्यति। यथा–गम् धातोरर्थः यदि प्रकटी-क्रियते चेत्-उत्तरदेशसंयोगानुकूलं पादप्रक्षेपादिः व्यापारः। पच् धातोः कर्तृवाच्ये 'रामः पचति' अस्य शाब्दबोधः – रामाभिन्नकर्तृकान्नविक्लित्यनुकूलः स्थाल्यधिश्रयणादिः व्यापारः। अत्र व्यापारस्य विशेष-महत्त्वं भवति। वयं पश्यामः यत् स्थाल्याः अधिश्रयणादि (चुलिकोपरिस्थापनादि) व्यापाराः पूर्वं भवन्ति, तदा मृदुत्वादिगुणसम्पन्नरुपफलं लभामहे। कर्तृवाच्ये कर्तुरभिधानं प्राधान्यं वा भवति एवञ्च स एव कर्ता व्यापारस्य आश्रयो भवति। एवं कर्तृवाच्ये व्यापारस्य प्राधान्यं वर्तते तथा परवर्तित्वात् फलमप्रधानं गुणीभूतं वाऽऽस्ते। किन्तु इत्यपि सत्यं यत् तत्फलप्राप्त्युद्देशेन व्यापारः क्रियते, उभयोर्पार्थक्यं कठिनम्।

**कर्मवाच्ये फलप्राधान्यम्—**

कर्मवाच्ये प्रधानतायाः एषः नियमो व्युत्क्रमते[१]। अत्र व्यापारः विशेषणं भवति फलञ्च विशेष्यभावं प्राप्नोति, यतो हि फलाश्रयं कर्म अत्र अभिहितो वर्तते। अतः धातोरर्थं फलावच्छिन्नव्यापारे अकृत्य व्यापारावच्छिन्न फले भवति। धात्वर्थस्तु उभयार्थबोधने समर्थोऽस्ति, किन्तु वाच्यभेदेन कर्तृप्रत्ययैः कर्मप्रत्ययैः तयोःप्राधान्याऽप्राधान्ययोः निर्णयो भवति[२]। लोकानुभवेन प्रमाणिकत्वान्न गौरवदोष-मावहते। अत एव कर्मवाच्यस्य उदाहरणे – 'रामेण ओदनः पच्यते' इत्यत्र पच् धातोरर्थपरिवर्तनं जातम्। अयं पच् धातुः प्रधानतया व्यापारार्थे न वर्तते, अपि तु विक्लित्तिरुपफलस्य अत्र प्राधान्यत्वात् व्यापारो गुणभावं प्राप्नोति, अर्थात् गौणोभवति। वक्तुः तात्पर्यम् ओदनस्य परिणामे स्थिरीभूतं वर्तते। अत्र व्यापाररुपे अर्थे प्राधान्यं नास्ति, किन्तु व्यापारः तस्मान्न पृथक् भवितुं शक्यते, यतो हि फलस्य व्यापारजन्यता सुस्पष्टा एव। अत एव अस्य शाब्दबोधो भवति – 'रामाभिन्नकर्तृको यो व्यापारः तज्जन्या ओदनाभिन्नैककर्मनिष्ठा विक्लित्तिः'। अत्र ओदनं सामुहिकरुपेण

१. 'कर्मप्रत्ययसमभिव्याहारे तु फलस्य विशेष्यता'। ल.म.पृ. ५४१

२. 'तस्मात्फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिः। कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्यवहारश्च तत्तद्बोधे नियामकः। गौरवं च प्रामाणिकत्वान्न दोषावहम्'। –ल.मं., पृ. ५४३

एकत्वसंख्याविशिष्टं स्वीकृत्य तस्य तिङन्तेन सह अन्वयो वर्तते। कर्तृवाच्यादिनियमानां निम्नलिखितश्लोकेषु सरलतया गुम्फनं वर्तते।

प्रयोगे कर्तृवाच्यस्य कर्तरि प्रथमा भवेत्।
द्वितीया कर्मणि तथा क्रियाकर्तृपदान्विता।।
प्रयोगे कर्मवाच्यस्य तृतीया स्यात्तुकर्तरि।
कर्मणि प्रथमा चैव क्रिया कर्मानुसारिणी।।
कर्माभावः सदाभावे तृतीया चैव कर्तरि।
प्रथमपुरुषश्चैकवचने च क्रियापदे।।

**शाब्दबोधः**

वैयाकरणाः नैयायिकाश्च उभावपि धातोश्शक्तिं फले व्यापारे च अभ्युपगच्छन्ति। किन्तु! वैयाकरणाः विशिष्टशक्तिद्वारा फलविशिष्टव्यापारेण व्यापारविशिष्टफलेन वा उभौ धातुबोध्यं स्वीकुर्वन्ति। गदाधरप्रभृतयः नैयायिकाः पृथक् शक्तिद्वारा तौ धातुबोध्यौ मन्वते। अस्येदं तात्पर्यं यत् धातोः फल-बोधिकाशक्तिः पृथक् वर्तते व्यापारबोधिका च पृथक् वर्तते। अस्य मतस्य सविस्तरविवेचनं नागेशेन लघुमञ्जुषायां प्रतिपादितम्[१]। नैयायिकवैयाकरणयोः शाब्दबोधे भिन्नता वर्तते। वैयाकरणानुसारं उपर्युक्त-शाब्दबोधे क्रियायाः प्राधान्यं वयं दृष्टवन्तः। अतः तस्य शाब्दबोधः क्रियामुख्यविशेष्यकः उच्यते। नैयायिकानां शाब्दबोधे प्रथमान्तशब्देन बोधितार्थस्य विशेष्यता वर्तते, अर्थात् प्रथमान्तार्थमुख्यविशेष्यको बोधो भवति। 'रामः ओदनं पचति' कर्तृवाच्यस्थवाक्यस्यास्य शाब्दबोधो भवति–ओदनवृत्ति-विक्लित्यनुकूल-व्यापारानुकूल-कृतिमान् एकत्वविशिष्टो रामः। एतदेव वाक्यं यदि कर्मवाच्ये भवेत् चेत् तर्हि 'ओदन' प्रथमान्तः भविष्यति तथा विशेष्यत्वेन तिष्ठति – रामसमवेता या कृतिः तज्जन्यो यो व्यापारः तज्जन्या या विक्लित्तिः तदाश्रयः एकत्वविशिष्ट ओदनः[२]। नैयायिकानां मुख्याभिनिवेशः प्रत्ययार्थस्य निरुपणे वर्तते। वैयाकरणेषु वाच्यानुसारं क्रियामुख्यविशेष्यकशाब्दबोधे स्वरसः आस्ते। अतः कर्तृवाच्ये व्यापारमुख्य-विशेष्यको बोधः कर्मवाच्ये च फलमुख्यविशेष्यको बोधो भवति।

१. ल.म.पृ. ५४०।

२. न्यायकोशः, पृ. ३९२।

**वाक्ये क्रियास्थानम् –**

भाषाया: विश्लेषणेन वाक्यस्य खण्डोपरि विचारयन् द्विधा तत्त्वे लब्धामहे- -नाम (सुबन्तम्) तथा क्रिया (तिङन्तम्)। पाणिनिः अनयोरुभयोर्तत्वयो: पदसंज्ञां प्रदत्तवान्, (अपदं न प्रयुञ्जीत) पदसंज्ञा बलाद् उभौ वाक्ये प्रयोगसामर्थ्यं बिभर्ति (सुप्तिङ्न्तं पदम् १/४/१४)। वाक्यानां सङ्घटने सुबन्तस्य तिङन्तस्य च परस्परं सम्बन्धपूर्वकं समुदायस्य आवश्यकता भवति, यथा–'रामो गच्छति'। अत्र प्रथमपदं सुबन्तं वर्तते, द्वितीयं तिङन्तम्। एतद् नामपदं क्रियापदञ्चापि उच्यते। यद्यपि सामान्यतया वाक्यैरुभयोर्पदयो: सङ्घटना भवति, तथापि क्रियाया: एव अत्रापि प्राधान्यं स्वीक्रियते[1]। निरुक्तकारोयास्क: तथा वैयाकरणनिकाय: अस्य मतस्य अनुमोदनं कुरुते, येन क्रियामुख्यविशेष्यक: शाब्दबोधो भवति। कस्मिन्नपि वाक्ये क्रियाया: प्राधान्यम् अनेनैव ज्ञायते यत् क्रियाविरहे विशृङ्खलकाणि सर्वाणि नामपदानि किमपि अर्थ दातुं न शक्नुयुः। अपरं यदि अन्यस्मिन् वाक्ये क्रिया भवेत्, अन्यानि पदानि नापि भवेयुः, तदापि वाक्यनिर्माणं भवति, यतो हि क्रिया आवश्यकनामार्थस्य आक्षेपं कुरुते। 'गच्छ' कथनेन बोधो भवति–(त्वं) गच्छ। एतद् सकलं वाक्यम्। किन्तु! राम: स्थाली गज: इत्यादीनाम् अनेकेषां नामपदानामुच्चारणेनापि वाक्यत्वं न लभते। क्रियापदमेतद् नामपदानि संयोजयति। 'राम: काष्ठै: स्थाल्यामोदनं पचति' अस्मिन् वाक्ये एकैव क्रिया वर्तते – 'पचति', किन्त्वियं क्रिया चत्वारि नामपदानि संयोजयति। क्रियायां चतुर्णां पदानां संयोजनम् अत एव सम्भवति यत् व्यावहारिकजगति अपि एषामर्थानां पाकक्रियया संयोजनं वर्तते। वस्तुत: एते चतुरर्था: क्रियासिद्धौ सहाय्यं कुर्वते यत् पाको स्यात्। पाकक्रियायां राम: सर्वेषां व्यापाराणां नियन्ता वर्तते, अत: उपकरोति। काष्ठानि पाकस्य साधनं वर्तते, स्थाली तस्या अधिकरणम्। ओदन: पाकक्रियाविषयत्वात् तस्या: फलभागी आस्ते। यदि क्रिया न स्यात् तर्हि एते चत्वार: पदार्था: विकीर्णा: भवेयुः।

१. 'तद्यत्रोभे, भावप्रधाने भवत:'। –निरुक्त १/१

## नामार्थस्य क्रियया सम्बन्धः—कारकबीजम्—

वक्तुः अभिप्रेतार्थः श्रोतारम्प्राप्नुयात् एतदर्थं क्रियायाः नामार्थेन सह सम्बन्धः वाक्यस्य प्रधानमुद्देश्यं वर्तते। वाक्ये क्रियया सह नामार्थस्य सम्बन्धं व्याकरणशास्त्रे कारक उद्यते। नामार्थस्य क्रियया समं एषः सम्बन्धः प्रधानतया साक्षाद् भवति, किन्तु क्वचिद् उपकारसामर्थ्याधारेण पारम्परिकसम्बन्धोऽपि भवति। उभाभ्यां सम्बन्धाभ्यां नामार्थः क्रियानिष्पत्तौ सहायकृद्भवति। इत्येवं रीत्या क्रियया सम्बन्धकं प्रतिनामार्थं स्वीयाश्रयं कृत्वा कारकतत्त्वं तिष्ठति। क्रिया साध्या वर्तते तथा कारकम् साधनम्। अत एव भर्तृहरिः कारकाणां सामान्याभिधानं कृत्वा तस्य विवेचनं साधनसमुद्देशे करोति। क्रियायाः सिद्धौ (निष्पतौ, निवृतौ, पूर्तौ) अनेकसाधनानामावश्यकता भवति। पाकक्रियायाः पूर्वोक्तेषु उदाहरणेषु एव इन्धनस्य, पात्रस्य, अग्नेः, अन्नस्य तथा पाककर्तुः आवश्यकता वरीवर्तते। एतानि सर्वाणि तत्वानि क्रियायाः साधकानि सन्ति, एतेषां स्वकीयनियतार्थेक्रियया सम्बन्धो वर्तते। तदनुसारं भाषागतवाक्ये प्रयुज्यमाने कारकरुपं बिभर्ति। एषां साधनानां प्रवृतयः क्रियासिद्धौ भिन्नभिन्नरुपेण भवन्ति। यस्मिन् रुपे इन्धनं क्रियायाः साधकम् वर्तते, तस्मिन्नेव रुपे पाककर्ता नास्ति। अस्य कारणं साधनानां प्रवृत्तिभेदः एव। वस्तुतः भाष्यकारानुसारेण एतेषां साधनानां प्रवृतिः क्रियारुपे प्रतिफलिता भवति[१]।

---

१. 'कारकाणां प्रवृत्तिविशेषः क्रिया'। –महाभाष्य २, पृ. १२३

२. 'तत्र सर्वकारकाणां धात्वर्थेऽन्वयः'। – ल.म.पृ. ५४४.

३. 'परिवर्तनशीलसंसारे मृतः को वा न जायते'। – रघुवंशः।

**सकर्मकाकर्मकधातोरर्थः –**

वाच्यपरिवर्तनस्य मूले फलव्यापारयोः महत्वस्य एतद् परिवर्तनमेव कार्यं करोति। किन्तु अस्य एतादृशः कदापि अर्थो न भवति यत उभौ।

उभयोर्मध्ये अविच्छेद्य सम्बन्धो वर्तते, एवञ्च उभौ मिलित्वा धात्वर्थो भवति। वाच्यानां विभिन्नतायाः कारणेन तयोः प्राधान्ये अन्तरमस्ति। धातुः सकर्मकः फलव्यापारयोः अधिकरणभेदेन उच्यते[१]। पच् धातुः सकर्मकः, यतो हि फलं (विक्लितिः) तथा व्यापार (अग्निप्रज्वलनादि) रुपधर्मस्य धर्मी (आश्रयः) पृथक् वर्तते। व्यापारस्तु पाककर्तरि वर्तते, किन्तु फलं ओदनादिकर्मणि तिष्ठति। व्यापारस्य आश्रयः फलाश्रयाद् भिन्नः आस्ते। यद्यपि फलं व्यापारश्च एकस्यैव धातोरर्थः, किन्तु अनयोरधिकरणं भिन्नं भिन्नं वर्तते। एतदेव सकर्मकधातोर्वैशिष्ट्यम्। धातोः सकर्मकत्वे एष आश्रयभेद एव फलव्यापारयोः महत्त्वभेदं समुत्पादयति। यदि उभयोराश्रयमेकत्र एव भवेत्, यथा अकर्मकधातुस्थले भवति, तर्हि उक्तमहत्वभेदः कदापि नोत्पद्येत।

स एव अकर्मकधातुः भवति यत्र धातोः फलस्य व्यापारस्य च आश्रयः एकैव पदार्थो वर्तते, यथा–शी (शये), लज्ज् (व्रीडे) इत्यादयः[२]। अत्र नेत्रनिमिलनम्, पादप्रसारणम्, पक्षपरिवर्तनमित्यादिव्या-पारास्तु तस्य कर्तरि वर्तते एव, तस्य विश्रान्तिरुपं फलमस्ति तदपि कर्तरि आस्ते। 'देवदत्तो भवति (उत्पद्यते इत्यर्थः)' अत्र भूधातोरुत्पत्तिरुपफलं तथा बहिर्निसरणरुपव्यापारः उभौ देवदत्ते आसते[३]। नागेशभट्टस्य मतं वर्तते यत् –क्वचित् अन्यप्रकारेण केवलव्यापारवाचको धातुरपि अकर्मकः उच्यते, यथा–'अस्ति'। अत्र केवलं सत्ता एव अर्थः, सूक्ष्मदृष्ट्या अपि फलांशस्य प्रतीति र्न भवति। किन्तु अनेन धात्वर्थविषयको वैयाकरणानां सिद्धान्तः खण्डितो न भवति। अस्माकं मतम्–फलविशिष्टव्यापार-वाचकत्वम्–अकर्मकत्वम्[४]।

१. 'फलव्यापारयोरेकनिष्ठतायामकर्मकः।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः'।। – वै. भू., कारिका–१३

२. 'लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम्।
शयनक्रियारुचिदीप्त्यर्था धातव एते कर्मविमुक्ताः'।। – पाणिनिः।

३. प. ल. मं. पृ. १७८।

४. प. ल. मं. वंशी, पृ.५४।

यद्यपि सामान्यरुपेण सकर्मकधातुः फलव्यापारयोः सामानाधिकरण्येन एव भवति, किन्तु नागेशः पारिभाषिकव्याख्यापेक्षया यौगिकव्याख्यां स्वीकरोति। तदनुसारं सकर्मकः स न वर्तते यस्य धातोः उच्चा-रणानन्तरं कर्मण आकांक्षा निश्चिता भवेत्। 'गच्छति' इत्यादौ आकाङ्क्षायाः विरहेऽपि सकर्मकत्वं भवति। एतदपि लक्षणं न युक्तं यत् अकर्मकभिन्नत्वं सकर्मकत्वम्, यतो हि सकर्मक धातवोऽपि विशेषा-वस्थायामकर्मकाः दृश्यन्ते। तर्हि किन्नाम सकर्मकत्वम्? एतच्छास्त्रे (पाणिनिव्याकरणे) प्रतिपादितैः कर्मसंज्ञावत्पदार्थैरन्वितक्रियावत्वम् सकर्मकत्वम्। कर्मसंज्ञावत्पदार्थैरनन्वितक्रियावत्वम् अकर्मकत्वम्[1]। अनेन 'अध्यासिताः भूमयः' सदृशाः प्रयोगाः उपपाद्याः। अत्र 'अधिशीङ्स्थासां कर्म' (पा. सू. १/४/४६) सूत्रेण भूमिरुपाधारस्य कर्मसंज्ञा भवति। तच्च कर्म कर्मवाचक'क्त'प्रत्ययेन उक्तो भवति 'उक्तेकारके प्रथमा स्यात्' अतः कर्मणि प्रथमा जाता। एतदनुसारं अधिपूर्वक आस् धातुः सकर्मको वर्तते। सकर्मकस्य अन्यैः लक्षणैः अस्य कर्मवाच्यप्रयोगस्य सिद्धि र्न सम्भवति। यतो हि कर्मवाच्यः सकर्मकाद् धातोरेव भवति, अतः अध्युपसर्गपूर्वक आस् धातुः सकर्मकोऽवश्यमङ्गीकर्तव्यः एवञ्च एतद् तदा एव सम्भवति यदा नागेशस्य पूर्वोक्तसकर्मकत्वलक्षणं स्वीकुरुते। तथा 'प्रासादोऽधिष्ठितः अधिशय्यते' इत्यादिप्रयोगा अपि कर्मवाच्ये अनेनलक्षणबलेनैव सिद्ध्यन्ति। निष्कर्षतः कर्मणा सह वर्तते इति सकर्मकः अस्मिन् यौगिकार्थे एव सकर्मकस्य अर्थो भवेत्।

अस्मिन् प्रसङ्गे एतदपि ज्ञातव्यं वर्तते यत् क्वचित् बाह्यकर्मणः सत्तासद्भावेऽपि धातुः अकर्मक उच्यते[2]। अनेन ज्ञायते यत् बाह्य (स्थूल) कर्मण उपस्थितिरेव सकर्मकतायाः नियामिका नास्ति। एतेन नागेशमतस्य महत्त्वं स्पष्टीभवति। भर्तृहरिः अकर्मकधातूनां नियामकतत्त्वानां निरुपणमित्थं कुरुते–

---

१. 'वस्तुतस्त्वेतच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम्। तदनन्वय्यर्थत्वमकर्मकत्वम्'।

–ल.म., पृ.५६६ तथा ६८

२. 'क्वचित्पुनवस्तुतो बाह्यकर्मसद्भावेऽप्यकर्मकव्यपदेशो भवतीत्याह'। –हेलाराजः, वा.प.३, पृ.३०३

धातोरथान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया।। —वा.प. ३/७/८८

पूर्वोक्तकारिकानुसारम् अधोलिखितेषु चतुर्षुस्थानेषु अकर्मकक्रिया भवति—

**(१) अर्थान्तरे धातुवृत्तिः –**

यदा कोपि धातुः स्वीयप्रसिद्धधात्वर्थं संजहाति एवं भिन्नार्थं संगृह्णाति तदा कर्मणा अनन्विता क्रिया वाच्यरुपे प्रतीयते। यथा-'वहति' क्रियायाः प्रसिद्धार्थः प्रापणं वर्तते। अस्मिन् अर्थे सकर्मकोऽस्ति, -यथा-भृत्यो भारं वहति, वारिवाहः इत्यादिः। किन्तु एष एव धातुः स्यन्दनार्थे भवेत् चेत् अकर्मक उच्यते, यथा-'नदी वहति'। क्रियां प्रति किम् इति प्रश्नोत्तरं प्राप्तुं न शक्यते (किमित्वनुयोगाभावादकर्मकः -हेलाराजः)।

**(२) धात्वर्थे कर्मणोऽन्तर्भावः –**

यदा कस्यामपि क्रियायामेव कर्मणोऽन्तर्भावो भवति तथा तस्य ज्ञानं न स्यात् तदा कर्मरहिता एषा क्रिया अकर्मिका कथ्यते, यथा-'जीवति'। अतः एषा क्रियाऽकर्मिकाः, यतो हि अस्याः क्रियायाः वास्तविकार्थः 'प्राणान् धारयति' इत्यत्र प्राणरुपकर्म अत्र समाहितं वर्तते। तथैव 'प्राणान् जहाति' कर्मणः उपसंग्रहिका (अन्तर्भाविका) 'म्रियते' इति क्रिया अकर्मिका। 'नृत्यति' (= गात्रं विक्षिपति) तथा 'अस्ति' आत्मानं बिभर्ति इत्यपि अकर्मिका एव।

**(३) प्रसिद्धिः –**

क्वचिद् एतादृशः व्यवहारो दृश्यते यत् यत्र (येषां धातूनां) निरपवादरुपेण (अव्यभिचरितत्वेन) निश्चितकर्मणः प्रतीति र्भवति किन्तु सः अकर्मको भवति, यतो हि तस्य कर्म अत्यन्तं विख्यातमस्ति, यथा-'वर्षति'। सर्वे जानन्ति यत् अस्य कर्ता मेघः (देवः) वर्तते कर्म च प्रसिद्धजलमेव। अत एव अस्मिन् कर्तृवाच्यस्य क्तप्रत्ययस्य प्रयोगो भवति-'वृष्टो देवः'। अस्यामेव क्रियायां यदा अप्रसिद्धकर्मणः प्रयोगो भवति तदा सः सकर्मको भवति, यथा-'रुधिरं वर्षति', 'शरान् वर्षति'। तथा कर्मवाच्यस्य क्तप्रत्ययस्य प्रयोगो भवति-'पांसवो वृष्टाः'।

## (४) कर्मणोऽविवक्षा–

क्वचित् क्रियया सार्द्धं कर्मणः सम्बन्धस्य विद्यमानत्वेपि वक्ता तं प्रकटितुं नेच्छति, यतो हि सः क्रियोपादानम्अभिप्रैति। तत्रापि क्रिया अकर्मिका भवति, यथा–'नेह पच्यते', 'नेह भुज्यते'। क्रियाप्रतिषेध-मात्रमत्र अभिप्रेतत्वात् भाववाच्ये लकारो जातः। तथा 'दीक्षितो न ददाति, न पचति, न जुहोति', हितान्न यः संशृणुते (किरातार्जुनीयम् १/४) इत्यादौ कर्मणोऽविवक्षा वर्तते। अत्र 'किम्' इत्यस्य अपेक्षानास्ति, यतो हि क्रियानिषेधे एव सकलाशक्तिः प्रयुक्ताः वर्तते। एतदेव वक्तुः तात्पर्यम्[१]।

पाणिनिः 'लः कर्मणि च भावे चाकर्मकेभ्यः' (पा. सू. ३/४/६९) इत्यत्र सकर्मकाकर्मकधातूनां वाच्यानां व्यवस्था वर्तते। सकर्मकाद् धातोः यत्र कर्तृवाच्ये कर्मवाच्ये (कर्मकर्तृवाच्ये अपि) च भवति, अकर्मकाद् धातोः कर्तृवाच्यो भाववाच्यश्च भवति। अकर्मके कर्म एव न स्यात्, येन फलाश्रयं भूत्वा लकारेण अभिहितो भवेत्। कर्मवाच्यस्थाने तत्र भाववाच्यो भवति। अस्य अधोलिखितानि उदाहरणानि सन्ति–

| | | |
|---|---|---|
| सकर्मकधातोः | कर्तृवाच्ये– | स ओदनं पचति |
| सकर्मकधातोः | कर्मवाच्ये– | तेन ओदनः पच्यते। |
| सकर्मकधातोः | कर्मकर्तृवाच्ये– | ओदनः पच्यते (स्वयमेव)। |
| अकर्मकधातोः | कर्तृवाच्ये– | सः तिष्ठति। |
| अकर्मकधातोः | भाववाच्ये– | तेन स्थीयते। |

एतत् सुस्पष्टं वर्तते यत् कर्मवाच्यस्य भाववाच्यस्य च एकरुपता भवति। तथा अनयोः क्रियापदयोः यक्-चिणादयः प्रत्ययाः भवन्ति। किन्तु अत्र एकं महद् अन्तरं वर्तते यत् कर्मवाच्ये लिङ्ग-वचनपुरुषविशिष्टकर्मणोऽभिधीयमानत्वात् प्रत्ययाः कर्मानुसारं परिवर्तनं सङ्गृह्णाति, भाववाच्ये च भावमात्रस्य उक्तत्वात् एकरुपे वर्तते। अत्र प्रत्ययः सदा प्रथमपुरुषे (तिङ्मात्रे) नपुंसकलिङ्गो (कृन्मात्रे) तथा एकवचने (उभयत्र) तिष्ठति, यथा–'तेन स्थीयते, स्थितम्'। अवश्यमत्रापि कालप्रभावो भवति, अतः विभिन्नेषु लकारेषु प्रयोगाः भवेयुः यथा–'तेन अभूयत (लङ्), अभावि (लुङ्), भूयताम् (लोट्), भूयेत (लिङ्) इत्यादयः'।

१. हेलाराजः तत्रैव

**क्रियायाः गम्यमानत्वेन कारकव्यवस्था –**

क्रियाकारकयोः पृथक्कल्पनां कर्तुं न शक्नुमः, यतो हि अविच्छेद्यरुपेण परस्परं बद्धौ वर्तेते। क्रियाऽभावदशायां कारकस्य सत्ता न भवेत्, अपरं कारकाणामभावे क्रिया व्यर्था भवेत्। पूर्वं वयं प्रति-पादितवन्तः क्रियायाः महत्त्वविषये यत् केवला क्रिया अपि वाक्यं भवेत्। तत्रापि सूक्ष्मरुपेण क्रियायाः साधकतत्त्वं गम्यमानं वर्तते। 'गच्छ' इत्यत्र मध्यमपुरुषैकवचनस्य रुपे 'त्वम्' कर्तुः प्रतीतिर्भवति। इतोऽपि प्रकरणाद्यनुसारं कर्मकरणादिसाधनानामपि प्रतीति र्भवति। अस्ति, भवति आदिसत्तावाचकक्रियाष्वपि 'घटः' प्रभृतिप्राकरणिकसाधकपदार्थानां बोधो भवति। कोऽपि पृच्छति-'अप्युपाध्यायो गृहान्निर्गतः' (गुरुजी घर से निकल गए क्या?) अपरः उत्तरयति-'नहि नहि अस्ति'। अत्र वाक्ये 'अस्ति' क्रियायाम् उपाध्यायः कर्तारुपेण तथा गृहं अधिकरणरुपेण गम्यमानं आस्ते। अर्थात्-गुरुः गृहे अस्ति इति बोधः। अतः क्रियायां सूक्ष्मरुपेणापि कारकाणामुपस्थितिः अनिवार्या वर्तते, अन्यथा क्रियायाः पूर्तिरपि न स्यात्। द्वितीयपक्षे कारकाणां तु स्थूलरुपे एव क्रियायाः आवश्यकता भवति। एतत्सत्यं यत् कदा-कदा गम्यमानक्रियया अपि कार्यं प्रचलति, तथा कारकविभक्तेः प्रयोगो दृश्यते। यथा-अलं श्रमेण। अत्र साधनरुपक्रियायाः करणं श्रमः अस्ति। अतः तत्र तृतीया विभक्तिः समर्थनीया वर्तते। पूर्ववाक्यस्यार्थः श्रमेण साध्यं नास्ति (न सिध्यति)। तथा विवाहावसरे अर्घ्ऽऽचमनीय-मधुपर्काणां ग्रहणं कन्यापिता निज-भाविजामातरं कारयति तदा आचार्यः ब्रूते-मधुपर्को मधुपर्को मधुपर्कः। अत्र 'वर्तते' इति क्रिया गम्यमाना अस्ति यस्य कर्ता मधुपर्कः आस्ते[1]। यदि क्रिया श्रूयमाणा गम्यमाना च न स्यात् तदा तु कारकनामकरणमेव व्यर्थं स्यात्।

अत्र एष प्रश्नः समुद्भवति यत् वाक्ये क्रियोपस्थितिः अनिवार्या वर्तते। येन सर्वे नामार्थाः सङ्घटिताः तिष्ठेयुः, तर्हि तत्र वर्तमाना सर्वे शब्दाः कारकपदवाच्या कथं नोच्यते? 'श्री गणेशाय नमः' इत्यत्र गणेशः कारकः कथन्न? पुनश्च 'बालकेन सह धावति' इत्यत्र बालकः, 'गृहं विना सुखं नास्ति' अत्र गृहम् तथा शीघ्रं चलति।

१. विवाहपद्धतिप्रारम्भः – मधुपर्कः मधुपर्कः मधुपर्क, इत्याचार्येणोक्ते, मधुपर्कः प्रतिगृह्यतामिति पिता ब्रूयात्, मधुपर्कं प्रतिगृह्णामीति वरो ब्रूयात्। –आश्व० गृह्यसूत्र १/२४/७.

**कारकस्य शक्तिरुपता (भर्तृहरिमतम्) —**

भर्तृहरिणा तथा तदनुयायिदार्शनिकैः साधनं (कारकं) शक्तिरुपेण निरुपितम्। इदं जगत् शक्तेः संघातो वर्तते। घटे जलोत्पादिका शक्तिः बीजे च अङ्कुरोत्पादिका शक्तिः वर्तते। सर्वे पदार्थाः काममपि क्रियानिष्पादकशक्तिं दधाति। एषा शक्तिः द्रव्यसमवेतत्वात् द्रव्याद् भिन्नाऽस्ति। किन्तु न्यायवैशेषिकदर्शनेषु शक्तेः द्रव्यभिन्नता नैव स्वीकृता। तेषाम्मते अग्निः तथा तस्य दाहिकाशक्तिः भिन्नपदार्थः नास्ति–शक्तिशक्तिमन्तौ मूलतः एकैव वर्तते[1]। अद्वैत–वेदान्ते अपि अनेन सिद्धान्तेन ब्रह्मणः तथा तस्य शक्तेः मायायाः एकत्वं साधितम्।

शक्तेः अर्थः – करणे वर्तमानः कार्योत्पत्यनुकूलो धर्मविशेषः। अयं धर्मः प्रतिबन्धकस्य (शक्तिरोधकहेतोः) अभावरुपकारणरुपेण आस्ते। प्रतिबन्धकवस्तुनः अभावः कार्यमात्रं प्रति कारणं वर्तते। अतः दाहात्मककार्यस्य प्रतिबन्धकः चन्द्र-कान्तमणिः भवति, यतो हि चन्द्रकान्तमणेः अभावदशायाम् अग्नेः दाहात्मिका शक्तिरुत्पद्यते। तथा व्यतिरेकमुखेन शक्तेः सिद्धि र्भवति। एषा शक्तिः द्रव्यन्न, शक्तिः गुणपदार्थो न, न कर्म। उत्पत्तिं विना शशालित्वान्न सामान्यम्, विशेषः समवायश्च नास्ति[2]। अस्य अनुमानेन सिद्धिस्तु – 'शक्तिः, द्रव्यत्वगुणत्वकर्मत्वा-न्यतमशून्या, गुणवृत्तित्वात्, गुणत्ववत्। शक्तिः – सामान्यत्व-विशेषत्वसमवायत्वा-ऽन्यतमशून्या, प्रागभावप्रतियोगित्वे सति ध्वंसप्रतियोगित्वात्, घटवत्' इत्यनुमानद्वयेन द्रव्यत्वादिपदार्थविभाणकधर्मावच्छिन्ना – द्रव्यत्वादिसप्तान्यतमशून्यत्वेसति पदार्थत्त्वात्, यत्र साध्यं नास्ति तत्र हेतुर्नास्ति यथा–द्रव्यम् इति व्यतिरेकिणापि अनुमानेन शक्ते-र्द्रव्यत्वादिसप्तान्यमभिन्नपदार्थविभाजकधर्मवत्त्वे सिद्धे स धर्मः शक्तित्त्वरुप, इति। एवं रीत्या पदार्थान्तररुपेण शक्तिं प्रभाकरानुयायिनः मीमांसकाः वैयाकरणाश्च अभ्यु-पगच्छन्ति। अत्र नैयायिकाः – मणेः प्रतिबन्धत्वेन मण्यद्यभावविशिष्टवह्न्यादेर्दाहादिकं

१. द्रष्टव्य – न्याय सि.मु., का. २।

२. न्या. को., पृ. ८५२ उद्धरणश्लोकः —

'न द्रव्यं गुणवृतित्वाद् गुणकर्मबहिष्कृता।
सामान्यादिषु सत्वेन सिद्धा भावान्तरं हि सा'।।

प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते। अनेनैव सामञ्जस्ये – मणिसमवधानाऽसमवधानाभ्यामनन्तशक्ति-तद्ध्वंसततप्रागभावकल्पनायाः गौरवग्रस्तत्वात् शक्तिः अतिरिक्तः पदार्थस्तु न युक्तियुक्तः प्रतिभाति[1]।

किन्तु! शब्दाद्वैतस्य प्रवर्तकः भर्तृहरिः अखिलजगद्रूपकार्यस्य पृष्ठे शक्तेरेव भूमिकां मनुते। इदञ्जगत् शक्तीनां संघातो वर्तते। यद्यपि परमार्थतः शक्तिरेका एव, तथापि अविद्याकृतोपाधिद्वारा विभिन्नरुपेषु दृश्यते। तदनुसारं घटादिभावपदार्थेषु याः शक्तयः सन्ति तासां प्राकाराणां विश्लेषणं सम्भवति – १) कांचनशक्तयः स्वकारणाद् उत्पद्य स्वाश्रयनाशात् नश्यति यथा – प्रदीपस्य प्रकाशशक्तिः, वह्न्यादिनिष्ठा च आलोकशक्तिः। २) काचनशक्तयः पुरुषस्थः भवन्ति तथा स्ववर्तमानाश्रये भवन्ति, यथा–बलादिशक्तिः। एताः शक्तयः व्यायामेन श्रमाभ्यासेन पृष्टिकारकपदार्थानां सेवनेन वा उत्पद्यन्ते। ३) काचनशक्तयः आश्रये विद्यमाने सति पुरुषप्रयासेण निरुपिताः भवन्ति। यथा – विषस्य प्राणवियोगशक्तिः तथा बीजस्य अङ्कुरोत्पादनशक्तिः। ४) काश्चन शक्तयः अतिशयप्रभावात् भिन्नरुपम् आपद्यते, यथा - तत्वदर्शिनः सर्वेषां पदार्थानां रुपान्तरं कृत्वा तस्मिन् अभिनवशक्तिसञ्चारं कुर्वन्ति। काषाञ्चित् शक्तीनां कालान्तरेण अभिव्यञ्जनं भवति, फलप्रदाने धर्माधर्मस्य शक्तिः। तथा विभिन्नस्वरुपात्मिकाशक्तयः भवन्ति[2]।

शक्तेः पारमार्थिकव्यावहारिकस्वरुपभेदं स्वीकृत्य एतद् वक्तुं शक्यते यत् नित्यानित्यदार्थानां शक्तिषु भेदो वर्तते। अनित्यपदार्थेषु स्वशरीरे एव शक्तिरुद्भवति, किन्तु! अनित्यपदार्थेषु सहजा शक्तिः तिष्ठति[3]। एताः शक्तयः एव साधनमुच्यते, यतो हि शक्तेः साधनस्यवा क्रियानिष्पत्तौ समं योगदानं वर्तते। विभिन्नपदार्थानां शक्तयः कामपि क्रियां सम्पादयति, एतत् कार्योत्पादनमेव शक्तेः सत्तायाः प्रमाणमास्ते। अपरं साधनं कारकं वापि कस्याः क्रियायाः सम्पादने कृतार्थं भवति। अत एव उभयोरेकरुपता अनिवार्या एव। एतस्मात् कारणात् भर्तृहरिणा साधनलक्षणमकारि-

१. द्रष्टव्यम् – न्यायसि. मु. (किरणावलीसमन्विता) पृ. २८।
२. हेलाराज, वा.प. ३/७/२ टीकायाम्।
३. व्याकरणदर्शनभूमिका, पृ. २१६।

स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः।। – वा.प.३/७/१

क्रियानिवृत्तौ द्रव्यस्य शक्तिः साधनं वर्तते। पतञ्जलिः यत् परोक्षे लिट् (पा. सू. ३/२/११५) इत्यस्य व्याख्यायां गुणं गुणसमुदायं वा साधनं प्रोक्तवान्, तस्य कथनस्य अयमेव अभिप्रायो वर्तते यत् शक्तिः स्वाधारस्य (द्रव्यस्य) अधीनमेव विकसति, अतः एतां गुण उच्यते, यतो हि कारकमपि द्रव्याश्रितमेव आस्ते। अतः द्रव्याश्रितत्वसामान्यमाधृत्व पतञ्जलिः गुणं तत्रं साधनरुपेण उक्तवान्। शक्तिः कदापि निराधारः न न तिष्ठति। ब्रह्म घटपटशब्दादि वा भवेत्, शक्तिः आधारसापेक्ष वर्तते एव। अतः शक्तिरनुमीयते (साधनमप्यनुमानगम्यम्—भाष्य ३/२/११५) अस्य अनुमानस्य लिङ्गं (हेतुः) क्रियारुपकार्यं वर्तते[१]।

भर्तृहरिणा पूर्वोक्तकारिकायां क्रियायाः रुपद्वयं प्रत्यपादिस्वाश्रयसमवेता तथा आश्रयान्तरसमवेता। उभयस्मिन् क्रियाऽर्थे व्यापारः फलञ्च तिष्ठति तद्धारकपदार्थे क्रिया समवेता भवति। एतौ पदार्थौ—कर्ता कर्म च वर्तते। कर्तरि क्रिया अतः समवेता आस्ते यतो हि सः (कर्ता) व्यापाररुपधात्वर्थं धारयति। अपरं फलरुपधात्वर्थ-धारयितरि कर्मणि अपि क्रिया समवेता तिष्ठति।

क्रियास्वाश्रय वर्तते, यत्र सः समवायसम्बन्धेन विद्यमानं आस्ते। एतौ क्रियानिष्पत्तौ मुख्यरुपेण सहायकौ भवतः। करणादियः अन्ये कारकाः धात्वर्थभूत-फलव्यापारयोः साहाय्यं कर्तृकर्मभ्यां कुर्वते, अतः गौणरुपेण कारकाणि सन्ति अथवा ते क्रियायाः स्वाश्रयाः न अपि तु पराश्रयाः भवन्ति[२]। अत एव कारिकायां शक्तिं (सामर्थ्यं) साधनरुपेण विवेच्य उभयोः निष्पत्योः विवेचनमकारि। स्वाश्रय-समवेतायाः क्रियायाः निष्पत्तिर्भवेत् आश्रयान्तर (करणादि) समवेतक्रियानिष्पत्तिर्वा भवेत्, उभयस्थित्योः द्रव्यस्य क्रियानिर्वर्तिका शक्तिः साधनं (कारकं) वर्तते।

१. 'शक्तेः क्रियालक्षणकार्यानुमेयायाः कार्यद्वारेणैव प्रकर्षः'। हेलाराजः, पृ. २३१
२. तत्र कर्तृकर्मणोः क्रिया समवैतीति स्वाश्रयसमवेतक्रियानिष्पत्तौ तयोः कारकता। करणादीनां तु पराश्रयसमवेतायां क्रियायां साधनभावः। न हि करणादिषु क्रिया समवैति।
— हेलाराज, पृ. ३/७/३६

साधनरुपामेतां शक्तिं विभिन्नाः विभक्तयः प्रकाशन्ते। उदाहरणार्थम्-'मृगो धावति' अस्मिन् वाक्ये धावनक्रियायाः आश्रयो मृगो वर्तते, यत्र कर्तृशक्तिः दृश्यते – तां प्रथमाविभक्तिः प्रकटयति। यदि द्रव्यमेव कारकं साधनं (शक्तिः) भवेत्तर्हि 'स्थाली पचति' , 'स्थालीं पचति' , 'स्थाल्या पचति' , 'स्थाल्यां पचति' एषां विभिन्नकारकाणां यत्र एकैवद्रव्यरुपस्थाल्याः प्रयोगो वर्तते, तत्र द्रव्यस्य सादृश्येण सर्वत्र कारकं समानमेव भवेत्, किन्तु पाकक्रियां प्रति स्थाल्याः (द्रव्यस्य) विभिन्न-शक्तीनां अभिव्यक्तिः तेषां वाक्ये विवक्षिताऽस्ति। अतः कारकमपि भिन्नमेव वर्तते। अनेनापि द्रव्यस्य शक्तेश्च पार्थक्यं स्पष्टमेव। तदनुसारं द्रव्यं न कारकम् अपि तु द्रव्याणां शक्तिः कारकं वर्तते। एतदेव व्यवहारजगति द्रव्याणां क्रिया सम्बन्ध उच्यते। किन्तु सम्बन्धः अतिव्यापकशब्दो वर्तते। अत एवं संकोच्य शक्तिरुपकथनम् अधिकं सुसङ्गतम् – कारकस्य एषः शास्त्रीयार्थोऽस्ति।

एतद् सत्यं वर्तते यत् द्रव्ये शक्तिस्तिष्ठति, अतः द्रव्यस्य आकारप्रकारानुसारं शक्तीनां स्वरुपभेदो भवेत्। दात्रकुठारकृपाणैः छेदनक्रिया तु भविष्यति, किन्तु एषां क्रियाणां स्वरुपं परस्परं भिन्नं भविष्यति। तथैव द्रव्यस्य देशकालम् आधृत्य क्रिया-निष्पत्तिप्रक्रियायां भेदः आस्ते। तथापि द्रव्याणां सर्वाषां शक्तीनां षट्षु रुपेषु विभाजनं क्रियते। साधनप्रसङ्गे इतः अधिकाः शक्तयो न भवन्ति, यतो हि क्रियासिद्धये एताः शक्तयः एव कार्यं कुर्वन्ति[१]। कुठारादिविभिन्नद्रव्यद्वारा सम्पन्नमानायां क्रियायां भवतुनाम् अन्तरं प्रतीयते, किन्तु! क्रियायाः सम्पूर्णतया सङ्कलितरुपं गृह्णीयाम् तर्हि भेदः न भवेत् तेषां च सर्वेषां द्रव्याणाम् एकैव स्थिति र्भवेत् यत् ते छिदिक्रियासिद्धौ साधकतमं वर्तते। तात्पर्यतः करणकारकरुपं (करणत्वशक्तिं वा) बिभ्रति।

१. द्रव्याकारादिभेदेन ताश्चापरिमिता इव।
दृश्यन्ते तत्त्वमासां तु षट्शक्तीर्नातिवर्तते।। – वा.प. ३/७/३६.

**कारकलक्षणविमर्शः (अन्यलक्षणेषु विचारः) —**

पूर्वं वयं कारकस्य शक्तिरुपतायाः निदर्शनं कृतवन्तः। अधुना अस्मिन् लोके प्रचलितानां विभिन्नानां कारकलक्षणानां समीक्षां करिष्यामहे। कारकस्य सर्वाणि लक्षणानि क्रियासम्बन्धस्य तु निरुपणं कुर्वन्त्येव, किन्तु विभिन्नकारणैः अतिव्यात्यवाप्तिदोषग्रस्तानि भवन्ति। तथाऽपि केषुचन लक्षणेषु कारकस्य बहिरङ्ग-स्वरुपं सम्यक् निरुपयन्ति।

(१) क्रियानिमित्तत्वं कारकत्त्वम् —

कारकस्यैतद् लक्षणं दुर्गसिंहेन कलापव्याकरणे प्रदत्तम्, येन तस्य सम्प्रदायमात्रे अस्य प्रचुरप्रचारं वर्तते। अत्र कारकं क्रियायाः निमित्तकारणरुपेण स्वीकृतवन्तः। लक्षणेऽस्मिन् नैयायिकानां पाणिनीयवैयाकरणानाञ्च आरम्भतः वक्रदृष्टिः आसीत्। अस्मिन् लक्षणे ते अतिव्याप्त्यव्याप्तिरुपं दोषम् आवहन्ते। 'चैत्रस्य तण्डुलं पचति' वाक्येऽस्मिन् एतल्लक्षणानुसारं चैत्रस्य, यः सम्बन्धी वर्तते, क्रियानिमित्तत्वात् तस्य कारकत्वापत्तिः, यतो हि सोऽपि स्वगृहात् तण्डुलं दत्वा अनुमतिद्वारा वा पाकक्रियायाः निमित्तकारणं भवति। अतः लक्षणमेतत् चैत्रादिसम्बन्धिनमपि कारके प्रवेशयति एतस्मात् कारणात् अतिव्याप्तिदोषग्रस्तं भवति।[१]

अपरम् अत्र अतिव्याप्तिः अपि वर्तते। निमित्तकारणं स्वकार्यात् पूर्ववर्ती भवेत् तदा एव तस्य कारणत्वम् उपपन्नं भवति। किन्तु 'घटं करोति' इत्यत्र घटं निर्वत्यकर्म वर्तते, क्रिया (कार्यम्) एव स्वनिमित्तकारणात् पूर्ववर्तिनी अस्ति, यतो हि क्रियया एव घटोत्पत्ति र्भवति। अतः घटः क्रियानिमित्तं नास्ति अतश्च कारकमपि नास्ति। 'कलापस्य' सुप्रसिद्धटीकाकारकविराज-सुषेणः उत्तरयति यत् अत्र क्रियासिद्धौ घटज्ञानं पूर्ववर्ती वर्तते, एतज्ज्ञानं पूर्ववर्तिर्घटपदार्थे उपचरितो भवति। अतः न कोऽपि दोषः[२]। सांख्यदर्शनोक्त--सत्कार्यवादानुसारमपि अस्य दोषस्य वारणं भवितुं शक्यते, यतो हि तदनुसारं

१. 'चैत्रस्य तण्डुलं पचति सम्बन्धिनि चैत्रादावतिव्याप्तेः। अनुमत्यादिप्रकाशनद्वारा सम्प्रदानादे-रिव तण्डुलादिद्वारा सम्बन्धिनोऽपि क्रियानिमित्तत्वात्'। — प.ल.म.पृ.१६९

२. Cf. P.C. Chakravarti, P.S.G. P. 218.

घटः सूक्ष्मरुपेण अव्यक्ततया स्वकारणे विद्यते एव, तत्रैव क्रियायाः निमित्तकारणं वर्तते। क्रियानिमित्तस्यैव स्थितौ एतादृशाणि अन्यलक्षणान्यपि सन्ति, यथा–क्रियाजनकत्वम् , क्रियानिष्पादकत्वम्। न्यूनाधिकरुपेण उक्त-कारकलक्षणमेव अत्रापि विद्यते।

(२) क्रियान्ययितत्त्वं कारकत्त्वम् –

क्रियया अन्वयं करोति अर्थात् सम्बन्धं स्थापयति तत् कारकमुच्यते। एतल्लक्षणेन 'शीघ्रं धावति' सदृशेषु वाक्येषु क्रियाविशेषणस्य क्रियया साक्षाद् अन्वयो विद्यते अतः तस्य कारकत्वापत्तिः, किन्तु सिद्धान्ततः कदापि क्रियाविशेषणं संयुज्य परिष्करोति 'विभक्त्यर्थद्वारा क्रियान्ययित्वं मुख्यभाक्तसाधारणं कारकत्वम्'। कारकं विभक्त्यर्थद्वारा क्रियया अन्वेति। 'स्तोकं पचति' इत्यादिक्रियाविशेषणेषु विभक्तिः अभेदार्थिका नास्ति, तस्य उद्देश्यं साधुत्वसम्पादनमेव आस्ते। अतः तत्र विभक्तौ सत्यामपि नैयायिका-भिमतः विभक्त्यर्थरुप (कर्मत्वादि) विषयत्वं नास्ति। एतस्मात्कारणात्कारकत्वं नास्ति।

जगदीशः विषयेऽस्मिन् 'स्तोक' शब्दः क्रियायां प्रकारीभूतत्वे सत्यपि सुप् प्रत्ययः तं न उपस्थितिं कारयति अतः कारकं नास्ति। द्वितीयाविभक्तिस्तु नपुंसकेन समं केवलशास्त्रदृष्ट्या (आनुशासिकी) पदसाधुत्वनिर्वाहार्थं वर्तते[१]। क्रियान्वयेन कुत्रचित् स्थानेषु मुख्यकारकत्वं भवति, यथा–'ग्रामं गच्छति' इत्यत्र ग्रामः, किन्तु कुत्रचित् गौणकारकम् अपि भवति यथा–'घटं जानाति' इत्यत्र घटः[२]। भवानन्दः ब्रूते क्रियानिमित्तत्वे सति मुख्यकारकं भवति। तदनुसारं एतल्लक्षणं निष्पद्यते यत् प्रधानकारकं तदेव यः क्रियानिमित्तेन

१. शब्दशक्तिप्र. , कारिका ६७।

२. कारकचक्रव्याख्या, माधवी पृ. ५–६

सह विभक्त्यर्थद्वारा क्रियान्वयितोऽपि भवेत्। अनेन यः क्रियायाः अनिमित्तत्वे सति यः विभक्तिद्वारा क्रियान्वयो भवति, तद् गौणकारकमुच्यते। उभयस्थित्योः क्रियानिमित्तत्वम् साक्षात् पारम्पर्येण वा प्रयोजकत्वेन तिष्ठति। कारकोच्चारणेन उभयोः सन्निवेशो भवति, प्रधानाप्रधानयोः। किन्तु अन्ते भवानन्दः विभागमुखेन कारकलक्षणं कृतवान् यश्च सर्वथा उचितमेव

१. का. च. , पृ.७

## कारकप्रकरणविभाजने अस्ति कश्चनहेतुः निरर्थको वा?

प्रत्यक्षादिप्रमाणान्तर्गतशब्दप्रमाणस्य प्राधान्यं मनीषिण आमनन्ति। व्याकृतौ मीमांसादर्शने च एतत् प्रमाणशिरोमणिरुपेणाभ्युपगच्छन्ति। यतो हि उभे प्रमुखतया अस्य आप्तोपदेशरुपशब्दस्य स्वशैल्या विवेचनं कुरुतः। पदार्थः इन्द्रियैः सम्बन्धो भवेदसम्बद्धो वा तस्य बोधः शब्दप्रयोगद्वारा कारयेत्। एतदेव आगमस्य शब्दप्रमाणस्योद्देश्यम्[१]। शब्दनिर्देशे भाषायाः अन्यतमाङ्गरुपेण वाक्यम् आश्रयते, यस्य बोधः (= शाब्दबोधः) शब्दप्रमाणस्य फलं वर्तते[२]। वैयाकरणानां भाषाविश्लेषणानुसारम् आकाङ्क्षा योग्यता तथा सन्निधिद्वारा पदसमूहो वाक्यमुच्यते। एतानि पदानि पदार्थबोधकानि भवन्ति तथा पदानाम् अनया बोधिकाशक्तिद्वारा तानि परस्परम् अन्वितानि भवन्ति। शाब्दबोधे एकपदार्थः अपरपदार्थेन सह संसृष्टो भूत्वा समन्वितबोधं कारयति[३]। दार्शनिकदृष्ट्या केवलम् अखण्डवाक्यमेव व्यवहारोपयोगी तथा सत्यमपि वर्तते[४]। किन्तु शाब्दशास्त्रं भाषाबोधोपयोगरुपेण प्रकल्पितो भूत्वा अखण्डवाक्यस्य विभाजनं पदेषु तथा पदानां वर्णेषु कुरुते। वर्णः पदं तथा वाक्यम् एषां त्रयाणां महत्त्वं कस्मायपि शब्दशास्त्रिणे तावदेव वर्तते यावत् जीवितशरीराय प्राणानाम्।

किन्तु प्रारम्भे शब्दशास्त्रस्य क्षेत्रम् एतावद् व्यापकं नासीत्। वर्णविचारः शिक्षानामकस्य वेदाङ्गस्य विषय आसीत्। पदसाधुत्वस्य विचारः व्याकरणं चक्रे तथा अर्थस्य निरुपणं निरुक्तस्य कार्यम् आसीत्। कालान्तरे एषां त्रयाणां वेदाङ्गानां भारो व्याकरणोपरि आपतितः। वाक्यविचारः प्रधानतया मीमांसायाः विषयः सन्नपि सत्यपि न्यूनाधिकरुपेण अत्र न्यायशास्त्रं व्याकरणञ्च स्वदृष्टिं प्रसारयति। अस्य कारणं वर्तते यत् पदसाधुत्वमात्रेण स्वस्मिन् निरर्थकता भवेत् यदि तस्य परस्परं संसर्गो न भवेत्। अतः व्याकरणस्य अर्थपक्षे चरमसत्तायाः रूपे अखण्डवाक्यस्फोटस्य अभ्युदयो जातः, तदनुसारं वर्णपदवाक्यस्य विश्लेषणक्षेत्रे व्याकृतेः विभिन्नविषयाणां

१. द्रष्टव्य – न्यायवार्तिक, १/१/७

२. 'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी'।। –भाषापरि. का. ८१

३. 'शाब्दबोधे चैकपदार्थेऽपरपदार्थः संसर्गतया भाषते'। – व्यु.वा. पृ.१

४. 'पदेन वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन'।। – वा.प., १/७३

अभ्युदयो जातः, तदनुसारं वर्णपदवाक्यस्य विश्लेषणक्षेत्रे व्याकृतेः विभिन्नविषयाणां विवेचनं कृतवान्तः। एते विषया इत्थं वर्गीकृताः भवितुं शक्यन्ते—

१. वर्ण–विचारः —

उच्चारणम्, वर्ण-विकारः (सन्धिः) स्त्रीप्रत्ययः, समासः, कृत्, तद्धितः।

२. पद–विचारः —

सुबन्तमाला, तिङन्तमाला, अव्ययम्, स्त्रीप्रत्ययः, समासः, कृत्, तद्धितः।

३. वाक्य-विचारः —

कारकं तथा विभक्तिः।

अत्र विभक्तेः विचारः पदवाक्ययोरावश्यकः, यतो हि स्वादितिबादिविभक्तिं विना पदत्वं भवितुं न शक्यते (सुप्तिङन्तं पदम्) तथा यदा पदमेव न भविष्यति तर्हि तस्य विचारः कथम् भविष्यति? तनैव सह पदसाधुत्वानन्तरमेव वाक्ये तस्य स्थाननिरूपणं क्रियते यत् तत्पदं कैः पदैः सह सम्बद्धं वर्तते तथा अस्य सम्बन्धस्य परिणामस्वरूपेण कं बोधं कारयति? उक्तसंकलितबोध एव वाक्यबोधो वर्तते तथा पदानां वाक्यगतसम्बन्धो भवति।

वाक्यरचनायां कारकाणां सर्वाधिकरुपेण प्रदानं वर्तते, यतो हि वाक्यस्य प्राणभूतक्रियासिद्ध्ये प्रयतनं कारकस्यैव कार्यमास्ते। क्रिया कस्मिन्नपि वाक्ये श्रूयमाणा भवेद् वा गम्यमाना – तस्या उपस्थितिरनिवार्या वर्तते। पुनश्च यदा क्रिया निरपेक्षा न तिष्ठति। कस्या अपि शक्तेरपेक्षया तत्तच्छक्तिरुपे वर्तते अतः वाक्यस्य लक्षणं कुर्वाणोऽमरसिंहो ब्रूते—

'सप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता'।

यद्यपि सर्वत्र व्याकरणग्रन्थेषु कारकस्य विवेचनं शब्दपक्षान्तर्गतं कृतं तथापि वस्तुतः एतद् प्रकरणम् अर्थपक्षेण सम्बद्धं वर्तते। शब्दपक्षान्तर्गतम् अस्य निरूपणस्य प्रधानकारणं स्वादिविभक्तिभिस्सह अस्य निकटवर्तिसम्बन्धो वर्तते। अतः अधिकांश- वैयाकरणाः कारकस्य विभक्तेश्च संयुक्तविवरणं ददति।

पूर्वोक्तविवरणेन स्पष्टं भवति यत् कारकप्रकरणविभाजनं सहेतुकं तथा परमावश्यकं वर्तते। इत्यलमतिपल्लवितेन।

## कारकार्थत्वे विभक्त्यर्थत्वे कियान् भेदोऽभेदो वा।

नाम्ना कारकशब्दः क्रियानिष्पादकत्वेन क्रियाऽन्वित्वेन आहोस्वित् कारकाऽधिकारपठितत्वेन, क्रियाजनकत्वेन वा कारकत्वमित्यामनन्ति विद्वांसः। विभक्त्यर्थ इति शब्दः विभक्तीनामर्थकथने प्रयुक्तः। तयो भेदोऽभेदो वा अत्रोच्यते—

(१) मुम्बईतः प्रकाशितायां सिद्धान्तकौमुद्यां विभक्त्यर्थप्रकरणमित्युल्लिखितम्, तत्र विभक्त्यर्थ शब्देन प्रातिपदिकार्थादयः सम्बन्धार्थकः, कर्मप्रवचनीयाः, उपपदविभक्तयः विवक्षिताः, ते कारकेष्वनन्तर्भूतत्वात्, अतः 'विभक्त्यर्थनिरुपणमिति प्रकरणस्य नामोपन्यस्तम्'।

(२) मोतीलाल बनारसीदास, वाराणसी, चौखम्बा सुरभारती, वाराणसी इत्यनयोः प्रकाशनयोः प्रकाशितास्तु सिद्धान्तकौमुदीसु विभिन्नटीकाऽन्वितासु कारकप्रकरणम् इत्युल्लिखितम्, तत्र कर्त्रादिषट्ककारकाः सन्त्येव सम्बन्धस्तु न किन्तु अपवादत्वेन प्रकरणत्वेन पठितत्वात् तस्यापि कारकप्रकरणे पाठः युक्तियुक्तः, यतो हि 'उत्सर्गाऽपवादशास्त्राणि सम्बद्धानि भवन्ति'।

(३) मुख्यत्वात् प्रधानत्वात् 'प्राधान्येन व्यपदेशाः भवन्ति' इति लौकिकनियमानुसारं कारकस्येति पाठो ज्यायान् पक्षः।

(४) कतिपयसिद्धान्तकौमुद्याः प्रतिषु (दाक्षिणात्येषु) कारकादिनिरुपणमित्यपि पाठो ज्यायान् पक्षः।

(५) प्रकरणान्ते श्रीमद्भट्टोजिदीक्षितेन, ज्ञानेन्द्रसरस्वती–महाभागेन (तत्वबोधिनीकारेण) इति 'कारकप्रकरणम्' इति लिखितम्। बालमनोरमाकारेण 'विभक्त्यर्थनिरुपणम्' इति प्रपेठे। इत्थं सर्वे पक्षाः ज्यायांसः परम्पराऽनुसारं सर्वमूह्यम्।

# ।। कर्तृकारकम् ।।

कृ धातोः (डुकृञ्-करणे, तनादि उभयपदम्) कर्तरि तृच् प्रत्यये कृते कर्ता (प्राति० कर्तृ) शब्दः निष्पन्नः भवति। कर्तृशब्दः कारकपर्यायः वर्तते। उभयत्र 'ण्वुल्तृचौ' पा. (३/१/१३७) सूत्रेण कर्तृवाचकः प्रत्ययः भवति। उभयोः समानार्थः। कारकप्रकरणे कर्तुः स्थानं पूर्वनिर्दिष्टार्थानुसारेण सम्यक् सुस्पष्टं भवति। व्याकरणशास्त्रे, विशेषतः पाणिनितन्त्रे प्रायः नियमः वर्तते यत् यस्य कस्यापि प्रकरणस्य नाम (संज्ञाकरणम्) प्रकरणस्य प्रधानं अतिप्रसिद्धं वा विषयं आधृत्य क्रियते (प्रधानेन व्यपदेशा भवन्ति)। उदाहरणार्थं कृत् प्रकरणस्य नाम तत्प्रकरणे निष्पन्नं सुप्रसिद्धं कृत् (कृ + क्विप्) शब्दं आश्रित्य वर्तते। घिः, नदी तद्धितादिषु संज्ञासु एतद् दृष्टिगोचरम् भवति। अतः कर्ता इत्यस्य 'कारक' इति संज्ञाकरणे न किमपि आश्चर्यम्। अनेनैव कर्तुः प्राधान्यं कारके ज्ञायते।

**पाणिनिकृतकर्तृलक्षणम् ::-**

पाणिनीयाष्टाध्यायिमध्ये कर्तुः प्रसिद्धं लक्षणं वर्तते - 'स्वतन्त्रः कर्ता' (१/४/५४) अर्थात् क्रियायाः सिद्धौ यः स्वतन्त्ररुपेण प्रवृत्तो भवति सः कर्ता उच्यते। रामो गच्छति, रामेण गम्यते। उभयोः उदाहरणयोः गमनक्रियायाः सिद्धये रामस्य स्वतन्त्ररुपेण प्रवृतिः प्रदर्शिताऽस्ति। प्रथमप्रयोगे कर्ता अभिहितो वर्तते, द्वितीये च अनभिहितः।

**भर्तृहरिदिशा कर्तुः स्वातन्त्र्यम् ::-**

कर्तुः प्रधानतायाः उपपत्तिः भर्तृहरिणा वाक्यपदीयस्य उभयोः कारिकयोः (३/७/१०१-२) प्रदर्शिता। यस्य भावार्थः कैयटेन प्रायः भाष्योक्तेः व्याख्याने अन्वयं साधित्वा एव निर्दिष्टः। एते कारिके अधोलिखितरुपेण वर्तते।

प्रागन्यतः शक्तिलाभान्यग्भावापादनादपि।
तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्तनात्।।
अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात्।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरिष्यते।।

**(१) प्रागन्यतः शक्तिलाभात् –**

क्रियासिद्धेः निमित्तकारणे विद्यमानकर्तुः स्वशक्तिर्भवति। एषा शक्तिः तम् अन्यनिमित्तेषु शक्तेः प्रादुर्भावात् प्रागेव लभते। यतो हि अन्यः निमित्तः (कारकः) स्वशक्तिः कर्तृकारकात् प्राप्नोति, कर्ता इत्येवं न करोति (निमित्तान्तरतः शक्तिं न गृह्णाति)। अयं स्वातन्त्र्येण क्रियासिद्धये सामर्थ्यं बिभर्ति। अतः केवलम् अर्थवच्छब्दरुपत्वात्, अभिधेये कर्तरि प्रथमाविभक्तिर्भवति। गौः, अश्वः इत्यत्र 'अस्ति' विद्यते वा क्रिया पर्याप्तं वर्तते।

**(२) न्यग्भावापादनादपि –**

अन्ये कारकाः कर्तुः समक्षं तिरोहितरुपेण अर्थात् सहकारीरुपेण आगच्छन्ति। कर्ता क्रियासिद्धये तान् नियोजयति। तथा ते गौणरुपेण कर्तुः स्वलक्ष्यप्राप्तौ सहाय्यं करोति। एते प्रधानतायाः द्योतकाः सन्ति।

**(३) तदधीनप्रवृत्तित्वात् –**

अनेन स्पष्टं भवति यत् अन्येषां कारकाणां प्रवृत्तिः कर्तृकारकस्य व्यापाराधीनं वर्तते। कर्त्ता तथा करणादिकारकाणां मध्ये प्रयोज्यप्रयोजकभावसम्बन्धोऽस्ति यत्र कर्त्ता साक्षात् प्रवर्तकः अस्ति। यदधीनम् अन्येषां कारकाणां क्रियाकलापः व्यापारो वा सञ्चाल्यते तत् प्रधानं भवितुं सर्वथा न्यायोचितम्।

**(४) प्रवृत्तानां निवर्तनात् –**

यतो हि कर्ता व्यापारसिद्धये भवति अतः अस्मिन् विषये सः पूर्णतया स्वाधीनः वर्तते यत् यस्य कस्यापि साधनस्य प्रयोगं कूर्यात् न वा। इतोऽपि अधिकं कर्ता यदा पश्यति यत् करणादिकारकाः स्वसीमातः बहिर्गत्वा कार्यं कर्तुम् उद्युताः सन्ति तदा कर्ता तान् अवरुणद्धि अपि[१]। एतन्न पर्याप्तं यदा कर्ता फलप्राप्त्यनन्तरं स्वयं निवृत्तः भवति तदा तदधीनाः अन्ये कारकः तेनैव सह निवृत्ताः भवन्ति। इत्येवं रीत्या साधनान्तरस्य प्रवृत्तिनिवृत्योः नियमकारित्वात् कर्ता प्रधानमुच्यते।

१. 'कर्त्ता तु फलार्थमीहमानः स्वयं व्यापारवान् अतिप्रवृत्तानि करणादीनि निवर्त्यन्ते कर्ता'। – हेलाराजः (उक्तकारिकाणां व्याख्यायाम्)

**(५) अदृष्टत्वात्प्रतिनिधेः –**

करणादिकारकाणां प्रतिनिधिः कर्त्ताकारकः भवितुं शक्यते। किन्तु कर्तुः न कोपि नियन्ता भवति यः तस्य स्थानं ग्रहितुं शक्नोति। यस्य कस्यापि क्रियासिद्धौ कर्ता एकैव भवति। यदि कर्तुः परिवर्तनं क्रियते चेत् क्रियायाः अपि परिवर्तनं निश्चितम्। अन्येषां कारकाणां परिवर्तनं वयं पूर्वं दृष्टवन्तः यत्र तेषां कारकाणां स्थाने कर्ताकारकः कार्यं करोति यथा-'स्थाली पचति'। किन्तु यः मूलतः कर्ता वर्तते तं वयं परिवर्तयितुं न शक्नुमः[१]। एतत् तस्य प्रधानतायाः एव सूचकः वर्तते।

**(६) प्रविवेके च दर्शनात् –**

कर्तुः अभावे अन्ये कारकाः स्थातुं न शक्नुवन्ति, किन्तु अन्येषां कारकाणां अभावदशायां कर्तृ-कारकस्य प्रयोगः दृश्यते। यथा – 'घटोऽस्ति', भवति विद्यते। अत्र कर्ता एकाकी एव क्रियां सम्पादयति[२]। यदि कर्ता न स्यात् तर्हि अन्ये कारकाः क्रियासिद्धौ समर्थाः न भवेयुः। एतदेव कर्तुः प्राधान्यं स्वातन्त्र्यं वा वर्तते।

आभिः युक्तिभिः भर्तृहरिः प्रदर्शयति यत् कर्तुः स्वातन्त्र्यं पूर्णरुपेण वर्तते। हेलाराजः एताः युक्तयः भाष्यव्याख्यानम् एव स्वीकरोति। तेषामेव शब्दे - '....... इति समस्याभिहितं भाष्यं व्यस्य व्याख्यातम्'।

**प्रयोज्यकर्तृत्वम् ::-**

पतञ्जलिः कर्तृलक्षणे प्रयुक्तः स्वतन्त्रशब्दविषये शङ्कां उद्भावयति यद् यदि स्वतन्त्रस्यैव कर्तृसंज्ञा स्यात् तदा तु प्रयोज्यकारकः कर्त्ता भवितुं न शक्यते, यतो हि प्रयोज्यः स्वतन्त्रः न भवति। प्रयोजकस्य प्रधानतायाः अधीनं कार्यं करोति – 'पाचयति ओदनं देवदत्तः (प्रयोजकः) सूपकारेण (प्रयोज्यः)'। फलतः प्रयोज्यः कर्तारुपेण स्वीकर्तुं उपसंख्यानं आवश्यकम्, यथा–'स्वतन्त्रः कर्ता (प्रयोज्यश्चेत्युपसंख्यानम्)'।

---

१. 'कर्त्रन्तरं हि क्रियां निवर्तयत् प्रतिनिहितं नोच्यते। तस्याप्यर्थिनः समर्थस्यापर्युदस्तस्याधिकारात्'। – हेलाराजः

२. 'यद्यपि अत्राधिकरणादयः सम्भवन्ति तथापि नान्तरीयकास्ते शब्दव्यापारादप्रतीयमानाः।' – हेलाराजः

किन्तु! एतादृशं नास्ति, प्रयोज्यः अपि स्वतन्त्रः एव। यदि प्रयोज्यः स्वतन्त्रः न स्यात् तर्हि अन्येषां कारकाणां विनियोगेन क्रियासिद्धिः न कूर्यात् एवञ्च वाक्ये प्रयोज्यस्य कार्याभावदशायां 'प्रयोजकः कारयति' इदृशः प्रयोगः स्यात्। कारयति प्रयोगः प्रयोज्यस्य कार्यदशायामेव भवति। अनेन प्रयोज्यस्य स्वातन्त्र्यं स्थिरो भवति। तदा एतद् वक्तुं कदाचिद् उचितं यत् प्रयोजकः कार्यं (क्रियासिद्धिं करोति) तदा स्वतन्त्रः यदा कार्यं न करोति तदा परतन्त्रः। अतः प्रयोजकस्य सन्निधाने सत्यपि प्रयोज्यः स्वार्थसाधने तत्परः एव तथा च स्वकार्ये स्वतन्त्रः। कैयटः अस्मिन् सन्दर्भे भाष्यकारवचनं प्रमाणीकरोति - 'न हि कश्चित्परोऽनुगृहीतव्य इति प्रवर्तते सर्वे इमे स्वभूत्यर्थं यतन्ते'। अर्थात् सर्वे स्वस्वार्थसाधने संलग्नाः। कोऽपि परस्मिन् अनुग्रहीतुं स्वकार्यं न करोति। एतदेव चेतनस्य वैशिष्ट्यम्।

स्वतन्त्रस्य अस्वतन्त्रस्य च निश्चयः प्रयोज्य (प्रेषित) पुरुषे क्रियामक्रियां दृष्ट्वा क्रियते यत्।

प्रथमावस्थायां 'कारयति' इति प्रयोगः भवति। द्वितीयावस्थायां न भवति। किन्तु! पतञ्जलिः भाष्ये अस्याः चर्चायाः अन्ते निर्णयं ददाति यत् प्रेषितः पुरुषः यदा कार्यं नापि करोति तदापि सः स्वतन्त्रः[१]। तथा तस्यां अवस्थायामपि 'कारयति' प्रयोगः भवति। प्रयोजकः।

प्रयोगोऽयं प्रयोज्यः कार्यं करिष्यति न वा अस्य सापेक्षकः न। कार्यसम्पादनं पूर्णतया प्रयोज्यस्य इच्छाधीनं वर्तते - कार्यं कूर्यात् न वा। अस्याः प्रवृत्तिनिवृत्तिरुपेच्छायाः विद्यमानत्वात् प्रयोज्यस्य स्वातन्त्र्यम् अक्षुण्णम्। एतादृशस्य स्वातन्त्र्यस्य किं प्रयोजनं यत्र निजेच्छया कार्यकर्तुं मुक्तिः न स्यात्? यतो हि इदृशी मुक्तिः प्रयोज्ये वर्तते अतः सः स्वतन्त्रः वर्तते कर्ता चास्ते।

प्रयोज्ये कर्तृनिर्देशः पाणिनिनाऽपि निर्दिष्टः - 'तत्प्रयोजको हेतुश्च' (१/४/५५) अर्थात् स्वतन्त्रकर्तुः प्रयोजकस्य (व्यापारनियोजकप्रयोजकस्य) अपि कर्तृसंज्ञा भवति। तस्य हेतुसंज्ञा अपि भवति। अनेन सूत्रप्रमाणेन प्रयोजकः कर्तृसंज्ञां हेतुसंज्ञां

१. 'यदि च प्रेषितोऽसौ न करोति, स्वतन्त्रोऽसौ भवति।' – भाष्य २, पृ. २७९.

च लभते। प्रयोज्यप्रयोजकौ परस्परं सापेक्षशब्दौ वर्तेते। प्रयोजकः यं नियोजयति स एव प्रयोज्यः। अस्मिन् सूत्रे प्रयुज्यमानेन 'तत्' पदेन अव्यवहितपूर्वे प्रयुक्तस्य कर्तुरेव परामर्शो भवति, अस्मिन् सन्दर्भे प्रयोज्यकर्तृपदमतिरिच्य अन्यकस्यापि बोधो न भवति। अतः वयं वक्तुं शक्नुमः प्रयोज्यभूतस्वतन्त्रकर्तुः प्रयोजकोऽपि कर्ता (तथा हेतुः) उच्यते। एतौ संयुज्य 'हेतुकर्ता' इतिप्रयोगस्य परम्परा वैयाकरणेषु दरीदृश्यते।

पतञ्जलिः पूर्वनिर्दिष्टान् तथ्यान् आधृत्य शङ्कते यत् प्रेषणव्यापारे अस्वतन्त्रकर्तुः प्रयोजकस्य हेतुसंज्ञा न भवति, हेतुसंज्ञा तदा एव भवति यदा स्वतन्त्रव्यक्तेः प्रेषणं यदा क्रियते तदा एव हेतुसंज्ञा भवति (एषा परम्परा वर्तते) अत एव एतद् सत्यं वर्तते यत् हेतुः प्रयोजको वा स्वतन्त्रकर्तृपदं प्रयोजयति। परन्तु प्रयोज्यं स्वतन्त्रं स्वीकर्तुम् एका विप्रतिपत्तिः वर्तते यस्य निर्देशः एकस्मिन् वार्तिके अस्ति-'स्वतन्त्रत्वात् सिद्धमिति चेत् स्वतन्त्रपरतन्त्रत्वं सिद्धम्'[1]। प्रयोजकस्य सन्निधौ प्रयोज्यस्य पारतन्त्र्यम् सामान्यतया अनुभवजन्यं वर्तते भवाँश्च कथयति यत् प्रयोजकः स्वतन्त्रं (= प्रयोज्यं) प्रयोजयति। इत्येवं रीत्या प्रयोज्यः एकत्र स्वतन्त्रः उच्यते अपरत्र च परतन्त्रो भवति - अत्र तु विप्रतिषेधो (तुल्य बलविरोधः) भवति। किन्तु अस्य समाधानं वार्तिककारेण अन्यत्र स्पष्टीकृतम्।

वार्तिककारस्य प्रथमसमाधानं मया पूर्वं चर्चितं यत् यदि प्रयोज्यः स्वतन्त्रः न स्यात् तदा तु क्रियासिद्धिमपि न कूर्यात् तथा तस्य अकरणावस्थायामपि (अकुर्वत्यपि) 'कारयति' क्रियायाः प्रयोगः स्यात्[2]। 'कारयति' क्रिया प्रयोज्यस्य कार्यावस्थायां स्वतन्त्रावस्थायां वा। एतत्कात्यायनस्य मतम्।

भाष्यकारः अस्मिन् विषये मुक्तकण्ठेन लौकिकानुभवं स्थापयित्वा प्रयोज्यस्य कार्यस्य अनवस्थायामपि स्वतन्त्रतायाः सिद्धिं करोति। प्रयोज्यस्य

१. भाष्य २, पृ. २८०।

२. 'न वा स्वातन्त्र्याद्, इतरथा ह्यकुर्वत्यपि कारयतीति स्यात् (वा०)। तथा यो हि मन्यते, नासौ स्वतन्त्रः, अकुर्वत्यपि तस्य कारयतीत्येतत्स्यात् (भाष्य)।' - भाष्य २, पृ. २७८

कार्यावस्थायाम् अनवस्थायां वा उभयस्यां स्थितौ 'कारयति' प्रयोगः भवितुं शक्यते। प्रवृत्तिनिवृत्तिरुपायाम् अवस्थायां स्वेच्छाधीनकर्तृपदं स्वतन्त्रः कथं न स्वीक्रियेत?, स्वातन्त्र्यस्य उपभोगः तेन अप्रयत्नावस्थायाम् 'कारयति' इति णिजन्तक्रियायाः प्रयोगो न स्यात्। स्वतन्त्रकर्तुःप्रयोजकंहेतुरुच्यते तथा हेतुस्थप्रेषणादिव्यापारस्य द्योतिते सति एव 'हेतुमति च' इति सूत्रेण णिच् प्रत्ययो भवति। अनेन निश्चितं भवति यत् प्रयोज्यस्य उपस्थितौ अपि तस्य स्वातन्त्र्यमक्षतं भवति।

अस्यद्वितीय समाधानं तत्रैव दृष्टिगोचरं भवति यत्र 'हेतुमति च' सूत्रान्तर्गतस्य 'आख्यानात्कृतस्तदाचष्टे' वार्तिकस्य आक्षेपाय स्वयं कात्यायनो वदति यत् पूर्वोक्तवार्तिकेन या 'कंसं घातयति' इत्याद्युदाहरणानां सिद्धिः भवति, सा सिद्धिः 'हेतुमति च' इति सूत्रेणैव सम्भवति, वार्तिकस्य आवश्यकता नास्ति। वस्तुतः कंसवधस्य हेतुकर्ता इन्द्रादिः वर्तते। भाष्यकारस्य प्रयोगे 'इन्द्रः कृष्णेन कंसं घातयति' इत्येवं रीत्या 'हेतुमति च' सूत्रेण निष्पन्नं भवति। किन्तु एतत्तथ्यस्य नटाभिनयेन यदा नाट्यमञ्चे प्रस्तौति तदा अस्य वार्तिकस्य आवश्यकता भवति एवं च 'कंसं घातयति' प्रयोगो अस्ति। अस्मिन् विषये कात्यायनस्य कथनं वर्तते यत् अस्मिन् अभिनयात्मककंसवधोपरि वास्तविककंसवधस्य आरोपणं कूर्यात् तदा उभयत्र किञ्चिदन्तरं न भवति तथा 'हेतुमति च' इति सूत्रेणैव कंसवधस्य(वास्तविकस्य अभिनितस्य च) अभिव्यञ्जने 'कंसं घातयति' प्रयोगस्य सिद्धि र्भवति[१]। अस्मिन् एव प्रयोगे वार्तिककारः ब्रूते यत् स्वतन्त्रस्य प्रयोजकः यदि हेतुकर्ता वर्तते एवञ्च अनेन यदि प्रयोज्ये स्वतन्त्रतायाः अभावो भवति तर्हि प्रयोजकः कदापि हेतुरेव न अतः प्रयोज्यकर्तुः स्वतन्त्रतायाः कारणेनैव प्रयोजकस्य हेतुत्वमुपपन्नं भवति[२]। तदनुसारेण इन्द्रस्य हेतुकर्तृत्वं तदा एव मन्येत यदा कृष्णे (प्रयोज्ये) स्वातन्त्र्यं भवेत्।

१. तुल० – शब्दकौस्तुभ २, पृ. ३५७ – कंसं घातयति तावदारोपः। ये हि कंसाद्यनुकारिणां नटानां व्याख्या-नोपाध्यायाः ते कंसानुकारिणं नटं सामाजिकैः कंसबुद्ध्या गृहीतं तादृशेनैव वासुदेवेन घातयतीव। '..... तथा च स्पष्ट आरोपः'।

२. 'न वा सामान्यकृतत्वाद् हेतुतो ह्यविशिष्टम्। तथा–स्वतन्त्रप्रयोजकत्वादप्रयोजक इति चेत् मुक्तशंसयेन तुल्यम्'। – ३, १/२६ भाष्य तथा वार्तिकः

अस्य आरोपः नाट्यात्मकशिक्षके (हेतुकर्तरि) तथा कृष्णरुपनाट्यनटे (प्रयोज्यकर्तरि) अपि भवति। इत्येवं प्रकारेण यथा अत्र अभेदः दृश्यते अर्थात् समानरुपेण दृश्यते तथा प्रयोज्यकर्तरि एवं कर्तृवाच्यस्थकर्तरि अपि सादृश्यं वर्तते, यः (प्रयोज्यकर्ता) विना प्रेरणया स्वयं स्वतन्त्रतापूर्वकं कार्यं करोति। 'यज्ञदत्तः देवदत्तेन कारयति' तथा 'देवदत्तः करोति' उभयोः वाक्ययोः देवदत्ते समानरुपेण स्वातन्त्र्यं वर्तते।

व्याकरणशास्त्रस्य त्रिमुनिनिरुपितकर्तृविषयकविचारावसरे आनुषङ्गिकरुपेण भर्तृहरेः कारिकाद्वयोः उद्धरणं दत्वा कर्तुः स्वतन्त्रतायाः कारणानामुपरि परिचर्चा कृता। अधुना वयं भर्तृहरेः एतद्विषयकान् अन्यविचारान् व्याख्यास्यामः।

**अचेतनस्य कर्तृत्वम् ::-**

भर्तृहरिणा कर्तुः स्वतन्त्रतायाः विशदव्याख्या अकारि, यत्र कर्तारं नैकशक्तिभिः परिपूर्णं घोषितवान्। निर्दिष्टस्वतन्त्रतायाः उपयोगः चेतनपदार्थ एव कर्तुं शक्यते न तु अचेतनः[१]। किन्तु 'रथो गच्छति' 'नदी वहति', 'अग्निर्दहति', 'स्थाली पचति', इत्यादिषु उदाहरणेषु वयम् अचेतनपदार्थानां कर्तृकार्यं कुर्वन् पश्यामः। अस्य प्रयोगः कथं समाधेयः? एषाम् अचेतनपदार्थानां कर्तृत्वस्य पुष्टिः भर्तृहरिः निम्नोक्तकारिकायां दर्शितवान्—

"धर्मैरभ्युदितैः शब्दे नियमो न तु वस्तुनि।
कर्तृधर्मविवक्षायां शब्दात्कर्ता प्रतीयते"।। (वा.प. ३/७/१०३।।)

कर्तुः स्वतन्त्रतायाः बोद्धॄणां यावतां धर्माणामुपरि उल्लेखो वर्तते, यथा- प्रागन्यतः शक्तिलाभात्, न्यग्भावापादनादपि इत्यादिः, तेषाम् अयं नियमः शब्दविषये एव ज्ञातव्यम्। एषां धर्माणां प्रतीतिः शब्दमात्रे विद्यमानत्वात् कर्तुः सिद्धिर्भवति। अस्य वास्तविकी सत्ता भवेत् न वा कापि भिन्नता न स्यात्। अतः अचेतनपदार्थाणां विषये अपि कर्तृत्वस्य उपपति र्भवति। यतो हि तस्य शब्दसंसारे एषां धर्माणां सम्यक् प्रतितिः उपपाद्या वर्तते।

१. 'अचेतनेषु तर्हि एवंविधकर्मकलापाभावात् कर्तृता न प्राप्नोति – इत्याशङ्क्यमाह'।

'अग्निर्दहति' इत्यत्र अचेतनस्य अग्नेः कर्तृत्वं स्वीक्रियते। हेलाराजः वदति यत् शब्दशास्त्रे शब्दार्थः एव अर्थः, वस्त्वर्थः न, यदि सः शब्दगम्यः न स्यात् (व्याकरणे हि शब्दार्थोऽर्थः न वस्त्वर्थः) उपर्युक्तः धर्मः कर्तृलक्षणस्य उपपत्तिम् अचेतने कर्तु यदा विवक्षितो भवति, शब्देन तदनुसारं प्रातीतिं कारयति तदा शब्दात् कर्तुरपि प्रतीति र्भवति। एतद् कर्तृत्वं प्रधानरुपेण तु न भवति, लाक्षणिक (औपचारिक) रुपेणैव दीयते[१]। करणादिकारकाणां यत् वैवक्षिककर्तृत्वं भवति तत्र प्रायः अचेतन एव पदार्थो भवति तस्य पुष्टिरपि अनेननियमेन भवति। कर्ता स एव भवति मुख्यरुपेण यः शब्दतः अर्थतः उभयथा तान् धर्मान् अवधारयति, यथा-'देवदत्तः पचति'।

अस्मिन् विषये हेमचन्द्रेण न किञ्चिद् विशिष्टव्याख्यानं स्वग्रन्थे कृतम्। आचार्यः अत्र ब्रूते यत् स्वातन्त्र्यं नाम परिदृष्टसामर्थ्यकारकप्रयोक्तृत्वम्, एतत्तु चेतनव्यापारे एव भवति न अचेतनस्य कुलादेः सम्भवति, अस्य समाधानं आचार्यः स्वबृहन्न्यासे सामान्यरुपेण कर्तृव्यापारे। पदं साधयित्वा अनन्तरं पदान्तरेण योगः कर्तव्यः, अत्र अन्तरङ्ग-पदसंस्काररुपकार्यं बहिरङ्गपदान्तरसम्बन्धो न बाधते इति तेषां मन्तव्यम्[२]।।

---

१. 'एवं च कृत्वाचेतनेषूपचरितमपि न भवति कर्तृत्वम्, सर्वत्रास्खलद्वृत्तित्वात् प्रयोगस्य मुख्यतासम्भवात्'।

-हेलाराजः, तत्रैव।

२. 'यद्येवं नदीकूलं पततीत्यादौ स्वातन्त्र्याभावात् कर्तृत्वाभावः तथाहि-स्वातन्त्र्यं नाम परिदृष्टसामर्थ्यकारक-प्रयोक्तृत्वं चेतनव्यापारो नाचेतनस्य कूलादेः सम्भवति, उच्यते-सामान्ये कर्तृव्यापारे पदं निष्पाद्य पश्चात् पदान्तरयोगः, नहि अन्तरङ्गं पदसंस्कारं बहिरङ्गः पदान्तरसम्बन्धो बाधते इति'। - सिद्धहेम०, श.न्या.२/२/२ लाइन-२९

**कर्तृभेद निरूपणम् ::-**

कर्तुः सर्वत्र भेदत्रयं निरुपितं वर्तते। शुद्धकर्ता – हेतुकर्ता (प्रयोजक) – कर्मकर्ता च।

**(१) शुद्धकर्ता —**

'स्वतन्त्रः कर्ता' सूत्रद्वारा अस्यैव कर्तुविधानं भवति। अन्यान् कारकानयं प्रधानकर्ता नियमयति। अभिहितानभिहितत्वादत्र क्रमशः प्रथमातृतीये विभक्ती भवतः। यथा–रामो गच्छति, रामेण गम्यते। न्यायकोशे कर्तुर्लक्षणं वर्तते यत् प्रेरणार्थक-णिज्भिन्न-प्रकृतिक-धातुना गृहीतो व्यापाराश्रयःकर्ता भवेत्। यथा–'देवदत्तः पचति'। स्वार्थणिच्प्रकृतिकेषु धातुषु अयमेव कर्ता भवति। यथा–रामः कथयति। परन्तु प्रेरणार्थके णिचि सति धातु-प्रत्ययौ मिलित्वा यद्व्यापारं बोधयतः स शुद्धकर्ता न भवति। 'रामः पाचयति' प्रयोगेऽस्मिन् रामो नास्ति शुद्धकर्ता अपितु हेतुकर्तास्ति। मतान्तरेण प्रयोज्यः शुद्धकर्ता भवितुं शक्नोति। यतोहि स प्रयोज्योऽण्यन्तावस्थायां शुद्ध कर्तैवासीत्।

**(२) हेतुकर्ता (प्रयोजकः) —**

णिजर्थभूतस्य प्रेरणाव्यापाराश्रयस्याश्रयो हेतुकर्ता कथ्यते। हेतुकर्तुरभिहिते सति तस्मिन्प्रथमा-विभक्तिः भवति। यथा–रामः पाचयति। अत्रैका पाकक्रिया, अपरा प्रेरणाक्रिया, प्रकारेणानेन पाचयतीत्यत्र द्वे क्रियेऽन्तर्भूते स्तः। तत्र पाकक्रियाश्रयस्तु प्रयोज्यः (शुद्ध) कर्ताऽस्ति। परञ्च प्रेरणाव्यापारो रामस्थे हेतु कर्तरि निहितोऽस्ति। अनभिहिते सति हेतु कर्तरि अपि तृतीया विभक्तिः भवति। यथा–पाच्यते देवदत्तेन, कार्यते हरिणा। चरमोदाहरणस्य शाब्दबोधो न्यायकोशे उपर्युक्तस्थले दत्तोऽस्ति – 'हर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः'। गुरुपदहाल्दारश्चेतनाचेतनाभ्यां भेदाभ्यां हेतुकतुर्द्वौभेदौ कृतवान्। चेतनस्योदाहरणम्–गृहपतिः देवदत्तेनान्नं पाचयति। अचेतनस्योदाहरणम्– भिक्षावासयति अत्र भिक्षोस्सौकर्यं वर्तते येन प्रवृत्तस्सन् कश्चिद्भिक्षुकः स्थलविशेषे निवसति। अस्माद्धेतोः उक्तमस्ति यद्भिक्षा तस्य निवासं प्रेरयति[१]।

जैनवैयाकरणैर्हेतुकर्तुर्भेदत्रयं कृतमस्ति।

(क) प्रेषकः – यदा प्रयोजको वरीयः प्रयोज्यश्च कनीयस्स्यात्।
यथा - यज्ञदत्तः सूपकारेणौदनं पाचयति।

(ख) अध्येषकः —यदा प्रयोजकः कनीयः प्रयोज्यश्च वरीयस्स्यात्। अस्मिन् सादरमाग्रहस्य भावो भवति। यथा–देवदत्तो गुरुं भोजयति प्रेषणाध्येषणयोर्विषये भर्तृहरिरपि उक्तवान्।

(ग) आनुकूल्यभागी - यदा कश्चित् प्रयोजकः प्रयोज्ये मानसिकं-भौतिकं वाऽनुकूलतामुत्पादयति। यथा – सुपुत्रो जनकं हर्षयति। अत्र सुपुत्रस्स्वस्मिन् पितरि हर्षोदयेन मानसिकमनुकूलतामुत्पादयन् तं नियोजयति। एतादृग्हेतुकर्ताऽचेतनपदार्थोऽपि भवितुं शक्नोति। यथा–कारीषोऽध्यापयति माणवकम्। कारीषः (निर्धूमाग्निः) शैत्यं निवारयन्नध्ययनार्थं भौतिकीमनुकूलतामुत्पादयंश्छात्रानध्ययने नियोजयति[1]।

### ३) कर्मकर्ता —

कर्मकर्ता द्विधा व्याप्तोऽस्ति। एका पीडप्रसिद्धा वर्तते सेयमस्ति[2] यद्धातूपात्तव्यापाराश्रयत्वे सति णिजर्थव्यापारेण व्याप्यो हेतुकर्ता। यथा—गमयति कृष्णं गोकुलं गोपः। अतः कृष्णः कर्मकर्ता। कर्मकर्तुरिदमेव लक्षणमुदाहरणञ्च वैयाकरणभूषणे स्वीकृतमस्ति। यत्रास्यशाब्दबोधोऽपि कृतोऽस्ति। गोकुलकर्मकगमनानुकूल-कृष्णाश्रयक-तादृश-व्यापारानुकूलो व्यापारः। वस्तुतस्तु पाणिनेः 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्तासणौ' इति सूत्रस्येदमुदाहरणम्। यच्चसूत्रं केषाञ्चित्परिगणितानां धातूनां कर्तृषु णिजन्तावस्थायां कर्मसंज्ञायाः विधानं कर्तुमुल्लिखितमस्ति। पाणिनिमते तु तत्कर्मकारकस्योदाहरणं भवति। अन्यथा समेषां प्रयोज्यानां शुद्धकर्ता रुपेण ज्ञानमुचितमस्ति ते प्रयोज्या द्वितीया विभक्तौ तृतीयाविभक्तौ वा स्युः। अयन्तु लौकिकः प्रयोगो यत्केषाञ्चित् धातूनां योगे प्रयोज्ये द्वितीयां विभक्तिं ज्ञानमुचितमस्ति ते प्रयोज्या द्वितीयाविभक्तौ तृतीयाविभक्तौ वा स्युः। अयन्तु लौकिकः प्रयोगो यत्केषाञ्चित् धातूनां योगे प्रयोज्ये द्वितीयां विभक्तिं

१. रभसनन्दिकारकसम्बन्धोधोत. पृ.१५
२. न्या.को. पृ. १०१

निरुपयति अवशिष्टानां धातूनां योगे तृतीया। व्यत्ययेनानेन प्रयोज्यस्य कर्तृत्वे न कापि क्षतिः भवति। उपर्युक्तोदाहरणस्य शुद्धकर्तर्यन्तर्भावात् कर्मकर्तुरन्य-लक्षणं कृतमस्ति। वयं जानीमो यच्छौकर्यातिशयस्य घोटतीर्थं कर्तृव्यापारस्था-विवक्षा भवति तदाऽपरः कारकोऽपि कर्तृसंज्ञां लभते। अनया रीत्या यदा कर्मणः कर्तृत्वविवक्षा भवति तदा स कर्म कर्ता कथ्यते। दुर्गसिंहमहोदयैः कातन्त्रवृतावस्य लक्षणं कृतम्।

क्रियमाणं तु यत्कर्म स्वयमेव प्रसिद्धयति।
सुकरैः स्वैर्गुणैः कर्तुः कर्मकर्तेति तद् विदुः[1]।।

क्रियमाणं कर्म यदा स्वस्मिन् सम्पन्नं भवति तदा सौकर्यत्वेन कर्तुर्गुणान् स्वस्मिन् धारयति तदा स कर्मकर्ता भवति। यथा—पच्यते ओदनः स्वयमेव। भिद्यते काष्ठं स्वयमेव। 'कर्मत्वकर्मणा तुल्यक्रियः' इत्यनेन सूत्रेण कर्म कर्तुः कर्मवद्भावं भवति। यदि क्रिया कर्मस्था स्यात्। यदि क्रिया केवला कर्तृस्था भवति तदा कर्मवद्भावो न भवति। यथा—मासमास्ते[2]। कर्मकर्ता केवलं निर्वर्त्य विकार्ययोः कर्मणोरेवभवितुं शक्नोति। प्राप्यकर्मणस्तु न[3]।

कौण्डभट्टास्तु वैयाकरणभूषणे कस्यचित् 'कारक परीक्षा' इति नामधेये ग्रन्थे निर्दिष्टस्य कर्तृभेदस्य खण्डनम् कृतवन्तः। उक्तपरीक्षाकारा अभिहिता-नभिहिता इमौ द्वौ भेदौ स्वीकृत्य कर्तुः पञ्चभेदाः स्वीकृतवन्तः। भूषणकार एनं भ्रान्तिः कथयति यतोहि उक्तेषु त्रिषु भेदेष्वेवाभिधानानभिधानौ स्तः। त्रिभिस्सह व्याप्त्यभावादेतान् भेदान्तरकथनमसंगतमस्ति। अन्यथा त्रयाणां कर्तृणां द्वौ-द्वौ भेदौ स्वीक्रियमाणे सति षड्भेदा भविष्यन्ति। इदमेव न कर्मकारकेष्वेषां मेलनस्य प्रश्ने सति कर्मणस्सप्तविधत्वस्य स्थाने नवविध-त्वमापद्येत्। अत एव सर्वदोष विनिर्मुक्तं कर्तुस्त्रैविध्यमेवेति सिद्धान्तः।

१. न्याय कोश. पृ.१०१।

२. कर्मस्थः पचते र्भावः कर्मस्था च भिदेः क्रिया।
मासासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया।। — काशिका पृ.१५८

३. निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।
न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः।। — वै. भू. कारिका-७

## ॥ कर्मकारकम् ॥

**व्युत्पत्तिः —**

कृ धातोः (डुकृञ्-करणे तनादि, उभयः) भावे मनिन्[१] प्रत्ययेन निष्पन्नस्य कर्मणोऽर्थोस्ति 'क्रिया'। अस्मिन्नेवार्थे वैशेषिकदर्शनेऽयमेकः पदार्थविशेषोऽस्ति। इत्थमयं पदार्थश्चलनात्मकःसंयोग-विभागनुकूलश्च भवति। परञ्च भावेतरार्थेष्वप्यस्य निर्वचनजन्योऽर्थः प्रवृत्तोऽस्ति। अस्माद्धेतोः दर्शनशास्त्रे विशेषत आचारशास्त्रे फलकामनया क्रियमाणानि कर्माणि, कर्म कथ्यते। — 'क्रियते फलार्थिभिरिति कर्म धर्माधर्मात्मकम्[२]'। 'कार्य' इत्यर्थे कर्मशब्दस्य तन्त्र[३]-हठयोग[४]-धर्मशास्त्र[५]-पूर्वमीमांसा[६]-वेदान्तेत्यादिषु शास्त्रेषु नानाविधं विश्लेषणं विहितमस्ति। सर्वत्रास्य निर्वचनं भविष्यति 'यत्क्रियते तत्कर्म' अर्थाद्यत्र कृधातोः फलं स्यात, यः क्रियते। व्याकरणशास्त्रे इदमेवार्थं विस्तीर्य ग्रहीष्यते। अन्येषु शास्त्रेषु केवलं कृधातोरेव कर्मणः सम्बन्धः स्वीक्रियते लौकिको व्यवहारोऽपि तत्रैव भवति किन्तु व्याकरणशास्त्रे सर्वैस्सकर्मकधातुभिः कुत्रचिच्चाकर्मकधातुभिस्सहापि कर्मणस्सम्बन्धः स्वीक्रियते। एतेषां धातूनामपि रुपान्तरणं 'करोतौ' भवितुं शक्नोति।

भावार्थकप्रत्ययनिष्पन्नस्य कर्मशब्दस्य 'कार्य' इत्यर्थोऽत्यन्तः संघटितोऽस्ति उभौ समन्वितौ स्तः। संस्कृते सकर्मकाकर्मकैः सर्वै र्धातुभिस्सह भाववाचकान् प्रत्ययान् संयोज्य तान् सर्वान् 'करोतेः' क्रियायाः कर्म कर्तुं शक्यते।

१. सर्वधातुभ्यो मनिन् । क्रियते इति कर्म — सि. कौ. उणादि सू. ५८४
२. सर्वदर्शनसंग्रह, शैवदर्शन, पृ. ३४५।
३. षट्कर्माणि छहकर्म—शान्तिकरण, वशीकरण, स्तम्भन, विद्वेषण, उच्चाटन, मारण
४. छहकर्म—धौति, वस्ति, नेति, नौलिक, त्राटक, कपालभाति।
५. तीनकर्म—नित्य, काम्य, नित्यकाम्य (एकादशीव्रतादि)
६. त्रीणि कर्माणि तीनकर्म—नित्य, नैमित्तिक, काम्य (अश्वमेधादि)

यथा–दानं करोति (ददाति), अध्ययनं करोति (अधीते), शयनं करोति (शेते), लज्जां करोति (लज्जते)। अनेन एकतः यत्र तेषां भावरुपार्थमक्षुण्णं भवति तत्रैव पक्षतः कर्मत्वमप्यक्षुण्णं भवति। अस्मादेव सामञ्जस्यात्, कर्मशब्दस्य प्रयोगे किञ्चिद् भ्रान्तिः भवति। कुत्रचित् क्रियार्थे कुत्रचिञ्च कार्यार्थेऽस्य प्रयोगस्समानां लेखनीमिव समानाकृतौ भवितुं शक्नोति। परञ्चेयं भ्रान्तिर्वास्तविकी नास्ति। कर्मशब्दो भावेप्रयुक्तःस्यादुताहो कर्मणि उभयोलक्ष्ये पूर्वोक्तप्रकारके तुल्ये भवतः। स्वयमेवाचार्यपाणिनिः कर्मणो लक्षणं कार्यस्य व्यापकेऽर्थे व्यवस्थाप्यास्य प्रयोगः क्रियारुपेऽर्थे कृतवान्। यथा–'कर्मव्यतिहारे णच् स्त्रियाम्[१]' (३/३/४३) 'कर्माध्ययने वृत्तम्[२]' (४/४/६३) 'गुणवचनब्राह्मणादिभ्यः कर्मणि च[३]' (५/१/१२४) 'आदिकर्मणि क्तः कर्तरि च[४]' (३/४/७१) इत्यादीनि।

**कर्तुरीप्सिततमम् –**

पाणिनिप्रोक्तेषु कर्मलक्षणेषु स्थानदृष्ट्या महत्वदृष्ट्या च लक्षणमिदं प्राथम्यं भजते – कर्तुरीप्सिततमं कर्म (१/४/४९) कारकाधिकारविहिते सूत्रेऽस्मिन् क्रियायाः प्रयोगाभावेऽपि तस्या बोधोऽवश्यमेवभविष्यति। अतः क्रियया कर्ता यं सम्बद्धुमिच्छति सर्वोत्कर्षेण तत्कारकं कर्मसंज्ञकं भवति। यथा–'कटं करोति' इत्यत्र कटं ग्रामं गच्छतीत्यत्र ग्रामं वा। 'ईप्सिततम[१]' शब्दघटकी भूतस्याऽप्धातोराश्रयार्थं गृहीत्वाऽपरस्मिन् सम्प्रदाये कर्तृव्याप्यम् (हेमचन्द्रः) क्रियाप्यम् (चान्द्रः) क्रियाव्याप्यं वा (सुपद्म) इत्यादीनां शब्दानां प्रयोगाः कर्मलक्षणे कृता वर्तन्ते। किन्तु कर्त्रा क्रियया वा कर्मणो व्याप्यत्वे कोऽपि विशिष्टो भेदो नावलोक्यते। कर्मणः क्रियाया व्याप्यत्वं वास्तविकं भवति। यतोहि क्रिया कर्तरि निहिताऽस्ति। अतः कर्त्रा व्याप्या, क्रियया कर्ता व्याप्योपोभयथातुल्ये। अवश्यमिदं यत् क्रिया कर्म व्याप्नोति कर्ता कर्म क्रियया व्याप्तं करिष्यति। अतः काशिकाकारोक्तायां वृत्तौवुभयोर्मिथः प्रयोगोजातोस्ति[२]।

पाणिनिसूत्रे 'कर्तुः' इति पदस्यापरिहार्यतादृश्यते क्रियायाऽध्याहारः कर्तुं शक्यते परञ्च क्रियया कर्तुराक्षेपः भविष्यतीति वक्तुं न शक्यते। माषेष्वश्वं बध्नाती-

१. आप् + सन् + त।
२. कर्तुः क्रियया यदाप्तुमिष्टतमं तत्कारकं कर्मसंज्ञम् – काशिका (१/४/४९)

-त्यत्रकर्तृपदस्यावश्यकत्वं दृश्यते। कश्चित्पुरुषोऽश्वस्य कार्यं पुष्ट्यर्थं माषस्य क्षेत्रे बध्नाति। यतोहि माषं भक्षयित्वा स पुष्टो भवतु। अत्र कर्तुरीप्सिततमोऽश्वो वर्ततेयस्य कर्मसंज्ञा जाता – कर्ता बन्धनक्रिययाऽश्वं व्याप्तुमिच्छति। यदि कर्तुव्यतिरिक्तस्य कारकान्तरस्य ईप्सिततमस्य कर्मसंज्ञा स्यात्तर्हि प्रकृतेऽश्वस्येप्सिततमस्य माषस्यापि कर्मत्वं स्यात्। परञ्चात्र माषः बन्धनकर्तुरीप्सितो नास्ति हेतोरस्मात्तस्य कर्मसंज्ञा न जाता - अतः कर्तृपदस्य सार्थक्यं दृग्गोचरं भवति।

सूत्रेऽस्मिन् तमप्प्रत्ययोऽपि महनीयतां भजते। यदि च 'कर्तुरीप्सितं कर्म' इत्येतावन्मात्रं स्यात्तर्हि – अग्नेर्माणवकं वारयतीत्यत्राग्निना सह माणवकस्याप्यपादानत्वं स्यात्, 'वारणार्थानामीप्सितः' इति सूत्रेण वारणार्थक धातुभिर्योगे ईप्सितवस्तुनोऽपादान संज्ञा भवति। यथा माणवकमग्निरीप्सितस्तथैव वारणकर्तारं माणवक ईप्सितः, यतोहि स तं तित्रासते। अत ईप्सितं इति पाठेऽपादानसंज्ञाया प्राप्तिर्भविष्यति। यदि चोत्तरयतु यत्कर्मसंज्ञापरत्वादपादानसंज्ञां बाधिष्यते तर्ह्यग्निरित्यत्राप्यपादानत्वं बाधितं भविष्यति। तमब्ग्रहणे सति दोषोऽयन्नोद्भवति। वार्तिककारेणाप्युक्तमस्ति यद् 'वारणार्थानामीप्सितः' इति सूत्रे 'कर्मणः ईप्सितम' इत्यर्थस्य सत्वेऽपि तस्य शब्दतः कथनन्नोपयुक्तं यतोहि कर्मणो लक्षणे पाणिनिः 'ईप्सिततम्' इत्यस्य प्रयोगः कृतवान्[१]। फलतो माणवकस्य कर्तुरीप्सिततमत्वेनकर्मसंज्ञा, अग्नेर्माणवकस्येप्सित-त्वेनापादानसंज्ञा जाता।

ईप्सितेप्सिततमयोर्भिन्नत्वादेव 'पुष्पाणि स्पृह्यति' 'पुष्पेभ्यः स्पृह्यति' इत्युभौ प्रयोगौ भवतः। स्पृह् धातोर्योगे ईप्सितवस्तुनः सम्प्रदान संज्ञया प्रथमप्रयोगोपपत्तिर्भवति। यदीप्सितस्य प्रकर्षत्वं विवक्षितं स्यात्तर्ह्याद्योदाहरणे प्रदर्शितं कर्मत्वमपि भवितुं शक्नोति।

**ईप्सिततमस्य पतञ्जलिना विवेचनम्—**

पतञ्जलिमहोदया रुचिकरमुदाहरणं दत्वेप्सिततमं विवेचयन्ति। पूर्वपक्षेऽन्वय-व्यतिरेकाभ्यामोदनापेक्षया दधिदुग्धयोरीप्सिततमत्वं वर्णितमस्ति। यत्कश्चित्कमामन्त्रयति

१. द्रष्टव्यम् – महाभाष्य – २, पृ. २६०

अस्मद्गृहे भुङ्क्ताम्। आमन्त्रितः पुरुषो ब्रवीति यत् सम्प्रत्येवाहं भुक्तवानस्मि। आमन्त्रयिता पुनस्तंभोजनार्थमामन्त्रयन् कथयति यदस्मद् गृहे भोजनार्थं दध्यस्ति दुग्धमस्ति। तदा स उत्तरयति–आम् दधिदुग्धाभ्यां सह भक्षयिष्यामि। (दध्ना खलु भुञ्जीय) (पयसा खलु भुञ्जीय)। अत्र दधिपयसोर्कर्मसंज्ञा भवितव्या यतो हि तदेव भोक्तुरीप्सिततममस्ति नोदनम्। आमन्त्रयितुर्गृहे केवलमोदनस्य कल्पनया स भक्षणेऽप्रवृत्तोऽस्ति। पक्षतः दधिदुग्धयोर्नामश्रवणेनैव सः भक्षणार्थमुपस्थितो भवति तदेव स्पष्टयति यत्तस्य दधिपियसी ईप्सितत्मे स्तः।

परञ्चेत्थन्नास्ति। पुरुषस्य तस्यौदनएवेप्सिततमः। गुणेष्यस्य नानुरोधः[१]। संस्कारकपदार्थाः तथैव गुणस्य कार्यं कुर्वन्ति यथा सामान्य विशेषणानि। यथा कश्चिद् ब्रवीतु यदहमोदनमत्तुं समर्थोस्मि यदि तन्मृदुविशदे स्यात्। अत्र पुरुषस्यप्सिततमं मृदुत्वं विशदत्वन्नास्ति स ओदनएव भक्षयिष्यति। परञ्च तस्मिन् गुणाधीनमपेक्षते। कैयटमहोदया गुणानामादरस्यासङ्गतिं दर्शयन्ति यत् तस्य मृदुमात्रमीप्सितं स्यात्तर्हि स पङ्कमात्रमपि भक्षयेत् यदि च विशद एवाग्रः स्यात्तर्हि तस्मै कदाचिद्वालुकाभक्षणमपि रोचेत[२]। अतः सिद्ध्यति यत्तस्याभीष्टो गुणी वर्तते न तु गुणः। अत्रापि तस्योद्देश्यमूलकः प्रयोगो भविष्यति। 'दधिगुणमोदनं भुञ्जीय, पयोगुणमोदनं भुञ्जीय'। काशिकायामत एव तमब्ग्रहणस्य प्रत्युदाहरणरूपेण 'पयसा ओदनं भुंक्ते' इति प्रयोगो दत्तोऽस्ति अनीप्सिततमत्वात् पयो न कर्मकारकम्। ईप्सितावुभौ परञ्चेप्सिततम ओदनः।

कदाचित् क्रियाया एवेप्सिततमस्य भ्रमो भवति। यथा–'गुडं भक्षयति' उदाहरणेऽस्मिन् भक्षणक्रियैवेप्सिता[३] यतोहि तस्या क्रियाया उत्पत्तय एव गुडोपादानं भवति गुडार्थन्न भक्षणक्रियाया अनुष्ठानं भवति। अतः गुडशब्दं न कर्म भवितुं शक्नोति। कैयट महोदयाः इदमेव पूर्वपक्षमनुसृत्य क्रियाकर्मणोरीप्सिततमस्य विभाजनं कुर्वन्ति। कर्म तदेवेप्सित भवति यत्र क्रिया निष्पत्ति-संस्कार-प्रतिपत्तिभिर्कर्मार्थमुपस्थिता भवति[४]। भिन्नस्थलेषु प्रतीयमानसंदर्शनादि क्रियापेक्षया क्रियैवेप्सिता भवति।

१. दधिपयसोस्तु संस्कारत्वात्करणभावः। गुणेषूपकारकेषु केवलेषु नास्यादरः! किं तर्हि? तत्संस्कृत ओदन इत्यर्थः। (उद्योत) महाभाष्य प्रदीप (२ पृ.२६१)

२. यदि मार्दवमात्रे आदरः स्यात्पङ्कमपि भक्षयेत्। (म.भा. २ पृ.२६१)

३. कैयट प्रदीप पृ. २६२ ४. उद्योत पृ. २६२

प्रकृतेऽपि गुडभक्षणक्रियैवेप्सिता। स्वोत्थापितां शङ्कां समाधत्ते यदत्र दोषो न भवितुं शक्नोति यतो हि क्रियया सह कर्म अपीप्सीतं वर्तते। यस्य गुडभक्षणमीप्सितं तस्य भक्षणक्रियया गुडोऽपीप्सितमोस्त्येव यदि कर्मेप्सितन्न स्यात्तर्हि गुडभक्षकः नरः शिलाखण्डं भक्षयित्वा मोदते वरञ्चेतादृग्नास्ति[१]।

क्रियेप्सितस्योदाहरणानि भवितुं शक्नुवन्ति। राजपुरुषाः कानिचन कार्याणि सम्पादयन्नेव कालं यापयन्ति। तेषां द्रव्यविशेषे नादरः। तेषु कश्चिच्छ्रेष्ठो राजपुरुषोऽधीनस्थमादिशति यत्कटं कुरु। स उत्तरयति। कटं कर्तुमहमक्षमो यतो हि प्रथमं मया घट आनीतः। स्पष्टतः तस्य क्रियेप्सिता न द्रव्यम्। पतञ्जलिः शङ्कामिमां समादधाति यद्यपि कर्मचारिणः क्रियेप्सिता परञ्च य आदिशति तस्योभावीप्सितौ। कर्मचारिणा क्रियमाणा क्रिया, तया क्रिययाऽऽप्यमानः पदार्थोऽपि। भाष्यकारस्यायमाशयो यत्प्रयोजकस्योभावाप्सितौ परञ्च प्रयोज्योऽपि वेतनार्थं प्रयोजकमनुकूलयितुमिच्छति। अतः तस्याप्युभे ईप्सिते यतः प्रयोजकस्यानुदेशं प्रयोज्यो विशिष्टं कर्म करिष्यति तदा प्रयोजकस्यादेशस्यपूर्तिः भविष्यति। केचन प्रकारान्तरेण प्रयोज्यस्य क्रियया व्याप्यस्यकर्मणः सिद्धिङ्कुर्वन्ति। तेषाम्मते प्रयोजकापेक्षामिच्छन् प्रयोज्यस्यानीप्सितःपदार्थोऽपि कर्म भवति। परञ्चेदम्मतम् इषितप्रायम्। यतोहि यत्र प्रयोजकस्य व्यापारः शब्दार्थो न स्यात्तत्र (यथा – कटं करोति) मतमिदमनुपयुक्तं भवति। उभयोरीप्सितत्वे क्रिया न कारकं भवितुं शक्नोति। तया क्रियया व्याप्यत्वात् कर्मैव कारकम् यस्योपर्युक्तं लक्षणं निर्विवादतामेति।

**अनीप्सितस्य कर्मत्वम् –**

पाणिनिस्सूत्रान्तरेण 'तथायुक्तं चानीप्सितम्' कर्तुरनीप्सितस्यापि कर्मसंज्ञां सम्पादयति यदि तदीप्सिततममिव क्रियया युक्तं स्यात्। अनीप्सितेत्यत्र नञः प्रयोगादर्थद्वयस्य सम्भावना—

(१) प्रसज्य प्रतिषेधः

अस्मिन् पक्षे वस्तुनो विधानं कृत्वा निषिध्यते[२]। यथा न गच्छेत्, अस्मिन्

१. भाष्य २ पृ. २६२

२. अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्य प्रतिषेधोऽसौ क्रियया सह यत्रनञ्।। (न्या.को.पृ.५८४)

विध्यात्मकोऽर्थो गौणो निषेधात्मकश्च मुख्यः। अनीप्सितस्य 'न ईप्सितम्' इत्यर्थः प्रसज्य प्रतिषेधे भविष्यति। अनयारीत्या द्वेष्यः पदार्थ एवानीप्सितो भविष्यति यतोहि द्वेष्यस्यैवेप्सितेन साक्षाद्विरोधः।

(२) पर्युदासः[1]

पक्षेऽस्मिन् विध्यात्मकोऽर्थः प्रधानः तथा च निषेध्य वस्तुनः पृथक् समेषां सदृशपदार्थानां विधानं भवति। यथा–अब्राह्मणो गच्छति (ब्राह्मण सदृशः कश्चिदपरो गच्छति) तयारीत्यानीप्सितस्यार्थः ईप्सिताद् भिन्नो द्वेष्यो वोदासीनो वा स्यात्। भाष्यकार इममेवार्थं स्वीकुर्वन्–ईप्सितात् पृथगुदासीनस्यैव कर्मसंज्ञाम्मनुते। यो नेप्सितो न चानीप्सितः (द्वेष्यः)[2] यथा–'ग्रामान्तरं गच्छन् वृक्षमूलान्युपसर्पयति' कुड्यमूलान्युपसर्पति। वृक्षमूल-कुंड्यमूले उदासीने कर्मणीस्तः यतोहि इमेनेप्सितअनीप्सिते च न। तथापि द्वेष्यपदार्थस्यापि कर्मसंज्ञा भाष्यकारस्याभीटा। यस्या पूर्वमेव प्रदर्शनङ्कृतवान् - ग्रामान्तरं गच्छन् चोरान्पश्यति, अहिं लङ्घयति, कण्टकान् मृद्नाति। एषु चौर-अहि कण्टकाः भयोत्पादकत्वादनीप्सिताः अर्थात् द्वेष्याः सन्ति। ईप्सिततम-सूत्रेणैतेषां कर्मसंज्ञाऽनिष्टा यतोहि दर्शनादि क्रियाभिरेतेषां व्याप्तीकरणमसम्भवम्।

**द्वेष्योदासीने –**

पर्युदास-व्याख्याभ्यन्तरे भाष्यकारं द्वेष्योदासीनयोः कर्मसंज्ञाऽभिमता। कैयटोऽपि समर्थयति यथा अधर्मअनृतेत्यादीनां शब्दानामुत्तरपदार्थप्रतिपक्षस्थपदार्थानां प्रतिपादनं पर्युदासेन भवति तथैवानीप्सितशब्देनापीप्सितात्पृथग्द्वेष्योदासीनयोर्ग्रहणं भवति। तदनुसारमेव परवर्तिन आचार्या अनीप्सित कर्मण्येव द्वयोर्भेदयोः निरुपणं कृतवन्तः। दार्शनिक दृष्ट्या द्वेष्यपदार्थेषु दुःखाभावो भवति यश्च सांख्यमते रजोगुणस्योद्रेकादुद्भवति। उदासीनकर्मणि पक्षतः तमोगुणस्योद्भवाद् मोहस्वभाव उत्पद्यते। ईप्सिततमे निश्चप्रचं 'सुखात्मकता' अर्थात् सत्वोद्रेको भवति। अन्यथा तस्याः

१. प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्रधानही।
पर्युदासः सविज्ञेयो यत्रोत्तरपदेन नम।। (न्या.को.पृ.४९१)

२. पर्युदासोऽयम् – भाष्य २, पृ. २६३

प्राप्तेरिच्छानोदेत्[१]। इत्थं सांख्यानां त्रिगुणवादस्य सम्यक्प्रतिफलनं कर्मणि द्रष्टुं शक्यते।

अस्मिन्नेव सूत्रे पतञ्जलिः 'विषं भक्षयति' इति वाक्यस्थस्य विषस्य कर्मत्वं विवेचितवान्। यश्च—पृथग्महनीयतां भजते। विषस्तु निश्चप्रचं समेषाङ्कृतेऽनीप्सितं द्वेष्यम्वाऽस्ति। मृत्योर्भयात् कोऽपि पुरुषो विषन्नाप्तुमिच्छति। तथापि कदाचिद्विष-भक्षणमीप्सितं भवति। येनेप्सिततमत्वात्तस्य कर्मसंज्ञा भवति। यो नरोदुःखवेदनां सोढुं न शक्नोति स भविष्येऽऽगामिनी दुःखवेदनापेक्षया विषभक्षणमेव करिष्यति। यथा दुःखसाधनानीप्सितरुपे प्रसिद्धानि तथैव दुःखनिवृत्तेस्साधनानान्य-पीप्सितानि सन्त्येव। उक्तस्थितौ विषे सत्यमेव दुःखनिवृत्तेर्योग्यता वर्तते। इदं ज्ञात्वैव नरस्तं गृह्णाति। इत्थं विष ईप्सितकर्मण उदाहरणं भवति।

परञ्चेतेनेदन्नावगन्तव्यं यत्पतञ्जलिर्द्वेष्यकर्मसर्वथा न स्वीकुर्वन्ति। इदं सत्यमस्ति यदनीप्सितस्य प्रथममुदाहरणं दत्तं तेन सर्वप्रथमञ्चानीप्सितमेव द्वेष्यरुपेऽपश्यत् तेषां 'कस्यचित्' प्रयोगोप्यस्यसाक्षी[२]। उक्तोदाहरणे आत्महननप्रसङ्गोऽनेनैवेप्सितात्मकत्वं विषस्य दर्शितमस्ति। कदाचिच्छत्रोरादेशाद्विषभक्षणं क्रियते। तत्र विषोद्वेष्य एव। अत्र यदि ज्ञानं स्याद्यत् कारागारे बन्धनापेक्षया, अन्ययातनापेक्षया विषभक्षणं श्रेयस्करमस्ति तर्हि विषस्येप्सितत्वं सिद्धयति परञ्चाभाव इदं स्वीकर्तव्यं यच्छत्रोरा-देशादेव कश्चिदनिच्छया विषं भोक्तुं प्रवर्तते। तदा द्वेष्य कर्म स्वीकारे न काप्यापत्तिः।

भर्तृहरिः विषं भक्षयतीत्यादे द्वेष्यकर्मणो व्याख्याने कथयति यथा-शरीरे व्याध्युत्पादकेषु पदार्थेष्वपिचाञ्चल्येन कर्ता प्रवर्तते तथैव भोजनस्य सिद्धनियमानपि उल्लङ्घ्यते तथैव स्वामिभिया विषमरोगभिया वा विषादौ प्रवर्तते[४]। अतः नराणामिच्छा सर्वत्र सविवेकोत्पद्यतेऽत्र न किमपि प्रमाणम्[५]। कदाचिन्नरश्चाञ्चल्येन कारणान्तरेण

१. (क) सुखसाधने एव लोके ईप्सितत्वं प्रसिद्धम् – भा.प्रदीपोद्योत २, पृ.२६३
   (ख) तत्र यत्सुखहेतुः .........(सांख्यतत्त्व) कौ. का. १३

२. विषभक्षणमपि कस्यचिदीप्सितं भवति – भा.२ पृ. २६३

३. एवं पराधीनतया द्वेष्यमपि – द्रष्टव्य – उद्योत पृ.२६३

४. अहितेषु यथा लौल्यात्कर्तुरिच्छोपजायते। वा. व. ३/६/८०

५. हेलाराजः लोल्यादीति कारिकायाम् (पृ.२९६)

वा काञ्चन पदार्थानिच्छति। विषस्येप्सिते हेतुर्भयं वर्तते चोरान् पश्यतीत्यत्रापि दर्शन क्रियया चौर ईप्सितः। वयं द्रक्ष्यामो यद्भर्तृहरिहेलाराजौ सर्वाणिकर्माणीप्सितान्येव स्वीकुरुतः। अत्रापि तस्यैवाङ्गमस्ति।

काशिकायां जयादित्यमहोदया अनीप्सितस्योदाहरणत्रयंदत्तवन्तः। विष-चौर-वृक्षमूल्यानीमानि भाष्योदाहरणानि सन्ति। शब्दकौस्तुभे विषं परित्यज्य परिशेषे उभे उदाहरणे स्वीकर्ताभट्टोजिदीक्षितः सिद्धान्तकौमुद्याम् 'ओदनं भुञ्जानो विषम् भुंङ्क्ते' इत्यप्युदाहरणं दत्तवान्। अस्मिन् प्रयोगे 'ओदन'मीप्सितं 'विष'ञ्चानीप्सितं कर्म। अत्र टीकां कुर्वन् तत्त्वबोधिनीकारो भाष्यकारमिव पूर्वपक्षमुत्पादयति यद्विषमुभयथेप्सितं भवितुं शक्नोति। (१) व्याधिना पीडितस्य नरस्य मरणं श्रेयस्करमिति ज्ञात्वा विषभक्षणम् (२) भ्रमान्मिष्टान्नादिकं ज्ञात्वा तस्मिन्निहितं विषभक्षणम् किन्त्वत्र विषमनीप्सितम्। यतोहि प्रसङ्गान्तरं वर्तते। नरोन मुमुर्षुः किन्तु शत्रोर्यातनया विषं भुंङ्क्ते। तात्पर्यमिदं[१]। यद्यपि दीक्षितस्योदाहरणेऽस्मिन्विषं भुंङ्क्ते एव समर्थोऽस्ति। तथापि तथायुक्तमित्यस्य संघटनां दर्शयितुं तथा च भाष्यस्य 'तर्हि अन्यत्करिष्यामीत्यन्यत्करोति तदुदाहरणम्' वाक्यस्यास्य संगत्यर्थं 'ओदनं भुञ्जानो' इदमप्यंशंयोजितवानस्ति। यथा भोजनक्रियया संश्लिष्टमोदनं कर्म तथैव तया क्रियया सम्पृक्तं विषमपीप्सितं कर्म। अन्यं कार्यं सम्पादयन्नन्यं कार्यं सम्पादयतीत्यर्थोऽस्ति। 'ग्रामं गच्छन् तृणं स्पृशति' इति वाक्ये भिन्ने क्रिये तृणञ्चानीप्सितं कर्म। हेलाराज एतादृगुदासीनंकर्मणोऽपीप्सित साधयति यत् तृण-वृक्षमूलानि प्रथममनीप्सितान्यपीदानीं स्पर्श वेलायामीप्सितान्येव सन्ति। अन्यथा न स्पर्श न क्रियाया विषयाणि। श्रमपरिहारार्थं मनोविनोदाय वानीप्सितानि वस्तूनि ताभिः क्रियाभिर्व्याप्यन्ते। व्याप्तत्वादिमान्यपीप्सितानि भवन्ति[२]। दार्शनिक दृष्ट्या ईप्सितानीप्सितयोर्भेदयोरपस्तरणेऽपि व्यवहारतः पाणिनितन्त्रे सर्वे आचार्या भेदौ स्वीकृतवन्तः। मुख्यतोऽनयोरेव द्वयोःसूत्रयोरुपरि कर्मणो महान् प्रासादो निर्मितो जातः। यद्यपि पाणिनिः सूत्रान्तरैरपि कर्मसंज्ञाया विधानं कृतवान्तथापि परवर्तिन आचार्या (विचारकाः) ईप्सितस्यांशिकञ्चानीप्सितस्य विवेचने दृष्टिं योजयन्ति।

१. तत्त्वबोधिनी – पृ. ४०९।

२. द्रष्टव्य – हेलाराज ३/६/८० पृ. २९६।

**जयन्तभट्टस्यापत्तिः —**

जयन्तभट्टेन न्यायमञ्जर्यां[1] कर्मणः क्रियया सम्पाद्यत्वं स्वीकृत्य, तच्च फलरुपत्वमिति व्यवस्थापयन् तस्य कारकत्वं खण्डितम् वर्तते। क्रियया व्याप्तं क्रियमाणेषु पदार्थेषु इष्टतमस्यार्थस्तु फलमेव भवितुं शक्नोति। तदेवोक्तम् जयन्तभट्टेन "क्रियासम्पादकं हि कारकमुच्यते"। "क्रियासम्पाद्यन्तु फलं भवति न कारकम्"। कारकं च क्रियया चाप्तुमिष्टतममिति च विप्रतिषिद्धम् इति। तच्चेतदर्थं कारकं भवितुन्न शक्नोति यत् क्रियासम्पादकत्वरूपो धर्मः कारकस्य विशेषता वर्तते। क्रियासम्पादकत्वरूपो धर्मस्तु फले नास्ति। यतो हि फलन्तु क्रियासम्पाद्यं भवति। कोऽपि पदार्थः एकस्मिन् एव समये जन्यः जनकश्चेत्युभयं भवितुं न शक्नोति। जयन्तभट्टस्तु कर्मणः क्रिया-जन्यत्वरूपं मनुते न फलाश्रयत्वरूपमिति एतेनैव सर्वेयं भ्रान्तिः समुत्पन्ना।

**पुरुषोत्तमद्वारा समाधानम् —**

एतादृशीमेव शङ्कां कारकचक्रनामके ग्रन्थे पुरुषोत्तमदेवः अपि समुत्थापितवान्। किन्तु जयन्तभट्टस्य विपरीतम् तत्समाधानमपि तेन कृतं वर्तते। ते पूर्वपक्षरूपेण कथयन्ति यत् कारकं हि क्रियानिमित्तं भवति किन्तु कर्म स्वयं क्रियया साध्यं भवति। अत एव तच्च कारकं साध्यं साधनञ्चेत्युभयं कथं भवितुं शक्नोति। अस्यैव विस्तृतव्याख्यानम् तैः कैश्चित् श्लोकैः प्रकटीकृतं वर्तते। यथा—

'निवर्त्यकारकं नैव क्रियां तस्य हि साधिका।
विकार्यमपि भावेन विरोधानैव कारकम्'।।
'प्राप्यत्वात्पूर्विकावस्था न सा कर्म बुधैर्मता।
प्राप्यावस्था क्रियासाध्या साध्यत्वात्साधनं न हि'।।
'आत्मलाभे हि भावानां कारकापेक्षिता भवेत्।
लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव हि'।।

१. 'क्रियासम्पादकं हि कारकमुच्यते। क्रियासम्पाद्यं तु फलं भवति, न कारकम्। कारकं च क्रियया चाप्तुमिष्टतममिति च विप्रतिषिद्धम्'। -तत्रैव, पृ.३८३

तत्समाधानरूपेण वक्तुं शक्यते यत् कर्ता क्रियाद्वारा यं प्राप्तुमिच्छति तदेव कर्म। अत एव सर्वेषु कर्मसु स्वगतव्यापारस्तु भवत्येव। तद्व्यापारस्य क्रियायाश्च अपेक्षाद्वारा तस्य कारकत्वं सिद्ध्यति।। इति।।

यः पदार्थ उत्पन्नो भवति सः पदार्थः उत्पत्तिमत्क्रियां प्रति कर्ता सन् अनन्तरं कर्म भवति। (कटं करोति = कटमुत्पद्यमानमुत्पादयति) "भवति" इत्यस्य प्रयोगे यः कर्ता वर्तते स एव "करोति" इति प्रयोगे सति कर्म भवति। यथा - करो भवति = कटं करोति (भवत्यर्थस्य यः कर्ता करो तेः कर्म जायते – (कारकचक्र, पृ १०६)।

यद्ययं कटः अनुत्पत्तिधर्मवान् स्यात् तदा कर्ता तं नोत्पादयितुं शक्नोति स्म। पुरुषोत्तमदेवः एतदनन्तरम् कथयति यत् कर्मणि स्वगतक्रियायाः कर्तृत्वम् = सम्पादकत्वम् अवश्यं स्वीकर्तव्यम्। अन्यथा "कर्मवत्कर्मणा तुल्यक्रियः" (पा.सू. ३-१-८६) इदं सूत्रं निरर्थकं स्यात्। सूत्रेऽस्मिन् कर्तृभूतस्य कर्मणः कर्मवाच्यस्य समानरूपं विहितं वर्तते। यथा – "पच्यते ओदनः" स्वयमेवात्र ओदनकर्मणि यदि स्वगतक्रिया न स्यात् चेत् क्रियारहितस्थितौ तस्य कर्तृत्वसामर्थ्यमपि न स्यात्। एवञ्च न तत् कर्म भवेत्, न हि कर्मवद्भाव एव उपपन्नो भवेत्।

अनेनेदं सिद्ध्यति यत् कर्मणि अपि स्वगतक्रिया भवति, येन प्रयुज्यमान-क्रियायाः अपेक्षया साध्यं सदपि स्वगतक्रियायाः अपेक्षया तत् साधकमपि भवति। अतः तस्य कारकत्वे न कोऽपि दोषो विद्यते।

**मीमांसादर्शने कर्मविचारः —**

मीमांसादर्शनेऽपि कर्मणः क्रियासाध्यत्वं स्वीकृतं वर्तते। पार्थसारथिमिश्रेण स्वरचित "शास्त्रदीपिका" इत्यस्मिन् ग्रन्थे मीमांसासूत्रस्य (२/१/१२) व्याख्यानं कुर्वन् पाणिनेः उपर्युक्तसूत्रद्वयोः अनुरोधेन साध्यत्वस्य द्वितीयार्थत्वं स्वीकृतं वर्तते।[१]

१. 'स्मृत्या साध्याभिधायित्वं द्वितीयायाः प्रतीयते। कर्तुर्यदीप्सितं यच्च तथायुक्तमनीप्सितम्।।
तत्कर्म तद् द्वितीयार्थ इत्येवं पाणिनेः स्मृतिः।
बलीयसी च साचारात्प्रयोगश्चाति तादृशः'।।
— शास्त्रदीपिका, निर्णयसागरप्रेस, १९१५, पृ. १०९

शबराचार्येण अस्मिन् स्थले "सक्तून् जुहोति" (तै.सं.३/३/८/८) इत्यस्योदाहरणं दत्वा द्वितीयायाः अर्थः स्पष्टीकृतः। यद्यपि स्थलेऽस्मिन् कर्मत्वस्य स्थाने करणपरिणामः कर्तव्य इति चर्चा उत्थापिता वर्तते।

अस्मिन् विषये भट्टमतस्य गुरुमतस्य च भेदो दृश्यते।[१] भट्टसम्प्रदायस्य विवेचनं व्याकरणशास्त्रे बहूद्धृतं वर्तते। तन्मतानुसारेण भूतपदार्थः साध्यस्य भव्यस्य वा उपयोगार्थं कथितः। विधेः सर्वत्र प्रधानत्वे न यत्र कुत्रापि द्रव्यस्य कर्मणा सह सम्बन्धो भवति। द्रव्यं गुणभूतं बुध्यते चेत् कर्म (क्रियाम्) प्रधानभूतं बुध्यते। "सक्तून् जुहोति" अस्मिन् विधिवाक्ये प्रधानकर्म होम वर्तते। सक्तुनामकं भूतद्रव्यमप्रधानम् वर्तते। अप्रधानं गुणभूतं वा समानार्थकम्। अस्माभिः एतत् वक्तुं न शक्यते यत् होम सक्त्वर्थम् वर्तते अपितु सक्तुरेव होमार्थं वर्तते। सक्तोः होमस्य च इत्युभयोरपि परस्परसम्बन्धस्थापनमेव द्वितीयायाः कार्यं वर्तते। अन्ततो गत्वा होमार्थम् साधकत्वेन सक्तुषु तृतीयाविभक्तेः विपरिणामं कृत्वा "सक्तुभिर्जुहोति" अर्थात् सक्तुभिर्होमं भावयेत् इत्यस्मिन् रूपे वाक्यार्थः क्रियते।

भूतभाव्युपयोगे भव्येन = साध्येन इष्टस्य बोधो भवति।

सिद्धपदार्थान्तर्गतं संस्कार्यद्रव्यं स्थाप्यते यथा – "व्रीहिनवहन्ति" इत्यस्यार्थस्तु अवहननेन व्रीहीणां भावना कर्तव्या, अर्थात् "अवहननेन व्रीहीम् भावयेत्" इति।

सत्यमिदं वर्तते यत् व्रीहिः सिद्धपदार्थः अस्ति, तथा क्रियायाः साधनभाष्ये तथाऽपि तस्मिन् द्वितीयाविभक्तेः साध्यत्वार्थस्तु वर्तत एव। "सक्तून् जुहोति" इत्यत्र हवनकर्मणः सत्वेन अन्या स्थितिः। किन्तु इदं साध्यत्वं भाव्यार्थे नास्ति, अस्यार्थस्तु संस्कार्यमात्रम्। शब्दान्तरे यथा कस्यचन वस्तुनः स्वच्छीकरणेन तस्मिन् वस्तुनि निर्मलतारूपः संस्कारः आगच्छति, तथा तद्-अपरसामान्योद्देश्यस्य सिद्ध्यर्थम् उपयुक्तं भवितुं शक्नोति। तनैव प्रभावेण व्रीहीणामवहननेन तत् संस्कृतं क्रियते, येन तत् अदृष्टविशेषस्य साधनं भवितुं शक्नुयात्। तदेवोक्तम् यत् "यद्यपि व्रीहयः सिद्धा एव क्रियायाः साधनानि च तथापि अदृष्टविशेषसाधनत्वरूपसंस्कार्यत्वमेवात्रं साध्यत्वं बोध्यम् इति"। (ल.म., पृ. सं. १२२६)

(ख) सक्तूनां तु भूतभाव्युपयोगरहितत्वान्न समीहितत्वमस्ति।

— शास्त्रदीपिका, पृ. ११०

**संस्कारद्रव्यम् —**

सक्तुविधौ संस्कार्यद्रव्याभावेन अस्य विभक्तिव्यत्ययकरणम् अनिवार्यं विद्यते। व्रीहेः संस्कार्यत्वेन द्वितीयायाः अर्थे काऽपि असङ्गतिः नास्ति।

अनेन प्रकारेण द्वितीयार्थसाध्यत्वं शक्तिविशेषरूपेण अथवा कर्मत्वशक्तिरूपेण गृहीतं वर्तते।

मीमांसकानां तावत् एतादृशकथनेन पूर्वोक्तस्य जयन्तभट्टस्य पुरुषोत्तमदेवस्य च विवेचनेषु क्रियासाध्यं कर्मणः उपजीव्यं विद्यत इत्यनुमीयते। मीमांसकानां खलु अस्य विवेचनस्य संक्षिप्तरूपम् वैयाकरणभूषणसारे (पृ. ११४५) परमलघुमञ्जुषायां (पृ. १२२५-६) चापि समाविष्टं वर्तते। परन्तु उभयोः मध्ये किञ्चित् विभिन्नं विद्यते, अर्थात् उपयोः मतयोः निष्कर्षेषु अन्तरं विद्यते। भूषणकारस्तु साध्यत्वस्य शक्तिविशेषं स्वीकृत्यापि कर्मत्वशक्तेः वाच्यत्वं स्वीकरोति।

असंगतिरियं विद्यते यत् – कर्मणि द्वितीयानियमस्य स्वीकरणं तथा साध्यत्वस्य द्वितीयार्थत्वस्वीकरणञ्चेति द्वयं न सम्भवति। तदपि तदा सम्भवति यदा "सक्तून्" इत्यत्र करणार्थकद्वितीयाऽपि सम्भवोऽस्ति।

आचार्यः नागेशस्तु एतत् परिहरति यत् – इदं सर्वमपि कार्यं वेदेष्वेव भवति न तु लोके। तेषामयं भावः –

वेदे कर्मत्वशक्तिः प्रागुक्तसंस्कार्यत्वसमानाधिकरणैव इत्येतावता तस्य (संस्कार्यत्वस्य) द्वितीयार्थत्वम् इति। (ल.म., पृ.सं. १२२६) अर्थात् वेदेषु कर्मत्वशक्तिः अदृष्टविशेषस्य साधनत्वेन संस्कारद्रव्यं भवति। तस्यैव खलु समानाधिकरणं भवति। द्वितीयार्थस्य इदमेव स्वरूपं वर्तते।। इति।।

## नव्यन्याये कर्मलक्षणं तथा तस्यालोचना

इदानीं खलु नव्यन्यायाचार्यैः विवेचितस्य कर्मत्वस्य निरूपणं क्रियते। यतो हि नव्यव्याकरणे पूर्वपक्षरूपत्वेन बहूनि मतानि उद्धृतानि सन्ति। सामान्यतः नैयायिकानां कर्मविषये बहूनि लक्षणानि दृश्यन्ते।

### (१) करणव्यापारविषयः कर्म ::—

न्यायसिद्धान्तमञ्जर्याः "न्यायसिद्धान्तदीपः" इति टीकायां शशधरेण अस्य स्थापना कृता वर्तते।[१] नव्यवैयाकरणैरपि कर्मविषयकस्य खलु न्यायमतस्य प्रतिपादनं कुर्वन् अस्मिन् विषये चर्चा कृता वर्तते।[२]

करणकारकस्य व्यापारविषयत्वार्थस्तु वर्तते यत् कर्मकारकं करणद्वारा उत्पद्यमानक्रियायाः अनुकूलव्यापारस्य विषयो विद्यते। "दात्रेण धान्यं लुनाति" इत्यत्र दात्रं करणं वर्तते। तेन उत्पद्यमानभवन - क्रियायाः अनुकूलसंयोगरूपव्यापारस्य आश्रयो धान्यं वर्तते। अत एव तत् कर्म विद्यते। क्रियानुकूलव्यापारस्य करणजन्यत्वमनिवार्यमेव।अन्यथा उक्तव्यापारस्य आश्रयः न केवलं कर्मैव स्यात् अपि तु कारणस्य एवं कर्तुरपि सौभाग्यम् इदं प्राप्तं स्यात्। कर्मातिरिक्तं करणं कर्ता च इत्युभयत्र तु क्रियानुकूलव्यापारस्तु तिष्ठत्येव। "करणजन्यत्वम्" इति विशेषणपददानेन अतिव्याप्तिरियं समाप्ता भविष्यति। यतः करणजन्यसंयोगादिव्यापारः कर्मणि एव तिष्ठति।

लक्षणेऽस्मिन् प्रधानदोषस्तु अयं वर्तते यत् केनचन कारणान्तरेण उत्पाद्या क्रिया व्यापारस्य आश्रयप्रस्तुतकरणेऽपि अतिव्याप्तिः भवति। "दात्रेण धान्यं लुनाति" इत्यत्र छेदनक्रियायाः अनुकूलहस्तकरणेन उत्पाद्यस्य हस्तसंयोगरूपव्यापारस्य आश्रयस्तु दात्रमपि वर्तते। तस्याऽपि कर्मत्वम् स्वीकर्तव्यं स्यात्।[३]

---

१. द्रष्टव्य – न्यायकोश, पृ.२०८, २१३–४

२. करणव्यापारवत्त्वम् – कारकचक्र में व्यापार्यत्वम्, कारकवाद में व्यापारित्वम्– **इस प्रकार पाठभेद भी** – प.ल.म.पृ. १७५

३. तच्च दात्रेण लुनातीत्यादौ हस्तादिकरण–व्यापार्ये दात्रेऽतिव्याप्तम्। –कारकचक्र,पृ.१९

## (२) क्रियाजन्यफलशालित्वं कर्मत्वम् ::—

कर्मणः लक्षणमिदं प्राचीन-नैयायिकानां नाम्ना अनेकेषु स्थलेषु निर्दिष्टं वर्तते। यद्यपि आचार्यः भवानन्दस्तु अस्य प्रतिपादनम् स्वकीय "कारकचक्र" नामके ग्रन्थे नैव करोति।

क्रियाजन्यफलशालित्वं कर्मत्वमिति कर्मलक्षणं व्युत्पत्तिवादनामके ग्रन्थे आचार्येन गदाधरेण विस्तृतं व्याख्यानं कृतं वर्तते। तदुक्तम् —

कर्मत्वं न क्रियाजन्यफलशालित्वं तत्र च क्रिया धातुतः एव लभ्यते, जन्य-जनकभावस्य च विनैव पदार्थत्वम् संसर्गमर्यादया भानं सम्भवतीति फलमात्रं कर्मप्रत्ययार्थः (व्युत्पतिवादः, द्वितीयकारके)

किन्तु अन्ते "इति प्राचीनपथपरिष्कारप्रकारः" इत्युक्त्वा अनेन स्वस्य अरुचिः प्रदर्शिता। एवं च लक्षणान्तरमेव स्वीकर्तव्यमिति तन्मतम्।

भूषणसारे नैयायिकानां मतानुसारम् तथा परमलघुमञ्जुषायां तार्किकाणां पूर्वपक्षत्वेन लक्षणमिदम् उद्धृतं वर्तते।

नव्यन्यायमते कारकविषयकव्युत्पत्तिवादनामके ग्रन्थे द्वितीयाकारकस्य प्रारम्भे कर्मलक्षणस्य विवेचनं वर्तते। अत एव लक्षणमिदं सर्वैरपि नैयायिकैः सम्मतं लक्षणं स्वीक्रियते। अत्र नव्यन्याये कर्मविवेचनस्य आधारशीलेयं वर्तते यत् धातोरर्थः व्यापार इति स्वीकुर्वन् क्रियायाः बोधोऽपि धातुतः एव क्रियते। तदेवोक्तं व्युत्पत्तिपादे आचार्येण "तद्धात्वर्थतावच्छेदकतावच्छेदकफलशालित्वमेव तद्धातुकर्मत्वम्" इति। अत एव धात्वर्थरूपव्यापारेण उत्पाद्यफलाश्रये एव कर्म उच्यते। "ओदनं पचति" इत्यादिस्थले अस्य संघटनं सम्यक्प्रकारेण भवितुं शक्नोति।

गदाधरेण लक्षणस्यास्य पूर्णं विश्लेषणं कृत्वा प्राचीनाचार्याणां श्रद्धया प्रायः समर्थनमेव कृतमस्ति। परन्तु न्यायमतदृष्ट्या अत्र दोषः प्रदर्शयन्ति वैयाकरणाः। "ग्रामं गच्छति" इत्यत्र गमनक्रियया उत्पद्यमानसंयोगरुपफलस्य आश्रयः न केवलं ग्रामे अपितु कर्तरि अपि तत्संयोगो विद्यते। यतो हि संयोगः कश्चन सम्बन्धरूपः गुणश्च। स च द्विष्ठः अत एव स संयोगः पदार्थरुपे कर्तरि ग्रामकर्मणि च

समानरूपेण वर्तते। अतः लक्षणमिदम् एतादृशोदाहरणेषु कर्म व्याप्तं कुर्वन् कर्तारमपि व्याप्नोति। संयोगरूपफलस्य सम्बन्धिद्वये (कर्मणि कर्तरि च) समानरूपेण अवस्थितत्वात् एव "चेत्रश्चेत्रं गच्छति" इत्येतादृशी असंगतिः स्यात्। अत्र चेत्रः गमनक्रियायाः कर्ताऽपि वर्तते एतञ्च संयोगरूपफलस्य आश्रयतया कर्माऽपि वर्तते। वस्तुतोऽतेन न कस्याऽपि अर्थस्य निष्कर्षो भवति। पाणिनिव्याकरणस्य आश्रयं गृहीत्वा अस्याः आपत्तेः परिहारः कर्तुं शक्यते। यथा फलाश्रयत्वं ग्रामस्य वर्तते तद्वत् चेत्रोऽपि चेत्रस्यापि फलाश्रयत्वं वर्तते। किन्तु परसूत्रागमिनी कर्मसंज्ञाम् कर्तृसंज्ञा रुणद्धि। द्वितीयाविभक्तेः यदि ग्रहणं तदा तस्य संज्ञा नियामिका भवति। यत्किमपि भवेत् अस्य लक्षणस्य याथातथ्यं एतदनन्तरलक्षणे कृतं वर्तते।

## (३) परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वम् ::—

गंगेशोपाध्यायद्वारा रचितग्रन्थे भूषणसारे लघुमञ्जुषायाञ्चेत्यादौ ग्रन्थे पूर्वपक्षत्वे न खलु विवेचितलक्षणस्य पूर्वलक्षणस्य दोषाणां समुचितः परिहारः भवति। एतदनुसारम् क्रियया जन्यं फलं कर्म धारयति। "ग्रामं गच्छति" इत्यादौ ग्रामः कर्म विद्यते, कर्ता चान्यः कश्चन रामादिः। अत्र ग्रामस्य कर्मत्वे साधयति यत् क्रिया ग्रामात् भिन्ने कस्मिंश्चित् कर्तरि समवेता विद्यते। कर्तरि कर्मत्वस्यातिव्याप्तिः न सम्भवति यतो हि कर्ता गतिक्रियायाः संयोगरूपं फलं प्राप्नोति सा क्रिया परसमवेता नास्ति अपितु कर्तृभूते रामे स्वसमवेता वर्तते। अनेन "चेत्रश्चेत्रं गच्छति" इत्यादिप्रयोगाणां खलु आपत्तिः नास्ति।

अत्रेदं ज्ञातव्यम् ग्रामनिष्ठसंयोगस्य चैत्रेऽपि विद्यमानत्वात् "ग्रामं गच्छति" इतिवत् "चेत्रश्चेत्रं गच्छति" "चेत्रः स्वं गच्छति" इत्यादिप्रयोगः स्यादेवेति तद्वारणाय परसमवेतत्वमपि द्वितीयार्थो बोद्धव्यः।

लक्षणेऽस्मिन् बहुविधाः आपत्तयः समुत्थापिताः सन्ति। प्रथमस्तावत् भवानन्द आक्षिपति यत् गम्धातोरर्थः संयोगावाच्छिन्ना क्रिया वर्तते। तज्जन्यविभागत्वेन फलं प्रकटयति। अतः "मठात् वनं गच्छति" इत्यादिषु उदाहरणेषु विभागरूपं फलं मठस्य प्राप्तत्वात् तस्याऽपि कर्मसंज्ञा प्राप्नुयात्। अन्यच्च पत्धातोः अर्थः अधस्संयोगा-वच्छिन्ना क्रिया वर्तते। येन विभागरूपफलोत्पन्नं भवति। फलतः "पर्वताद् भूमिं पतति"

इत्यत्र विभागरूपं फलं पर्वते वर्तते, अतः तत्र कर्मसंज्ञा भवति। यदि पत्धातोः अकर्मकप्रयोगः स्यात् तदा "पर्णं पतति भूमौ" इत्यत्र फलस्य व्यापारस्य च कर्तरि एव विद्यमानत्वात् अर्थात् एकनिष्ठत्वात् उत्तरदेशभूमेरपि कर्मत्वप्रसङ्गः। तत् न समीचीनम् अकर्मकक्रियायाः कर्मणश्चोभयोरपि उपस्थितिः व्याधाता अस्ति। पुनः त्यज्धातोरर्थः विभागावच्छिन्नव्यापारः तत्फलं संयोगोऽस्ति। अस्य फलस्वरूपं एतत्प्रयोगे उत्तरदेशस्य कर्मत्वम् स्वीकर्तव्यम्, यतः त्यागक्रियायाः फलं तस्यैव भवति। अनेन प्रकारेण स्पन्दधातोः संयोगः विभागश्चोभौ फलस्वरूपौ। यदि अस्य धातोः विभागरूपमेव फलं स्वीक्रियते तदा पूर्वदेशे अतिव्याप्तिः। अत्र पूर्वदेशः कर्म भवति। यदि च संयोगरूपमेव फलं स्वीक्रियते तदा उत्तरदेशस्य कर्मत्वं स्वीकर्तव्यम्। एवं च उभयथाऽपि दोषत्वात् लक्षणमेव व्याहन्येत।[१]

एतावदाक्षेपेः अपि भावानन्दः पुनः कथयति यत् "तीरे नदी वर्धते" अस्मिन् वाक्ये वृद्ध्यर्थो वर्तते अवयवानामुपूचयः। अत्र विद्यमानायाः क्रियायाः परम्परासम्बन्धेन = स्वसमवायिसंयोगसम्बन्धेन संयोगरूपं फलं तीरे वर्तते। अत्र स्वं = नदी तत्समवायी = जलविन्दुः तत्संयोगः तीरेण सह वर्तते। अवयवानामुपचयेन उत्पन्नस्य संयोगरूपफलस्य आश्रयः नद्याः तीरम् विद्यते। यस्मिन् उपर्युक्तलक्षणानुसारेण कर्मत्वस्य प्रसक्तिः स्यात्।[२]

लक्षणेऽस्मिन् "पर" शब्दार्थविषयेऽपि बहुशः शङ्का उत्पद्यन्ते। "पर" शब्दस्य सामान्यार्थस्तु भिन्न इति। पुनः शङ्का भवति कस्मात् भिन्नः? कर्मतः फलाश्रयतो वा? यद्यत्र कर्मभिन्ने पदार्थे कर्तरि वा समवेवक्रियाजन्यफलशालित्वम् इत्यर्थः गृह्यते तदा विचित्रासङ्गतिः स्यात्। कर्मणः लक्षणे यदा कर्मणः ज्ञातपूर्व-पदार्थत्वेन गृह्यते चेत् तल्लक्षणस्य औचित्यमेव न प्रतीयेत। एवञ्च अन्योऽन्याश्रयः दोषः स्यात्। यतोहि लक्ष्यभूतकर्मपदार्थस्य ज्ञानाय कर्मणः ज्ञानं कृत्वा तद्भिन्नपदार्थस्य

१. 'गमिपत्योः पूर्वस्मिन्देशे, त्यजेश्चोत्तरस्मिन्देशे, स्पन्देः पूर्वापरयोश्च कर्मत्वप्रसङ्गात्'
— कारकचक्र, पृ. १९

२. "एवं 'तीरे नदी वर्धते' इत्यादौ वृद्धेरवयवोपचयस्य परम्परया तीरप्राप्तिफलकत्वात् तज्जन्यफलाश्रये तीरेऽति व्याप्तेः।" — का.च.पृ. २०

ज्ञानं कर्तव्यं स्यात्। अन्यच्च प्रतिपाद्यवस्तुनः प्रतिपादनं तद्भिन्नत्वाभावत्वेन अनुचितम्। अतः कर्मणः लक्षणे "कर्मभिन्नः" इति शब्दस्य प्रयोगः असंगतो विद्यते।

अत्र फलाश्रयात् भिन्नेऽर्थे परशब्दस्य ग्रहणं कृत्वा अयमर्थः स्वीक्रियते यत् फलाश्रयात् भिन्ने वस्तुनि समवेतक्रियातः उत्पाद्यफलवत् कर्म अस्ति चेत् इयमापत्तिः भवेत् यथा फलाश्रयात् भिन्नत्वाभावे देवदत्तः कर्म नास्ति तद्वत् ग्रामोऽपि कर्म भवितुमेव न शक्नुयात्। उभावयो गमनक्रियाजन्यं संयोगरूपफलं धारयतः।[1]

आचार्यः नागेशस्तु पूर्वपक्षत्वेन अस्मिन् लक्षणे "परसमवेतम्" इत्यंशस्य व्याख्याने "पर" इति शब्दस्यार्थः द्वितीयाविभक्तेः प्रकृत्यर्थतः भिन्नत्वमिति स्वीकरोति। "तत्र द्वितीयया स्वप्रकृत्यर्थापेक्षया परत्वं बोध्यते" इति। लघु. म. पृ. १२२२

द्वितीया कर्मणि जाता। अतः अत्राऽपि कर्मभिन्नत्वस्य परत्वस्य च न कोऽपि भेदः। यद्यपि शब्दानां परस्परं भिन्नत्वं प्रतीयेत। वस्तुतः उभौ समानौ। बालम्भट्टः अस्य व्याख्याने स्पष्टीकृतवान् यत् कर्मभिन्ने कर्तरि समवेतमिति।[2]

## (४) तत्क्रियानाश्रयत्वे सति तत्क्रियाजन्यफलशालित्वं कर्मत्वम् ::—

पूर्वोक्तपरत्वासंगतेः रक्षार्थं नैयायिकैः स्वीकृतमिति लक्षणं तन्त्रसम्प्रदाये अनन्तरं स्वीकृतं वर्तते।[3] एतदनुसारम् कर्तुः समानं प्रकृतक्रियायाः अनाश्रयत्वात् तत्क्रियाजन्यफलस्य आश्रयो भवति तदेव कर्म उच्यते। कर्ता गमनक्रियायाः संयोग-रूपफलं कर्मवदेव प्राप्नोति एतावता कर्ता कदाऽपि कर्म भवितुं न शक्नोति, यतो हि कर्ताऽपि गमनक्रियायाः अपि आश्रयो विद्यते। यदि कर्ता कर्म उच्यते तदा कर्त्रा क्रियाश्रयत्वाभावेन भाव्यम्।

एतल्लक्षणानुसारं कर्तुः वारणन्तु सम्भवति, किन्तु कारकान्तरस्य कर्मत्वे अस्माभिः न किमपि कर्तुं शक्यते। "पर्वतादवरोहति" इत्यत्र लक्षणस्यास्य दुर्बलत्वं

---

१. व्या. द. इ., पृ. २७२ पृष्ठे विवेचितम्।

२. 'तथा च चैत्रो ग्रामं गच्छतीत्यादौ चैत्ररुप–ग्रामान्यनिष्ठ–क्रियाजन्य–धात्वर्थतावच्छेदक –संयोगरुप–फलशालित्वाद् द्वितीया'। — तत्रैव, कलाटीका

३. व्या० द० इति०, पृ. २७२ पृष्ठे उद्धृतम्।

ज्ञायते। अत्र स्पन्दनरुपक्रियाया: आश्रयत्वं पर्वतो नास्ति। एवं च क्रियाजन्यविभागरूपफलस्य आश्रयत्वं पर्वतो वर्तते तथा च तत्क्रियानाश्रयत्वे सति तत्क्रियाजन्यफलशालित्वं पर्वते वर्तते। एवं च पर्वतस्य कर्मत्वप्रसङ्गापत्ति: अर्थात् कर्मलक्षणस्य अपादानादिकारकेषु अतिव्याप्ति:।[१] अव्याप्तिदोषवारणाय कालापसम्प्रदाये लक्षणस्य परिष्कारं कुर्वन्ति यत् "तत्क्रियानाश्रयत्वे सति धात्वर्थावच्छेवकीभूततत्क्रियाजन्यफलशालित्वं कर्मत्वमिति"। अत्र धात्वर्थस्यावच्छेदकत्वरूपे क्रियाफलस्य प्रदर्शनं कृतं वर्तते, यच्च अत्यन्तं महत्वपूर्णं विशेषणं वर्तते। अस्य प्रतिपादनन्तु नेयायिकानां अग्रिमे कर्मलक्षणे जातमस्ति।

## (५) धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम् ::—

आचार्य: भवानन्द: लक्षणस्य व्याख्यानं स्वग्रन्थे सिद्धान्तपक्षत्वेन उपस्थापयति।[२] व्युत्पत्तिवादकर्तु: गदाधरस्य मतेऽपि लक्षणमिदं नव्यनैयायिकानां सिद्धान्तत्वेन विवेचितं वर्तते।[३]

प्रत्येकं धातौ शक्ति: अवश्यं तिष्ठति। (तस्या: शक्ते:) धात्वर्थतारूपेण वर्तते। धात्वर्थरूपविशेष्यस्य फलावच्छिन्नव्यापार: विशेषणं विद्यते। तेदवोक्तं भूषणसारे धात्वर्थतावच्छेदकमिति। फलावच्छिन्नव्यापारस्य धात्वर्थत्वमिति वादिनां मतेनेदम्। तथा च तन्मते धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं द्वितीयार्थ:[४] इति।

धात्वर्थस्य फलावच्छिन्नव्यापारत्वेन स्वीकरणे धात्वर्थतावच्छेदकम् इत्यस्य स्थाने केवलं "धात्वर्थ:" इत्यपि वक्तुं शक्यते, यथा नागेशभट्टेन मञ्जुषायाम् नैयायिकानां मतस्थापनसमये वर्णितमस्ति।

१. द्रष्टव्यम् – तत्रैव।

२. का.च. , पृ.२०।

३. द्रष्टव्यम् – व्युत्पत्तिवाद:, पृ. १३०, प.ल.म., पृ. १७६। ल.म. पृ. १२२२ ........ .................... 'यत्तु परसमवेतक्रियाजन्यधात्वर्थफलाश्रयत्वं कर्मत्वम्'।

४. 'धात्वर्थतावच्छेदकत्वमिति। फलावच्छिन्नव्यापारस्य धात्वर्थत्वमिति वादिनां मतेनेदम्। तथा च तन्मते धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं द्वितीयार्थ:'।

– वै. भू. सा., दर्पण, पृ. १४१

गम्धातोः पत्धातोश्च प्रयोगे पूर्वदेशे अतिव्याप्तिः, अर्थात् कर्मत्वप्रसक्तिरिति उक्तं वर्तते। लक्षणानुसारेण एतत् वक्तुं शक्यते यत् एतेषां धातूनां खलु अर्थः केवलं स्पन्दनं नास्ति, अपितु गम्धातोः उत्तरदेशसंयोगः फलं विद्यते। तथैव पत्धातोरपि अधोदेशसंयोगः फलमस्ति। अतः एतेषां धातूनां संयोगरूपफलस्य प्रवेशः केवलमुत्तरदेशे विद्यमानत्वात् पूर्वदेशे नातिव्याप्तिप्रसङ्गः।

गम्धातोः पत्धातोश्च संयोगानुकूलव्यापारः वाच्यार्थः विद्यते। यत्र संयोगः विशेषणं व्यापारश्च विशेष्यः। व्यापारे स्थितायाः विशेष्यताया अवच्छेदकं विशेषणरूपः संयोग एव विद्यते। न तु विभागः। कारणञ्चेदं वर्तते यत् विभाग न तद्धातुवाच्यः।[1]

एवमेव प्रकारेण विभागानुकूलव्यापारः त्यज्धात्वर्थः। अत्र व्यापारनिष्ठविशेष्यतायाः अवच्छेवकं विभागो विद्यते, न तु संयोगः। यतो हि संयोगः धातुवाच्यः अस्त्येव न।

फलतः "वृक्षं त्यजति खगः" इत्यत्र उत्तरदेशस्य कर्मत्वप्रसङ्गो नागच्छति। विभागाश्रयो वृक्षो वर्तते, तच्च कर्म भवत्येव। इदानीं खलु अपादानविषये विवेचना क्रियते यत् वृक्षस्य विभागाश्रयत्वात् न तदपादानम्। यतो हि विभागस्तु त्यज्धातोः वाक्यार्थो विद्यते। धातोः वाक्यार्थः यत्र विभागो नास्ति, यथा (गम्-पत् इत्यादि धातुनाम्) तत्रैव विभागाश्रयत्वस्य अपादानत्वमुच्यते[2]। यत्र च विभागः प्रकृतधातोः वाच्यार्थो विद्यते तत्र अपादानकारकस्य कर्मकारकस्य चोभयोः युगपत् प्राप्तत्वात् "अपादानउत्तराणि कारकाणि बाधन्ते" परिभाषयानया कर्मसंज्ञैव भवति।[3]

१. एवं च संयोगानुकूलव्यापारस्य गमिपत्यर्थत्वात् व्यापारनिष्ठविशेष्यतायाअवच्छेदकत्वं विशेषणीभूतसंयोगे एवास्ति, न तु विभागे। विभागस्य धातुवाच्यत्वाभावात्।

— प.ल.म., ज्योत्स्ना, पृ. १७६

२. 'ननु वृक्षं त्यजति खगः' इत्यत्र वृक्षस्य विभागरूपफलाश्रयत्वेनापादानत्वमस्त्विति चेन्न। अत्र हि विभागः प्रकृतधात्वर्थः। यत्र च विभागो न प्रकृतधात्वर्थस्तद्विभागाश्रयस्येवापादानत्वम्, यथा 'वृक्षात्पतती' त्यादौ।

— प.ल.म.पृ. १७७

३. भाष्य २, पृ. १०१

पत्‌धातोरर्थे यदि अधोदेशसंयोगरूपकर्मणः अन्तर्भाव्य (धात्वर्थेनोपसङ्ग्रहात्) अस्य अकर्मकत्वं क्रियते तदा "पर्णं वृक्षाद् भूमौ पतति" अस्य प्रयोगस्य अपि सुगमत्वं भवति[1]। अत्रोधोदेशसंयोगरूपफलस्य आश्रयतया विवेक्षितं विद्यते।

एवं प्रकारेण एतत्लक्षणानुसारेण स्पन्द्‌धातुना वृध्‌धातुना च फलावच्छिन्नव्यापारस्य बोधाभावत्वात् क्रमशः पूर्वापरदेशे तीरे च न कर्मत्वप्रसङ्गः। वस्तुतः इदं ज्ञातव्यमत्र प्रकृतधातवः खलु अकर्मकाः न तु सकर्मकाः। फलावच्छिन्नव्यापारस्य बोधो भवति चेत् स धातुः सकर्मकाः भवन्ति। तादृशावस्थायामेव कर्मत्वं सम्भवति अन्यथा न सम्भवति। "नदी तीरे वर्धते" "स्पन्दते" इत्यादयस्तु केवलं व्यापारबोधकाः न तु फलावच्छिन्नव्यापारबोधकाः। अतोऽत्र एते धातवः अकर्मकाः सन्ति।

भवानन्दः प्रश्नमुत्थापयति यत् "घटं जानाति" इत्यत्र ज्ञाधातुः न फलावच्छिन्नव्यापारबोधकः। एवं घटस्य कथं कर्मत्वं स्वीक्रियते? समाधानमत्रेदं वर्तते "ज्ञा-द्विष्-इष्-कृ" इत्यादिभिः धातुभिः सविषयकानां पदार्थाणां बोधो जायते। विषयितात्वेन विभक्त्यर्थ द्वारा पदार्थानामन्वयं स्वीकृत्य सकर्मकतायाः व्यवस्था कर्तुं शक्यते। परन्तु गौणसकर्मकत्वं भवत्यत्र[2]। विषयितारुपे विभक्त्यर्थोल्लेखः एवं जातः यत् केवलम् विभक्त्यर्थकथने आश्रयत्वरूपविभक्त्यर्थेन नामार्थस्य अन्वयबोधानन्तरं "भू" इत्यादिधातूनामपि सकर्मकत्वं स्वीकर्तव्यम्। विषयितारूपविभक्त्यर्थद्वारा अन्वयाभावेन यत्‌धातुः अकर्मकः। यद्यपि उद्देश्यतारूपविभक्त्यर्थद्वारा नामार्थस्यान्वयो जायते। यथा "भोजनाय यतते" "भोजनं यतते" इति प्रयोगः न भवति।

केषाञ्चनेदं कथनं वर्तते यत्‌धातुः सकर्मक एव वर्तते। किन्तु "मातुः स्मरति" इत्यत्र "अधीगर्थदयेशां कर्मणि" (पा.सू. २/३/५२) इत्यस्मिन् सूत्रे कर्मणः द्वितीया न भवति, अपितु षष्ठी भवति। एवमेव "भोजनाय यतते" इत्यत्र द्वितीयास्थाने चतुर्थी भवति[3]।

१. प.ल.म., पृ. १७६

२. कारकचक्र, पृ. २०

३. का.च., व्याख्या, पृ. २२

"पर्वतादवरोहति" इत्यत्र कालापकसुषेणद्वारा पूर्वोक्तलक्षणेन पर्वतस्य कर्मत्वप्रसङ्गागमनमिति आशङ्कोत्थापिता वर्तते, तस्याः परिहारोऽपि लक्षणमिदं करोति। उत्तरदेशसंयोगः अवरोहणक्रियायाः वाच्यार्थः न तु विभागः। पर्वताः कर्म नास्ति यतो हि संयोगरूपफलं पूर्वदेशे नास्ति। पतनक्रियायाः समानम् अस्य अकर्मकत्वसकर्मकत्वव्यवस्था भवति[१]।

यत् पूर्वोक्तं द्वितीयलक्षणं तत्र "चेत्रश्चेत्रं गच्छति" इति प्रयोगापत्तिः प्रदर्शितासीत्, तत्परिहारः लक्षणमिदं कर्तुं न शक्नोति।

भूषणसारे कथितं (पृ. १०२) यत् "भूमिं प्रयाति विहगो विजहाति महीरुहम्" इत्यत्र कर्मत्वोपपत्तिस्तु भवत्येव तत्साकं "आत्मानं त्यजति" इत्याद्यनिष्टाः प्रयोगाः अपि स्युः। अतः लक्षणे "परसमवेत" इति विशेषणदानमावश्यकं विद्यते। यतः गम्धातोः धात्वर्थरूपफलं चेत्रे वर्तते, अतः कर्मत्वापत्तिः भवितुमशक्नोत्। किन्तु चेत्रे यत् धात्वर्थफलं विद्यते तत् तत्स्वसमेवतव्यापारस्य फलं विद्यते।

पूर्वमेवोक्तं वर्तते प्रकृत्यर्थभिन्नः एव परशब्दार्थः। एवं प्रकारेण "परसमवेत" इति विशेषणं कर्मलक्षणं परिष्कारयति। स्वभिन्नसमवेतो यो धात्वर्थः तन्निष्ठं यद्धात्वर्थत्वं तदवच्छेदकीभूतधर्मवत्वं तत्क्रियाकर्मत्वमित्यर्थः। (कारकचक्र) व्याख्या पृ.२२।

एतत्लक्षणानुसारेण "भूमिं प्रयाति" इत्यत्र द्वितीयाविभक्तिमत्भूमिशब्दस्य अपेक्षयैव भिन्नत्वं प्रदर्श्यते – "भूमिभिन्नसमवेतभूमिवृत्तिसंयोगजनकस्यन्दानुकूलकृतिमान्" इति नैयायिकानां वाक्यबोधः।

"मल्लो मल्लं गच्छति" इति उभयकर्मजसंयोगस्थाने प्रयोगः क्रियते तद्वदेव "चेत्रश्चेत्रं गच्छति" अथवा "मल्लः स्वं गच्छति" इत्यादिप्रयोगाणामपि सम्भवो विद्यते। यदि "चेत्रः स्वं गच्छति" इति प्रयोगस्य वारणे कृते "चेत्रो द्रव्यं गच्छति" "मल्लो मल्लं गच्छति" इत्यादीष्टस्य प्रयोगस्याप्रमाण्यं स्यात्।

१. व्या. द. इ., पृ. २७३ ...... उद्धृत सुषेणमतम् क्रियावच्छेदकं यत्र फलं कर्त्रा विवक्षितम्। तदैव कर्मधातुश्च फलानुक्तावकर्मकः।।

मल्लद्वये स्थितायाः क्रियायाः प्रथमः प्रयोगः उपपन्नो भवति। एकस्मात् मल्लात् भिन्ने मल्लान्तरे समवेतक्रिया प्रथममल्ले स्थितं संयोगमुत्पादयति। अर्थात् अत्र गमनक्रिया न स्वसमवेता, अपितु परसमवेता विद्यते। किन्तु यदा चैत्रः मल्लो वा एकत्वसंख्या-विशिष्टो भवेत् तदा परसमवेतत्वस्य उपपत्तिः न भवितुं शक्नोति।

नैयायिकानां शब्दे परसमवेत क्रियायाः आश्रयत्वं स्वस्मिन् बाधितं भवति। अत एव "स्वं गच्छति" इत्यादयः प्रयोगाः न भवन्ति। अर्थात् मल्लान्तसमवेतक्रियायाः स्वनिष्ठसंयोगजनिकायाः स्वभिन्नसमवेतत्वेन तादृशाक्रियाश्रयतायाः = स्वनिष्ठ-संयोगजनकक्रियाश्रयतायाः स्वस्मिन् बाधात् मल्लः स्वं गच्छति इति प्रयोगो न भवति। यतो हि इदमवश्यं वर्तते यत् यत्र स्वस्य आत्मनश्च वा प्रयोगः "पूर्णस्वरुपः" इत्यर्थे अभूत्वा स्वगतभेदं प्रदर्शयन् तिष्ठति तत्र कर्मत्वस्योपपत्तिः भवति। यथा "आत्मानमात्मना वेत्सि"[१] अत्र कर्तुः कर्मणः करणस्य च त्रयाणामपि पृथक्त्वेन कल्पना विद्यते। एवं प्रकारेण सर्वदर्शनसंग्रहे बोद्धधर्मदर्शनविषयान्तर्गतं प्रारम्भे "यदि शिंशपा वृक्षत्वमतिपतेत् स्वात्मानमेव जह्यात्" इति प्रयोगो दृश्यते। अत्रात्मनः प्रयोगः सामान्यधर्मार्थे कृतोऽस्ति यत् शिंशपाभिन्नपदार्थरूपे विवेक्षितं विधते।[२]

आचार्यः नागेशः मञ्जुषायां कथयति यत् नैयायिकैः परिष्कृतलक्षणेऽस्मिन् "परसमवेत" इत्यस्य स्थाने "व्यापारानाधिकरणत्वे सति" इति विशेषणं स्वीकरोति। तात्पर्यमिदं वर्तते गमनक्रियायाः अधिकरणत्वेन "चैत्रश्चैत्रं गच्छति" इत्यत्र चैत्रः कर्म भवितुं न शक्नोति। चैत्रः कर्म तदा भवितुं शक्नोति यदा सम्बद्धव्यापारस्य अधिकरणं न स्यात्, तथा धात्वर्थतावच्छेदकरूपफलमपि धारयेत्।

नैयायिकानां खलु अन्तिमे कर्मलक्षणे नागेशः बहुप्रकारेणाव्याप्तिं प्रदर्शयति। केवलं गम्धातोरेव प्रयोगवत्सु त्रिषु वाक्येषु अस्य लक्षणस्य प्रवृत्तिः न सम्भवति चेत् अन्यवाक्यानां किम् कथनम्? - तत्र वाक्यत्रयं प्रतिपादयति (१) "काशीं गच्छन्

१. शरीरावच्छिन्नं कर्तृ, अन्तःकरणावच्छिन्नं करणं, निरवच्छिन्नं निरीहं कर्म।

— प.ल.म., पृ. १८४

२. सर्वदर्शनसंग्रह, पृ. ३१।

Smt. Hansa Mehta Library, M.S. University of Baroda

पथि मृतः” पूर्वेक्तिरूपेण गम्धातोः धात्वार्थतावच्छेदकं फलं संयोगरुपम् भवति। गमनवान् यः पुरुषः काशीन्तु न गतवान् अतः संयोगरूपफलस्य धारणं कर्तुमशक्यत्वात् “काशी” इति पदस्य कर्मसंज्ञा भवितुं न शक्नोति (२) “काशीं गच्छति, न प्रयागम्” इत्यत्र प्रयागः संयोगरूपफलं न धारयति। अतः तस्याऽपि कर्मसंज्ञा न भवति। (३) “ग्रामं न गच्छति” अस्मिन् निषेधवाक्ये ग्रामस्य संयोगाभावे न कर्मत्व लङ्काः[१] प्रसङ्ग।

परमलघुमञ्जुषायाम् (पृ. १२२२) नागेशः नैयायिकमतम् इषद् शब्दा-न्तरेण प्रकटयति – “परसमवेत क्रियाजन्यधात्वर्थफलाश्रयत्वं कर्मत्वमिति”। एतावतास्माभिः इदं ज्ञातं यत् क्रियायाः फलं धातुत एवज्ञायते। अत एव द्वितीयाविभक्तेः कर्मप्रत्ययस्य वा अर्थः आधेयत्वं तथा भेदं च स्वीकरोति। नागेशोक्तं मतमिदं प्रायः तत्वदीधितिकारस्य रघुनाथस्य विद्यते, यस्य निर्देशः भूषणसारे (पृ. १४२) हरिवल्लभेन क्रियते। भूषणसारस्य “काशिकाटीका” (पृ. ३७१) कारोऽपि हरिरामः एतद् मतं स्पष्टयति।

न्यायमतानुसारेणाधेयत्वस्यान्वयः फले विद्यते, यस्योपयोगः शाब्दबोधे दृश्यते। तथा भेदस्यान्वयः सामानाधिकरण्यसम्बन्धेन व्यापारे विद्यते। तदुक्तं मञ्जुषाकारेण नागेशेन – “तत्र क्रियाफलस्य धातुनेव लाभादाधेयत्वं भेदश्च द्वितीयार्थः। तत्र फले आद्यान्वयोऽन्त्यस्य सामानाधिकरण्येन व्यापारे” (ल.मञ्जुषा) पृ.१२२३ भेदे प्रकृत्यर्थस्तु प्राक्वत् अन्वेति। अतः “ग्रामं गच्छति चेत्रः” इत्यत्र न्यायमतानुसारेणायं शाब्दबोधो भवति – “ग्रामाधेयफलानुकूलग्रामभेद - समानाधिकरणव्यापारवान् चैत्रः” (ल.म. १२२३) हरिरामस्तु काशिकाकारः एवं कथयति यत् “ग्रामवृत्तिसंयोगजनको ग्रामप्रतियोगिकभेदसमानाधिकरणो यो व्यापारस्तदाश्रयश्चैत्रः” इति। (पृ.३७१) इदं ज्ञातव्यम् न्यायमते सर्वदा शाब्दबोधे प्रथमान्तार्थः मुख्यविशेष्यकः शाब्दबोधो भवति।

द्वितीयार्थस्य विश्लेषणेन कार्यद्वयं सरलतया परिहार्यते। (१) “चैत्रश्चेत्रं गच्छति” इत्यस्यापत्तिः। एवं “चैत्रो द्रव्यं गच्छति” “मल्लो मल्लं गच्छति” “चैत्रश्चैत्रं न गच्छति” इत्यादिवाक्यानामनुपपत्तिः।

१. (अध्याय-३) – प.ल.म.पृ. १७७

तर्हि क्रियान्वयिभेदप्रतियोगितावच्छेदकत्वं द्वितीयार्थः। भेदे प्रकृत्यर्थस्य आधेयतयाऽन्वयान्न पूर्वोक्तापत्यनुपपत्ती। (भूषणसार दर्पण, पृ. १४२) प्रथमस्तावत् चेत्ररूपाधेयः भेदस्य अनुपपत्तेः अर्थात् (उभयोः एकत्वम्) कर्मत्वव्यवस्था न स्यात् अतः उक्तः प्रयोगः न समीचीनः।

द्वितीयस्थले भेदस्य व्यवस्थां कुर्वन्ति। अतः कर्मप्रत्ययकरणे न कोऽपि दोषः।

"चैत्रश्चेत्रं न गच्छति" इत्यत्र निषेधवाक्ये पूर्वपक्षत्वेन रूपेण इदं वक्तुं शक्यते चैत्रे स्थितो यः चैत्रभिन्ने समवेतक्रियाजन्यसंयोगस्योत्पादकः व्यापारः वर्तते सः व्यापारः प्रसिद्धो नास्ति अर्थात् बोध्यो नास्ति। अतः इदं वाक्यं प्रामाण्यकोटौ न स्थापयितुं शक्यते। किन्तु अस्योत्तरं वर्तते यत् नञा सह यत्र धात्वर्थव्यापारस्य कथनमस्ति तत्र "चैत्रः चैत्रभिन्नो वर्तते" एतादृशी प्रतीतिः न भवति। एतत् स्वीक्रियते चेत् दोषः नास्ति। अभावमुखेन कर्मणः प्रवृत्तिः भवति शाब्दबोधोऽपि सम्भवति[1]। "चैत्रश्चैत्रं न गच्छति" इत्यत्र चैत्रस्थभेदप्रतियोगित्वम् नावच्छेदकं वर्तते। प्रतीतिस्तु एवमेव भवति, "चैत्रश्चैत्रं न गच्छति" इत्यत्र तु अस्य प्रसिद्धिरेव वर्तते।

लघुमञ्जुषाकारः परिष्कृतस्यास्य कर्मलक्षणस्य प्रत्याख्यानं करोति। "चैत्रश्चैत्रं गच्छति" इत्यत्र चेत्रस्य कर्मत्वापत्तेः वारणन्तु परसूत्रेण विदिता कर्तृसंज्ञा एव करोति, अतः भेदे शक्तिकल्पनं तु व्यर्थमेव[2]। नागेशः कथयति यदि वर्तमानभेदस्य प्रतियोगितावच्छेदकव्यापारः द्वितीयार्थरूपाधेयत्वान्वितफलस्य हेतुरितिस्वीकारे अर्थात् विशिष्टव्यापारस्य फलस्य च मध्ये कार्यकारणभावस्वीकारे भेदस्य शक्तित्वस्वीकरणस्य

१. तदुक्तम् – "नञ्समभिव्याहारे धात्वर्थव्यापारे चेत्रवृत्तिभेदप्रतियोगितावच्छेदकत्वाभावस्य भानोपगमेनादोषात्। एवञ्च चैत्रश्चैत्रं न गच्छति इत्यतः चैत्रवृत्तिभेदप्रतियोगितावच्छेदकत्वाभाववान् यः चैत्रवृत्तिसंयोगानुकूलो व्यापारस्तज्जनककृतिमांश्चेत्र इति बोध इत्याहुः"। (प.ल.म. ज्योत्स्ना पृ. १७७)

२. तन्न, परया कर्तृसंज्ञया बाधेन तत्प्रयोगापत्तेरसम्भवेन भेदे शक्तिकल्पनस्य व्यर्थत्वात्
— ल.म., पृ. १२२४

आवश्यकता एव नास्ति[1]। फलेन अन्वयः कर्तव्य इति आग्रहेण नैयायिकाः अपि कार्यकरणभावे विशिष्टव्यापारं समायोजयन्ति। अतः कल्पनागौरवरूपः दोषस्तु तन्मतेऽपि भवति।

एतदतिरिक्तं नैयायिकाः भेदशक्तिं स्वीकृत्य समानाधिकरणोपरि उक्तफलप्रकारकबोधाय धातुजन्यव्यापारोपस्थितिः कारणत्वं स्वीकुर्वन्ति। अनेन अस्मदपेक्षया। तेषां मते कार्यकारणभावान्तरस्य स्वीकारः कर्तव्यः।

"चैत्रमैत्रौ परस्परं गच्छतः" इत्यत्र नागेशन्यायमतौ समानौ। नैयायिकाः यथा चैत्रमैत्रयोः परस्परं पदार्थे भेदं स्वीकुर्वन्ति। नागेशोऽपि तद्वत् परस्परपदार्थे सव्यापारभेदस्य सत्तां स्वीकरोति। "चैत्रः मैत्रं गच्छति" तथा "मैत्रस्चैत्रं गच्छति" एतयोः द्वयोः वाक्ययोः समुक्तरूपं उक्तवाक्ये आगच्छति। अत्र द्वितीयान्वार्थे वर्तमानस्यान्योऽन्याभावस्य प्रतियोगितावच्छेदको व्यापारोऽस्ति[2]। अन्योन्याभावस्य अपरं नाम वर्तते भेद इति।

नागेशः न्यायमते अन्यायसंगतिमपि प्रदर्शयति यथा – "घटं जानाति" इत्यत्र द्वितीयाविभक्तेरनापत्तिः आधेयतां भेदं च द्वितीयार्थस्वीकारे "घटाधेयफलानुकूलघटभेदसमानाधिकरणव्यापारवान्" इति बोधो भवेत्, स च बोधः स्पष्टतयासंगतरूपः।

नैयायिकाः वक्तुं शक्नुवन्ति यदा शक्त्या कार्यं न चलति तदा विषयत्वे लक्षणा स्वीकर्तव्यम्। किन्तु एतदपि भवितुं न शक्नोति। यतः कर्मणि एव द्वितीया भवति, एवं च कर्मतः अन्यावस्थायां शक्त्या लक्षणास्वीकारे अपि न साधुत्वव्यवस्था। अत एव प्राचाम् प्रसिद्धोक्तिः वर्तते यत् सुपः विभक्तो न लक्षणेति[3] "वैकुण्ठमधितिष्ठति" इत्यत्र वैकुण्ठशब्दः कस्याश्चिदपि स्थितो उक्तलक्षणेन व्याख्येयो नास्ति। वस्तुतः इदमेव कथनं संगतं यत् कर्मसंज्ञा एव एतान् शब्दान् नियमयति। भेदस्य द्वितीयाशक्तित्वं किमर्थं स्वीक्रियत इति[1]। ।। अस्तु।।

१. किञ्च द्वितीयार्थाधेयत्वन्वितफलप्रकारक बोधं प्रति द्वितीयान्तार्थवृत्तिभेदप्रतियोगितावच्छेदकव्यापारोपस्थितेर्हेतुत्वकल्पनेन तद्वारणात् – तत्रैव।

२. ल. म. कलाटीका, पृ. १२२४

३. ल. म., पृ. १२२५

# ॥ करणकारकम् ॥

**नव्यन्याये करणविवेचनम् = भवानन्दः**

भवानन्दाचार्यस्य अनुसारेण करणं हेतुः वर्तते स च कारकान्तरेषु चरितार्थः न भवति, अर्थात् कारकान्तरस्य व्यापारः पातत्क्रियायाः जनकः न भवति तावत् येन व्यापारेण क्रियोत्पन्ना भवति स एव करणं भवति[२]। अनेन करणस्य पृथक् व्यक्तित्वं सिद्ध्यति यत् अस्य व्यापारः कारकान्तरे गतार्थः न भवितुं शक्नोति, सः करणस्थानं न गृह्णाति। जयरामोऽपि भवानन्दस्य लक्षणावृत्तिं कुर्वन् "हेतुत्वम्" नाम "क्रियाहेतुत्वम्" करोति[३]। कारकसन्दर्भे क्रियाहेतुत्वरूपे सामान्यतथ्यम् अश्रुतः सन् अपि गम्यमानन्तु भवत्येव।

भवानन्दः कथयति अत्र हेतुः न क्रियायाः अपि तु क्रियाफलस्य विद्यते। फलमपि क्रियायाः अन्यतरार्थः।

इदानीं भवानन्दः केन प्रकारेण स्वस्य करणलक्षणे "कारकान्तरे गतार्थः न भवति" अस्य विशेषणस्य सङ्गतिं प्रदर्शनाय विभिन्नकारकाणां समक्षं करणस्य व्यक्तित्वं प्रदर्शयति—

(१) कर्ताकारकम् प्रथमतः क्रियाजनकत्वरूपे प्रसिद्धे कुठरादौ अवस्थितसंयोग-व्यापारम् उत्पादयति। एवं करणस्य व्यापारेणैव छेदनत्वरूपे फलोत्पादको भवति। अत एव कर्तुः साक्षात्सम्बन्धः करणेन सह भवति। फलस्य हेतुस्तु परम्परया जायते अर्थात् तस्य फलस्य च मध्ये करणव्यापारः आगच्छति। शब्दान्तरे – कर्ता करणं प्रतिं स्वस्य प्रयोजते व्यक्तीकरोति, एवं करणं तत्प्रयोजनं फलपर्यन्तं प्राप्य विश्रामयति। तदुक्तम् - कर्ता हि सिद्धं कुठरादिकं व्यापारयन् छिदालक्षणं फलम् उत्पादयति करणे चरितार्थः न तु

१. 'संज्ञाया एव तन्नियामकत्वे तु किं भेदनिवेशेन?' — तत्रैव

२. तदुक्तम् – "करणत्वं च कारकान्तरेऽचरितार्थत्वे सति हेतुत्वम्। तत्र चरितार्थत्वं च तद्व्यापारमुत्पाद्यमेव फलहेतुत्वम्" (भवानन्द कारकचक्र पृ.४०)

२. जयराम, कारकवाद, पृ. ३०

फले। (का. चक्रम्) पृ. ४० फले = छिदादिक्रियायामहेतुरिति शेषः।
— माधवी पृ. ४१

(२) कर्मकारकस्यापि इदमेव तात्पर्यम् तदपि स्वस्य उद्देश्यं करणसमक्षमेव उपस्थापयति। यतः धान्यं लुनाति, काष्ठं छिनत्ति, इत्यादीनां कर्मणः असिद्धत्वेन क्षात्रादिकरणानाम् व्यापारोऽपि असिद्ध एव। यदि छेद्यः पदार्थ एव नास्ति चेत् तर्हि कुठारादिकरणं छिदानुकूल व्यापारः कस्मिन् कुर्यात्। इदं कारणं यत् प्राचीनाचार्याः कर्मणः करणव्यापारस्य विषयत्वं स्वीकुर्वन्ति।

यस्य विवेचनं गताध्याये जातं वर्तते, एवं प्रकारेण कर्म करणे चरितार्थमस्ति[1]।

(३) अधिकरणकारकं कर्तुः कर्मणो वा व्यापारेण क्रियायाः निष्पादकं भवति। अर्थात् तत् एतयोः द्वयोः मध्ये कस्मिंश्चित् एकस्मिन् चरितार्थः भवति। यथा "गृहे चैत्रः स्थाल्यां तण्डुलं पचति" अस्मिन् वाक्ये गृहं स्थाली चोभयमधिकरणं वर्तते। गृहस्य कारकत्वम् चैत्रस्य व्यापारसम्पादनेन करोति तत्र स्थाली क्रिया निष्पादिका भवति। गृहेण सह चैत्रस्य संयोगं विना अथवा स्थाल्या सह तण्डुलसंयोगं विना पाकक्रिया सम्भवो नास्ति।

(४-५) सम्प्रदानमपादानञ्च क्रियासामान्यस्य प्रयोजको न भवतः। तदुक्तम् – "सम्प्रदानापादानयोश्च न क्रियासामान्यहेतुत्वम्"। (कारकचक्रम्) पृ. ४१ सम्प्रदानं दानक्रियायां स्वस्यानुमितेः प्रकाशनं कृत्वा कर्तुः इच्छामुत्पादयति। एवंप्रकारेण दानक्रियायाम् सम्प्रदानस्य निष्पादकत्वं भवति, न तु सम्पूर्णाक्रियायाम्।

अत एव क्रियासामान्यतः सम्बद्धकरणस्य स्थानं सम्प्रदानं न गृहीतुं शक्नोति। हस्तेन ददाति इत्यत्र सम्प्रदानं नास्ति। यतः दानक्रियायाम् अनुमतिप्रकाशनद्वारा

१. 'कर्मापि करणे चरितार्थम्। कर्मासिद्धौ करणव्यापार (I) सिद्धेः। न हि छेद्यासिद्धौ कुठारादिकरणानां छिदानुकूलव्यापारः सम्भवति। अत एव करणव्यापारविषयत्वं कर्मत्वमिति प्राञ्चः। कर्मणस्तु तादृशक्रियाहेतुत्वविराहदेव नाति प्रसङ्गः'।
— कारकवादार्थः, पृ. ३१

अत्र दानप्रयोजकत्वं न प्रतीयते। अस्मिन् स्थले करणं भवति।

अपादानकारकमपि पतनाश्रये पत्रादौ पतनविरोधिसंयोगस्य विनाशकविभागमुत्पाद्य चरितार्थो भवति। पतनक्रियायाः निमित्तं भवति। अत एव तत् करणस्य विरोधी नास्ति। यत्र अपादानं पूर्वोक्तप्रकारेण पतनस्य प्रयोजकं न भवति, तत्र वारणं सम्भवति[१]। एवं प्रकारेण कारकान्तरे करणं चरितार्थो न भवति। कारकान्तरं यदा क्रियायाः निष्पत्तौ सफलं न भवति तदा करणस्य व्यापार एव तं उत्पादयति।

अनया दृष्ट्या करणं प्रकृष्टकारणरूपे नैयायिकाः स्वीकुर्वन्ति। किन्तु करणस्य एतादृशकथने भवानन्दस्य अभिप्रायो नास्ति, अतः उपर्युक्तलक्षणस्य व्याख्यानकरणानन्तरम् अपि स्वपक्षं लक्षणान्येन सह स्थापयति—

"व्यापारवत्कारणं करणम्"। व्यापारयुक्तं कारणं करणं भवति। चरमकारणपक्षे हस्त कुठारादौ गौणरूपेण कारणत्वप्रयोगः भवितुं शक्नोति। प्रकृतलक्षणेन प्रधानरूपत्वेन करणत्वस्योपपत्तिः सम्भवो विद्यते। यतो हि सव्यापारकारणन्तु अस्त्येव। कस्याश्चित् क्रियायाः करणत्वे अयमभिप्रायः वर्तते यत् तत् व्यापारसम्बन्धेन तत्क्रियायाः कारणमस्ति। "व्यापारसम्बन्धेन तत्क्रियाकारणत्वं तत्क्रियाकरणत्वमित्यर्थः"। (माधवी, ४३)

**आत्मनः करणत्वम् —**

अत्रेयं समस्या वर्तते यत् आत्मा अदृष्टद्वारा कार्यसामान्यं प्रति कारणं विद्यते, अतः तं प्रति आत्मनः करणत्वस्य अनिष्टप्रसङ्गः।

विशेषतः ज्ञानेच्छादयः ये आत्मनो धर्माः सन्ति तान् प्रति मनोयोगद्वारा आत्मा कारणं भवति। अतः तस्य कारणत्वं दुरुच्छेदं वर्तते।

१. 'दानेऽनुमतिप्रकाशनेन कर्तुरिच्छामुत्पाद्यसम्प्रदानस्य, पतनाश्रये च पत्रादौ पतनप्रतिबन्धक संयोग–नाशक–विभागमुत्पाद्य अपादानस्य चरितार्थत्वम्'।

— तत्रैव (कारकवादार्थ पृ. ३१)

आत्ममनःसंयोगं विना संसारेऽस्मिन् न किमपि ज्ञानम् उत्पद्यते। यदि भवता व्यापारसम्बन्धेन कारणत्वे करणत्वस्य वार्ता क्रियते तर्हि आत्मनि एतादृशी स्थितिः न मिलति।

यद्यपि आत्मा कार्यानुकूलादृष्टं धारयति तथापि व्यापारसम्बन्धेन तस्य कारणत्वं खलु अप्रामाणिकं वर्तते[१]। आत्मनः करणत्वस्वीकारे वैयाकरणानां न काऽपि आपत्तिर्वर्तते, यतो हि यदि तस्यैव व्यापारानन्तरं क्रियानिष्पत्तिः विवक्षिता स्यात् तर्हि तस्य करणत्वं निर्विवादं स्यात्। किन्तु प्रत्यक्षादिज्ञानेषु इन्द्रियादिपर्यन्तमेव करणस्य नियमस्वीकर्तॄणां नैयायिकानां मते आत्मनः करणत्वे महत्यापत्तिः वर्तते। अस्य निराकरणं पूर्वोक्तप्रकारेण तु भवत्येव। एतत्तु सम्यगेव यत् कार्यसामान्यस्य ज्ञानेच्छादीनां वा कर्ता आत्मा विद्यते। स चात्मा उपाधेयः अर्थात् धर्मी वर्तते। ज्ञानेच्छादयस्तु गुणाः। आत्मनि अनेके धर्माः उपाधयश्च आरोपिताः स्युः। प्रकृत-स्थले कर्तृत्वं करणत्वं च उपाधिरूपेण विद्यते। उपाधेः उपाधेयस्य च तादात्म्यत्वे न किमपि आश्चर्यं वर्तते। सर्वेऽपि वादिनः एतत् स्वीकुर्वन्ति। करणत्वं कर्तृत्वं च यद्यपि परस्परं भिन्नम्। द्वयोः परस्परं तादात्म्यं न भवति, किन्तु उपाधेयेन सह तस्य तादात्म्यं सम्भवति। अतः आत्मनि क्रमशः करणत्वस्य कर्तृत्वस्य बोधो भवितुं शक्नोनि[२]। एवञ्च वितक्षातः कर्तरि करणत्वस्य व्यवहारो भवति। अनेनेदं न ज्ञातव्यं यत् वस्तुतः आत्मा करणं भविष्यतीति ।। इति।।

१. 'व्यापारसम्बन्धेन कारणत्वस्य विवक्षितत्वान्नदोषः। आत्मनः कार्यानुकूलादृष्टवत्वेऽपि तेन सम्बन्धेन कारणत्वे मानाभावात्'। — का.च. माधवी, पृ. ४३

२. (क) न चैवमदृष्टद्वारा कार्यमात्रे, विशेषतो ज्ञानेच्छादौ मनोयोगद्वाराऽत्मनः करण-त्वापत्तिः उपाधेयसङ्करस्येष्टत्वात्, अनुकूलकृतिसमवायित्वलक्षणकर्तृत्वस्य निरुक्त करणत्वाद् अन्यत्वेनैव उपाध्योरसङ्करात्। — का.च.पृ. ४२

(ख) ज्ञानादावात्मादेः करणत्वस्येष्टत्वात्। उपाधेयसङ्करेऽपि कर्तृत्वकरणत्वाद्यु-पाधेरसाङ्कर्यादेव कारकस्य षड्विधत्वादत एव 'आत्मानमात्मना वेत्सि सृजस्या-त्मानमात्मना' इत्यादिकः प्रयोगः। — श.श.प्र.पृ.३१३, कारिका ७१

### व्युत्पत्तिवादे कर्तृव्यापारस्य अधीनता –

केचन कर्तरि करणत्वस्य व्यवहारं सहितुं अक्षमाः सन्ति। भवानन्दोऽपि तेभ्यः निवेदनं करोति यत् तेऽपि मम मार्गं स्वीकुर्युः इति मत्वा करणस्य लक्षणे "कर्तृभिन्नत्वे सति" इति विशेषणं दातव्यमिति।

व्यापारयुक्तं कारणन्तु करणमेव भवितुं शक्नोति। किन्तु विवक्षातः कर्तुरपि करणत्वस्वीकारे तल्लक्षणं खलु अशक्तप्रायः भवति, अतः "कर्तृभिन्नत्वे सति" इति विशेषणपदमावश्यकम्। येन कर्तुः वारणं कृत्वा करणस्य विशुद्धं लक्षणम् भवितुं शक्नुयात्।

गदाधरोऽपि एतादृशस्थितौ रक्षणाय "कर्तृव्यापाराधीनत्वे सति व्यापारत्वं करणत्वम्" एतादृशं लक्षणं करोति। तदुक्तम् – "तच्च व्यापारवत्कारणत्वम्। व्यापारे कर्तृव्यापाराधीनत्वं निवेशनीयम्।" (व्युत्पत्तिवादः) पृ. २२४

यदि एवं न स्यात् तदा कर्तुरपि करणत्वापत्तिः स्यात्, तथा "चेत्रः चेत्रेण पचति" काण्ठं चेत्रेण पचति इत्यादीनाम् अनिष्टप्रयोगाणां दुर्वारः स्यात् यत्र कर्ता करणं वर्तते।

इयं शङ्का पुनरपि उद्भवति यत् चेष्टादिरूपे कर्तुः व्यापारोऽपि तस्य कृत्यादिरूपे व्यापारान्तरस्य अधीनो वर्तते। अतः कर्तुः व्यापाराधीनत्वे अपि कर्ता सर्वथा करणं न भवति इति वक्तुं न शक्यते। चेष्टात्वेन कर्तृव्यापाराधीनकरणस्य व्यापारः चलति इति स्वीकृतम्। इदानीं चेष्टारूपकर्तृव्यापारोऽपि द्रष्टुं शक्यते। अस्य समाधानमिदं वर्तते यत् कर्तृव्यापाररुपस्य विशेषणरूपत्वं दीयते तच्च करणभिन्नत्वं स्वीकृत्यैव विद्यते[१]। एवं प्रकारेण स्वस्मात् भिन्नरूपकर्तुः व्यापारस्य अधीनव्यापारेण युक्तं कारणमेव करणम् विद्यते।

वस्तुतः गदाधराचार्याः कर्तृव्यापारस्य अधीनता सर्वत्र न स्वीकुर्वन्ति। यतो

१. 'स्वभिन्नत्वेन कर्तुर्विशेषणीयत्वात्'। – तत्रैव (व्यु. वा. पृ. २२४)

हि तेषामनुसारेण करणतृतीयायाः पृथक् शक्तिद्वयं वर्तते – (१) समभिव्याहृतम् (२) व्यापारयुक्तं कारणम् तदेवोक्तम् – "वस्तुतः समभिव्याहृतकर्तृव्यापाराधीनत्वे व्यापारवत्कारणत्वे च तृतीयायाः शक्तिद्वयम्"। (व्युत्पत्तिवादः) पृ. २२५

प्रथमशक्तेः व्याख्यानमपेक्षिता वर्तते। यत्र एकस्या एव पाकक्रियायाः चैत्रः काष्ठत्वेन मैत्रश्च तुष-प्रक्षेपत्वेन सम्पन्नं भवति तत्र "चैत्रः तुषैः मैत्रः काष्ठैः पचति" एतादृशप्रयोगप्रसङ्गः[१]।

अत्र एकवारं उच्चरितस्य कर्तृव्यापारस्य अधीनतायाः आभासमात्रं तत्तद्व्यापारेषु भवति। एतत्स्वीकृत्वा तत्प्रयोगस्य अप्रामाणिकत्वं साधयितुं शक्यते। तुषनिष्ठव्यापारस्य चैत्रव्यापाराधीनत्वाभावेन "चैत्रस्तुषैः पचति" इति प्रयोगो न भवति, तद्वत् काष्ठनिष्ठव्यापारस्य मैत्रव्यापाराधीनत्वाभावेन "मैत्रः काष्ठैः पचति" इति प्रयोगोऽपि न भवति। यस्य करणस्य व्यापारः यत्कर्तुः व्यापाराधीनत्वं वर्तते तेनेव सह तस्य प्रामाण्यमपि स्यात्। चैत्रः काष्ठैः, मैत्रः तुषैः उच्यते चेत् न कोऽपि दोषः।

यत्र अस्मिन् रूपे कर्तुः समभिव्याहारः नास्ति तत्र करणे केवलं व्यापारयुक्तकारणतायाः प्रतीतिः भवति। यथा – "शरैः शातितपत्रोऽयम्", "दात्रेण लुनाति"।

किन्तु यत्र कर्तुरपि समभिव्याहारो वर्तते तत्र कर्तुः व्यापाराधीनव्यापारयुक्तकरणत्वस्येव करणं भवति। इयमेवात्र विशेषता विद्यते[२]।। इति।।

१. (१) चैत्रकर्तृकत्वम् (२) तुषकरणकत्वम् (३) मैत्रकर्तृकत्वम् (४) काष्ठकरणत्वम् – इति चतुर्णाम् उपस्थितिः भवति, अतः उपर्युक्तः व्यतिकरः संभवति।

२. कर्त्रसमभिव्याहारस्थले व्यापारवत्करणत्वमात्रं प्रतीयते। कर्तृसमभिव्याहारस्थले व्यापारे तद्व्यापाराधीनत्वमपीति सामञ्जस्यम्। व्यु. पृ. २२५

**करणहेतुश्च**[1] —

पाणिनिर्यत्र करणहेत्वोर्भेदस्य सङ्केतमात्रमकरोत्तत्रैव तेषां सम्प्रदायेऽनयोः पूर्ण मीमांसा जाता तथा पाणिनि प्रयुक्तं हेतुं कारणपर्यायं स्वीकृत्याप्यनुमानगतहेतो-पृथक्कुकृतमेव, करणात् पृथगपि हेतो निरुपणं जातम्। अनयो फल-साधन-समर्थः पदार्थः हेतुः कथ्यते। (न्यायकोशे पृ.१०७१) यथा—धनेन कुशलम्, विद्यया यशः। अत्र कुशलता यशोलाभौ फलमिव निर्दिष्टौ स्तः। ययोस्सिद्धियोग्यौ पदार्थौ यथाक्रमं धनविद्यै, स्तः। अत इमे हेतू स्तः। यतोहीमे कारणमिव फलोत्पादकेऽत इमे कारणमपि स्तः। ध्यातव्यं यदनुमानप्रमाणस्थो हेतुर्नोत्पादकोऽपितु ज्ञापको भवति। सामान्येन कारणेति नाम्ना प्रसिद्धं तत्वमेव पाणिनेर्हेतुः। परञ्चास्मिन् विशिष्टतया निमित्तकारणस्यैव समावेशो भवति। समवाय्यसमवायिनोर्न, यद्यप्यनयोर्निबद्धस्य न किमप्यौचित्यम्।

सर्वप्रथमं वाक्यपदीय एव करणहेत्वोर्विभागः कृतवान्। भतृहरिस्तत्र कथयति यद्धेतौ व्यापाराश्रयो न गृह्यते। करण कारकन्तु सव्यापारकं भवति[2]। विवक्षितवस्तुनः सिद्धये प्रयोजनस्य सिद्धये व्यापाराश्रयमन्तरेणैव स्वीयया योग्यतया यो निमित्तः स एव हेतुपदवाच्यः। हेलाराजमते शेषलक्षणां षष्ठीं सम्बन्ध षष्ठीं वा प्रबाध्य हेतौ तृतीया विभक्तिर्भवति। यथा—अध्ययनेन वसति। अध्ययनं हेतुर्वासोहेतुमान्। अनयोर्मिथस्सम्बन्धत्वाच्छेषषष्ठी प्राप्तासीत्। यां प्रबाध्य हेतुतृतीया जाता। अत्र क्रियानिमित्तो हेतुरस्ति। परन्त्वस्मिन् लेशमात्रोऽपि व्यापारो नास्ति। भट्टोजिदीक्षितोऽस्य व्याख्यानं कुर्वन् कथयति हेतौ फलमपि गृह्यते। 'अध्ययनाय निवासः' इत्यादौ निवासोऽनन्तर-मध्ययनं भवति। अनुवर्तित्वात् अध्ययनस्यहेतुत्वं वक्तुं न शक्यते। यतोहि हेतोरर्थो यदि कारणं तर्हि हेतोःकार्यात्प्राग्भावित्वमावश्यकमस्ति। अध्ययनं करणमपि नास्ति निवासेऽस्य प्रकृष्टोपकारकता नास्ति। तृतीया कथं जाता? वस्तुत उपकार्योपकारक-त्वात्तादर्थ्ये चतुर्थी भवितव्या। अस्माद्धेतोरध्ययनस्य फलमपि हेतावन्तर्भूतमिति स्वीकृत्य तृतीया सिद्ध्यति। वस्तुतोत्र हेतु-निमित्त-उद्देश्य-प्रयोजन-फलानि सर्वे पर्यायवाचिन एव सन्ति। दीक्षितस्यायमेवाशयः। अन्यथा निवास-क्रियाया कारणम-

१. द्रष्टव्य—म.म.हरि कृपालुद्विवेदी स्मारके ग्रन्थे — हेतुकरणविवेकः।

२. अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते। का.प. ३/६/२४

ध्ययन्नभवितुमर्हति।

नैयायिका केवलं गुणद्रव्ययोर्निमित्तं हेतुस्स्वीकुर्वन्ति क्रियानिमित्तन्न। उपर्युक्तो हेतुर्निश्चप्रचमकारकविभक्तेर्विषयः। यदि क्रियया क्रियापदस्य बोधो व्यापारस्यापि बोधस्स्यात्तर्हि सा कारकविभक्तेरेवास्ति। यथा—विद्यया वसति। अत्र विद्या निवास-व्यापारनिमित्तिका क्रियानिवर्तिका चास्ति।

वस्तुतस्तु निमित्तं त्रिधा वर्तते। प्रथमम्-स्वरुपभेदेन क्रियानिर्वर्तकत्वात् कारक निमित्तम्। द्वितीयं सामान्येन जनकत्वात् हेतुनिमित्तम्। तृतीयं ज्ञापकत्वाल्लक्षणनिमित्तम्। चरमनिमित्तार्थं पाणिनिप्रणीतं सूत्रं वर्तते – 'अनुर्लक्षणे' (१/४/८४) यथा वृक्षमनु विद्योतते। अत्र विद्योतन क्रियाया ज्ञापकनिमित्तं वृक्षोऽस्ति। लक्षणे इदमेव वैशिष्ट्यम् भवति यदस्मिन् अवधिभाव-मर्यादा-सीमेत्यादीनामपि बोधो भवति। यश्च लक्ष्यमाणवस्तुनः प्रकाशने निरूपितं भवति[१]। तद्रीत्या वृक्षोऽवधिभूतायाः विद्योतन क्रियाया परिच्छेदकोऽस्ति। जपमनुप्रावर्षदित्यत्र जपो वृष्टिं प्रति जनकत्वा-द्धेतुरस्ति। तदनुसारञ्चात्र तृतीया भवितव्या परञ्च हेतुमेव ज्ञापकत्वसामान्यं स्वी-कृत्यानुर्योगे 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यनेन द्वितीया विभक्तिः कृता[२]। भट्टोजी-दीक्षितोऽस्यार्थं कुर्वन्ति यद्धेतुभूतजपोपलक्षितं वर्षणम् अर्थाज्जप एव हेतुरस्ति। तथापि 'हेतौ' इति सूत्रस्य परत्वेऽप्यत्राप्राप्तिः, यतोहि 'लक्षणेत्थंभूताख्यानभागवीप्सा-सुप्रति-पर्यनवः' (१/४/९०) इत्यनेन कर्मप्रवचनीय संज्ञा सिद्धौ 'अनुर्लक्षणे' (१/४/८४) इति पृथक् सूत्रकरणं व्यर्थं स्यात्। पृथगुपन्यासेनैवाऽस्य बलवत्वं बोध्यते। फलतोऽ-नेनैव 'जपमनुप्रावर्षदित्यत्र' जपस्यमुख्यतो लक्षणाभावेऽपि तद्वद्व्यवहारेण द्वितीया गृह्यते[३]।

भतृहरिः करणहेतुर्भेदान्तरं विषय-वैषम्यात् साधयति। हेतुर्द्रव्य-गुण-क्रियाणां त्रयाणां विषयः, अर्थात् त्रयाणां साधने समर्थः। करणकारकंतु केवलां क्रियामेव साध्नोति (द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्) वा.प. (३/७/२५५) फलतः

१. आश्रितावधिभावं तु लक्षणे लक्षणं विदुः। वा. प. ३/७/२४ उ.

२. जनकश्चहेतुः ...... हेलाराज पृ. २५९

३. हेतुभुतजपोपलक्षितम् वर्षणम् इत्यर्थः – सि. कौ. पृ. ४२५

द्रव्यगुणयोस्साधने करणस्यकदापि न प्राप्तिः। करणंतु केवलं क्रियायां व्यापारप्रदर्शनं करोति। अस्यामपि निर्व्यापारत्वेन करणमपि हेतुरेव कथ्यते। द्रव्यगुणयो विषये करणस्य न किमपि योगदानमत एव तयोस्साधने हेतुर्व्यापारं कुर्यान्न वा किमपि वैषम्यं नोत्पद्यते। उभयथा हेतुरेव भवति। करणहेत्वोर्भेदप्रदर्शनस्य फलितार्थमिदम्। (१) निर्व्यापारत्वेन-सव्यापारत्वेन वा द्रव्यजनकः (२) निर्व्यापारत्वेनसव्यापारत्वेन वा गुणजनकः हेतुर्भवति। (३) निर्व्यापारत्वेन क्रियाजनकः (४) सव्यापारत्वेन क्रियाजनकः करणोभवति। हेतोर्कानिचिदुदाहरणानि सुस्पष्टयिष्यन्ति।

(१) द्रव्यविषयको हेतुः –

दण्डेन घटः। अत्र दण्डनिष्ठो व्यापारःपरञ्च तस्य साक्षात्क्रियान्वयित्वाभावेन न करणत्वम्। दण्डोघटजनकरुपेणात्रोपस्थितः[१]। अत्र हेतुर्व्यापारः। 'धनेन कुलमित्यत्र' धननिष्ठो न कोऽपि व्यापारः। व्यापारोयदि स्यात्तदापि व्यापारात्पृथग्भूत्वैव धनं कुलस्य हेतुरयमेवाशयः।[२]

(२) गुणविषयकोहेतुः –

पुण्येन गौरवर्णः। पुण्यमुभयार्थकम् प्रथमम् अपूर्वम्। द्वितीययम् यज्ञादिधार्मिक-क्रिया कलापम्। प्रथमं निर्व्यापारकम्, द्वितीयं सव्यापारकम्। उभयोरर्थयो-रिदं हेतुरेव भवति। यतो हि क्रियायामस्यसाक्षादन्वयाभावो वर्तते। इत्थमेव हेलाराजः--'शिल्पाभ्यासेन नैपुण्यम्' इत्युदाहरति। यस्मिन् नैपुण्य-गुणजनकः सव्यापारश्शिल्पाभ्यासो विवक्षितः।

(३) क्रियाविषयकोहेतुः –

पुण्येन दृष्टो हरिः अत्र पुण्यार्थः परमापूर्वोऽस्ति। यस्मिन् व्यापाराभावो विद्यते। अत एव क्रियान्वयित्वेन निर्व्यापारत्वात् पुण्यं हेतुः। तथा तत्र च हेतुतृतीया। यदि वयं पुण्यार्थः धार्मिकक्रियाकलापं स्वीकरिष्यामः तथा च पुण्योऽहेतुर्भविष्यति। यतोहि दर्शनक्रियायामन्वयेन सव्यापारत्वेन चास्मिन्

१. दण्डे व्यापारसत्वेऽपि क्रियाजनकत्वाभावान्नकरणत्वम्। ल.श.शे.पृ.४३८

२. द्रष्टव्य – हेलाराजः ३ पृ. २५५

कारकत्वापत्तिर्भविष्यति, अतस्तत् करणं भविष्यति तृतीयोत्पत्तिस्तु 'कर्तृ-करणयोस्तृतीया' इत्यनेन न च 'हेतौ' इत्यनेन। हेलाराजः क्रियाविषयक हेतुमुदाहरन्ति यदग्निना पाकः। सव्यापारत्वेऽपि अग्निनिष्ठव्यापारस्यावसानङ्गते सत्येव पाकक्रिया सिध्यति। पाकक्रियाऽसिद्धौ 'अग्निः' करणोऽस्त्येव। अतः करणकारकार्थं विषयरुपेण क्रियैव नियतास्ति। तत्रव्यापारयुक्तत्वं करणस्य स्वरुपभेदोस्ति[१]। स्मरणीयं यत् सव्यापारक्रियाविषयको हेतुः कथ्यते। स च शास्त्रीयो हेतुः। 'कर्ता कर्त्रन्तरापेक्षः क्रियायां हेतुरिष्यते' वा.प. (३/७/२५ उ.) स च स्वतन्त्रकर्तुः प्रयोजको भवति।

हेतुकरणयोरेकोविशिष्टो भेदः क्रियते यत्कर्ता हेत्वधीनो भवति करणन्तु कर्त्राधीनं भवति। 'धूमेणान्धः' इत्यत्र धूमोहेतुरस्ति यतोह्ययं द्रष्टुरधीनोनास्ति। प्रत्युतद्रष्टैव धूमाधीनो वर्तते। 'दात्रेण लुनातीत्यत्र' दात्रं छेदनकर्त्रधीनम्। (यदधीना कर्तुः प्रवृत्तिः सहेतुः कर्त्रधीनं करणमिति हेतुकरणयोर्भेदः) कारणमेवमस्ति यद्धेतुः क्रियानिष्पत्तिं नापेक्षते यदि च निष्पत्तिर्भवतु तदपि स निर्व्यापार एव प्रवर्तते। कर्तुस्सार्थक्यं तदा एव यदा कर्ता स्वतन्त्रः प्रवर्तते। यदि क्रिया न स्यात् तर्हि कर्तुरभावोऽपि भविष्यति अतो हेतोस्स्वरुपमित्थमस्ति यत्कर्ता तं न व्याप्नोतु। कर्ता धन-विद्यादि हेतुद्वारैव व्यापारं संचालयति - यथा विद्यया यशः। अत्र विद्याहेत्वधीनो कर्ता यशोरुपं फलं प्राप्नोति। 'लभते' इत्यध्याहृत्य कर्तुर्व्यवस्था कर्तुं शक्यते।

भर्तृहरिः इममेवविषयं कर्तुरपसार्य क्रियां योजयति मया दृष्टम् यत् करणहेत्वोस्साधारणो विषयः क्रियाऽपि सव्यापारा निर्व्यापारा क्रियेतित्वन्यदेतत्। करणन्तु क्रियोत्पत्तय एव भवति। अत एव क्रियायाः प्राधान्यं भवति करणस्याप्राधान्यम्। क्रियायाःप्राधान्याद्यत्र श्रूयमाणं करणं न स्यात्तत्र तत्स्थानापन्नः पदार्थः करणरुपेण स्वीक्रियते। प्रधानरूपे विद्यमाना क्रिया साध्यत्वात् स्वानुरूपं साधनमाक्षेप्तुं समर्थाभवति। नास्त्यत्र संदेहः[२]। तदनुरुपक्रियासिद्धये करणस्य प्रतिनिधित्वं भवति[३]। अतः

१. क्रियासाधननियतं तु कारकम् — हेलाराजः ३, पृ. २५६

२. हेलाराजः ३, पृ. २५६

३. क्रियायै करणं तस्य दृष्टः प्रतिनिधिस्तथा। वा.प. ३/७/२६

प्रधानभूतं हेतुं पुरतस्सा स्वयमप्रधानाभवति। क्रियासिद्धावनुपकारकत्वादश्रुतावस्थायामव्यस्य प्रतिनिधेरभावः। 'अध्ययनेन वसति' इत्यत्र वासक्रिया प्राधान्येन प्रतीयते पुनरपि वस्तुनस्सामर्थ्यात् क्रियाऽध्ययन हेत्वधीना[1]। यतोह्यध्ययनाय निवासोऽभिष्टः। अत्राध्ययनस्साध्यः निवासस्साधनः। प्रधानवस्तु न गौणाश्रितम्भवति यत् अध्ययनाभावे निवास निष्पत्तये कश्चिदपरः पदार्थस्तस्य स्थाने स्थातव्यः। यदि तस्य स्थानेऽपरं वस्तु स्थातव्यं तर्हि तदेव मुख्यं भविष्यति। यथा–भृत्या वसति। अध्ययने हेतु तृतीयेति तु निश्चितम्। सव्यापाराध्ययनेन वासक्रियानिवृत्तिर्नभवति यतोऽस्य करणत्वं स्वीकुर्वीत। अपितु निवासक्रियाया एव साध्यमध्ययनमस्ति। अतो निर्व्यापारं योग्यतामात्रेणाध्ययनं वासस्य हेतुः[2]। इदमेवाध्ययनं यदि व्यापारयुक्तं स्यात्तथा च यदि निवासहेतुकं विवक्षितं स्यात्तर्हि प्रयोजककर्ता शास्त्रीयो हेतुरपि भवितुं शक्नोति। यथा–अध्ययनं वासयति।

१. हेलाराजः पृ. २५६-५७

२. हेलाराजः पृ. २५६-५७

**हेतुतादर्थ्ययोः भेदः —**

अनेन विवेचनेन हेतुतादर्थ्यमध्ये भ्रमो जायते, यस्य निराकरणं अस्यां कारिकायां कृतम्—

'प्रातिलोम्यानुलोम्याभ्यां हेतुरर्थस्य साधकः।
तादर्थ्यमानुलोम्येन हेतुत्वानुगतं तु तत्'।। — वा.प.३/७/२७

हेतुः स्वस्य अर्थस्य सिद्धिः उभयथा कुरुते - अनुलोमविधिना तथा प्रतिलोमविधिना। तादर्थ्यम् अनुलोमविधिमाश्रयते तथा हेतुत्वेन अनुगतप्रकारको हेतुरेव आस्ते। 'कुण्डलाय हिरण्यम्' अस्य उदाहरणं वर्तते, यत्र कुण्डलम् उपकार्यम् अथवा साध्यम् अस्ति, एवं हिरण्यम् उपकारकं साधकं वा वर्तते। 'तस्मै इदम्' अस्य समासं विधाय 'तदर्थम्' शब्दो भवति एवञ्च तदर्थस्य भावः इति भावे विग्रहं कृत्वा भाववाचक 'ष्यञ्' प्रत्ययेन तादर्थ्यशब्दः उपपन्नो भवति उपकार्योपकारणयोर्मध्ये कार्यकारणसम्बन्धो वर्तते, यस्य अर्थः-उद्भूतरुपम् (अर्थात् यस्यरुपं नयनगोचरं भवेत्)। 'एतद् तस्मिन् उद्भूतं वर्तते' अत्र करणम् उपकारकं प्रतीयते तथा च कार्यकारणसम्बन्धस्य उत्पद्यमाने या चतुर्थी भवति सा चतुर्थीविभक्तिः कार्यवाचकशब्दादेव भवति। कारणवाचकशब्दाच्च तृतीया न भवति।

अनयारीत्या करणम्, हेतुः लक्षणम् तथा तादर्थ्यम् एषु चतुर्षु निमित्तत्वस्य सादृश्येऽपि लक्षणस्य व्यामिश्रप्रसङ्गः नोत्पद्यते। करणहेत्वोर्भेदस्तु वैयाकरणानां प्रमुखः विषयः वर्तते एव।

**आश्रयः करणतृतीयाया अर्थेऽस्ति – कोण्डभट्टः**

नव्यवैयाकरणेषु कोण्टभट्टः करणतृतीयाया अर्थद्वयं स्वीकरोति। आश्रयः व्यापारश्चेति। दीक्षितस्य मूलकारिकायाम् (सं. २८) आश्रयशब्दः व्यापारमपि अन्तर्भावयति, अत तदुपलक्षणम्। करणलक्षणे सर्वत्र व्यापारस्य चर्चा वर्तते यत्

एतद्व्यापारानन्तरं व्यवधानं विनैव क्रियासिद्धिः भवति। साधकतममित्यत्र अतिशय-बोधकस्य तमपः अर्थः प्रकर्षं स्वीकुर्वन् कोण्डभट्टः कथयति अव्यवहितफलोत्पन्न-व्यापारयुक्तं कारणं करणं भवति। अनेनैव व्यापारस्य आश्रयस्य च शक्यार्थता सिद्ध्यति।

"रामेण बाणेन हतो वाली" इत्यत्र बाणः करणमस्ति। यस्य प्रकृत्यर्थेण सह अभेदत्वेन तृतीयार्थे अन्वयो भवति। अस्याश्रयस्य अन्वयः आधेयत्वेन व्यापारे भवति। अस्य व्यापारस्याऽपि अन्वयो जनकतासम्बन्धेन धात्वर्थव्यापारे प्राणवियोगात्मके फले वा भवति[१]। तथा च रामनिष्ठो यो व्यापारस्तद्विषयीभूतबाणव्यापार-साध्यप्राणवियोगाश्रयो वालीति वाक्यार्थः। प्रौढमनोरमा—पृ.५१० अर्थात् रामनिष्ठो यो व्यापारः तस्य विषयीभूतबाणस्याश्रयरूपव्यापारेण साध्यं प्राणवियोगात्मकफलस्य आश्रयः वालीति शाब्दबोधः।

भूषणकारस्य मतमनेकवैयाकरणानां स्वीकार्यं नास्ति। ते व्यापारे तृतीयायाः शक्तिं न स्वीकुर्वन्ति, तथा तृतीयार्थः आश्रयस्यैव, स्वस्मिन् करणे वा वर्तमानव्यापार-जन्यत्वात् जन्यजनकत्वादिना सम्बन्धेन अन्वयं प्रदर्शयन्ति।

कथनस्य तात्पर्यमिदं वर्तते यत् अस्मिन् पक्षे व्यापारस्य आश्रयस्य च द्वयोः पृथक्तया शक्तिम् अस्वीकार्यम्, प्रत्युतः आश्रयान्तर्गतम् व्यापारोऽपि समाविष्टो भवति। आचार्य नागेशोऽपि अस्येव पक्षस्य समर्थनम् करोति।। इति।।

**नागेशद्वारा करणत्वविवेचनम् —**

नागेशभट्टः करणं करणताशक्त्या युक्तमिति स्वीकृत्य शक्तिं निर्वक्ति — "यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिः विवक्ष्यते तन्निष्ठा" (ल.म.पृ. १२५१) अर्थात् यस्य व्यापारानन्तरम् किञ्चिदपि व्यवधानं विना क्रियायाः सिद्धिः विवक्षिता स्यात् तत्रैव करणताशक्तिः विद्यते।

१. द्रष्टव्य — हरिराम, वै. भू. सा. काशिका, पृ. ३७९

स्पष्टतः उपर्युक्तलक्षणानामेवात्र प्रतिध्वनिः वर्तते। एतदनुसारं करणतृतीयाया अर्थस्तु करणत्वशक्त्यायुक्तः क्रियाकरणभावश्च सम्बन्धोऽपि वर्तते[1]। करणान्वयप्रसङ्गे नागेशेन मतद्वयमुल्लेखितं विद्यते।

(१) तृतीयार्थ एव करणं विद्यते। प्रकृत्यर्थबाणस्य तत्राभेदान्वयत्वेन "बाणाभिन्न-करणस्य बोधो भवति। अभेदसम्बन्धेन अन्वितस्य तृतीयार्थस्यापि अन्वयो धात्वर्थो भवति। स्वनिष्ठव्यापारस्य अव्यवहितानन्तरं सम्बन्धस्य कार्यं करोति। परिणामतः "करणबाणीयो वधः" अथवा "बाणकरणको वधः" इति बोधो भवति। इदं मतं भूषणकारस्य इमामुक्तिं तिरस्करोति यत् आश्रयः व्यापारश्च एतौ द्वौ शक्यार्थौ विद्येते।

(२) अपरं मतं नागेशस्य वर्तते, येन करणस्य अन्वयो धात्वर्थव्यापारेण भवति, न तु फलांशेन। अत्र उपर्युक्तक्रियाकरणभावः सम्बन्धस्य कार्यं करोति। शब्दशक्तेः अयं स्वभावो विद्यते यत् क्रियायाम् करणस्य अन्वयः स्यात्। करणस्यान्वयः व्यापारे विद्यमानत्वात् एव मीमांसादर्शने "उद्भिजा यजेत" अस्मिन् विधिवाक्ये उद्भिदशब्दे कुत्रापि मत्वर्थस्य लक्षणा न स्यात् अस्मात् भयात् नामधेय इति नाम्ना स्वीकृतः। तदनुसारमर्थो भवति उदभिद्नामकेन यागेन यज्ञस्य भावनां कुर्यात्।

यदि एवं न भूत्वा फलेऽपि अन्वयात् व्यापारे करणरूपे अन्वयः स्यात् चेत् धात्वर्थस्य फलांशे करणेन सह अन्वये न किञ्चित् दुष्करम्। एवं च अन्वयानुपपत्तौ आश्रितलक्षणाप्रसङ्गास्योपस्थितिः न भवति, येन तस्य वारणं क्रियेत।

अयं भावः विद्यते यत् "उद्भिदा यजेत" इत्यत्र यदि उद्भिदः अर्थः वनस्पतिरिति स्वीक्रियते चेत् अभीष्टार्थपर्यन्तं गमनाय अयमर्थः कर्तव्यः- "उद्भिद्वता यजेत" अस्यार्थस्तु वनस्पतियुक्तेन यागेन यज्ञस्य भावना कर्तव्या।

१. करणं तृतीयार्थः। प्रकृत्यर्थस्य तत्राभेदेनान्वयः। तस्य च स्वनिष्ठव्यापाराव्यवहितोत्त-रोत्पत्तिकत्वसम्बन्धेन धात्वर्थेऽन्वय इत्येके। – ल.म.पृ. १२५२

अर्थात् मत्वर्थलक्षणा स्वीकरणीया। किन्तु इयं जघन्या वृत्तिः वर्तते। अतः उद्भिदं यागविशेषस्य नाम स्वीकृत्य अभिधावृत्या एव अभीष्टार्थपर्यन्तम् गन्तुं शक्यते। कथनमिदं मीमांसकानां वर्तते।

नागेशः कथयति यत् करणस्यान्वयः व्यापार एव भवति, यतः करणेन सह धात्वर्थः व्यापारान्वये अनुपपनौ सत्याम् लक्षणाप्रसङ्ग आगच्छति। धात्वर्थः फलांशेन सह करणरूपे अन्वयस्तु समीचीन एव, यत्र लक्षणायाः प्रसक्तमेव नास्ति। अत एव "सोमेन यजेत" इत्यत्र मीमांसकाः छान्दसमत्वर्थलक्षणं स्वीकृत्य कार्यं कुर्वन्ति। यदि व्यापारे एव करणस्य अन्वयः क्रियते चेत् फलस्य करणरूपे अन्वयः भविष्यति, येन "ज्योतिष्टोमेन यजेत" अस्य वाक्यस्य केवलं कर्मस्वरूपबोधकत्वात् उत्पत्तिविधिः वर्तते। तत्रैव विहितेन करणेन अवरुद्धभवनेन पुनः करणान्तरस्य अन्वयः न स्यात् एवं च लक्षणा आवश्यकी वर्तते। छान्दसलक्षणायाः काऽपि आवश्यकता नास्ति।

नागेशः विषयेऽस्मिन् स्वस्य मतं दर्शयति यत् फलेऽपि यदि करणान्वयः क्रियेत तदा फलांशे वैरुप्यमुत्पद्येत, यतः एकन्तु भावनातः निरूपितस्य करणस्य रूपं तस्मै प्राप्येत द्वितीयन्तु स्वकरणेन निरूपितं साध्यमपि स एव स्यात् एतद्द्वयं युगपदेव उत्पद्येत, अतः अन्वयानुपपत्तिजन्यायाः लक्षणाया आश्रयत्वम् अनिवार्यम्। तदुक्तम्—फलेऽप्यन्वये युगपत्फलांशस्य भावनानिरूपितं कारणत्वं स्वकरण-निरूपितं चेति वैरूप्यं स्यादिति सावश्यकीत्यन्ये। (ल.म.) पृ. १२५३

अनेन प्रकारेण करणस्य अन्वयं नीत्वा नागेशः मीमांसकानां विधिवाक्यं विधिवत् विचारयति। करणतृतीयाया उपरि तेषाम् वक्तव्यमत्रैव सीमितं वर्तते।

यद्यपि करणस्य मुख्यं सूत्रमेकमेव वर्तते तथापि पाणिनिः सूत्रद्वये करणसंज्ञाया आंशिकं विधानं करोति। प्रथमसूत्रे कर्मणः द्वितीयसूत्रे सम्प्रदानस्य च करणेन सह विकल्पितं वर्तते। द्वितीयस्य निरूपणं खलु अग्रिमे अध्याये भविष्यति।

कर्मकारकस्य प्रयोगे यत् साधकतमं कारकं भवति, तस्य करणसंज्ञा कर्मसंज्ञा च द्वे अपि संज्ञे वैकल्पिके भवतः। कर्मकारकस्य विकल्पसूत्रं वर्तते "दिवः कर्म च" (पा. सू १/४/४३)

अक्षान् दीव्यति, अक्षैर्दीव्यति इत्यस्य सूत्रस्य उदाहरणम् "अनेनैव" "मनसा देवः" इत्यस्य सिद्धिः भवति। "मनसः संज्ञायाम्" (पा.सू.) ६/३/४ अनेन सूत्रेण करणतृतीयायाः अलुक् भवति। अस्य फलान्तरं विद्यते "अक्षैर्देवयते यज्ञदत्तेन" इत्यत्र सकर्मकक्रियायाः सत्वात् अण्यन्त-अवस्थायाः कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा न जाता। पुनः "अणावकर्मकात्" (पा.सू.) १/३/८८ अनेन विहितं परस्मैपदमपि न जातम्, यतः कर्मविकल्पत्वात् सकर्मकक्रियेयं वर्तते।

अत्र वक्तुं शक्यते यत् "अक्षान् दीव्यति" इत्यत्र परत्वस्य कारणात् तृतीयाविभक्तिरेव न्याययुक्ता अस्ति। द्वयोः संज्ञयोः अवकाशस्थलं पृथक् पृथक् वर्तते। "देवना अक्षाः" अत्र करणे ल्युट्प्रत्ययः जातः। इदं चावकाश-स्थलं करणस्य वर्तते। कर्मणोऽवकाशस्थलन्तु "दीव्यते अक्षाः" इति अत्र कर्मवाच्ये यक्प्रत्ययः आत्मनेपदं च जातम्। "अक्षान्" इत्यत्र द्वयोः संज्ञयोः प्रयोगस्य प्रयोगे परविभक्तिरेव भविष्यति। इति पूर्वपक्षमुत्थाप्य दीक्षितः कथयति यत् कार्यकालपक्षे "कर्मणि द्वितीया" (पा.सू. २/३/२) इत्यनेन सूत्रेण यस्य उपस्थितिः भवति सः अनवकाशः वर्तते अतः द्वितीया भविष्यति एव। यदि कोऽपि कथयेत् "दीव्यन्तेऽक्षाः" अत्र कर्मणः अभि-हितत्वात् अपि करणत्वस्य अनभिहितत्वात् करणे तृतीयो भवतु, अथवा "देवना अक्षाः" इत्यत्र ल्युट्द्वारा करणस्य अभिधाने सत्यपि कर्मणोऽनभि-हितत्वाद् द्वितीया भवतु, इति अस्माभिः उच्यते अत्र एकैव शक्तिः संज्ञाद्वये उपयुक्ताः भवितुं शक्नोति।

एवं प्रकारेण उभयत्र अभिधानमेव वर्तते अनभिधानं नास्ति (शब्द-कौस्तुभ २, पृ.१२६,२७)। नागेशः अस्योत्तरस्य प्रत्याख्यानं करोति यत् एकैव शक्तिः संज्ञाद्वये उपयुक्ता भवत्येव। कर्मादिपदम् कर्मत्वादिविविधशक्तिषु-

-बोधं कारयति। अत एव उभयत्र भेदत्वकरणमेव उचितम् इति[1]।।

**करणस्य भेदाः —**

करणस्य विभाजनं पाणिनीयेतरेषु सम्प्रदायेषु जातं वर्तते। मुख्यतः सांख्यदर्शने निरूपितस्य करणस्य कल्पनोपरि आश्रितं वर्तते। दर्शनेषु करणानि इन्द्रियार्थकानि सन्ति। व्याकरणशास्त्रे तस्याः करणकल्पनायाः एतावानेव उपयोगो विद्यते यत् - - विषयोपलब्धिं प्रति साधकतमं वर्तते। तत्र करणस्य कथनं वर्तते - कर्ता येन पुरुषार्थस्य साधनं कुर्यात्।

यथा कर्ता येन प्रकारेण छेदनादिपुरुषार्थस्य सम्पादनं दात्रेण करोति, तेनैव प्रकारेण सः इन्द्रियाणां साहाय्येन उपलब्धिरूपपुरुषार्थं सम्पादयति। एवञ्च दार्शनिकं करणम् व्याकरस्य करणाद् भिन्नं वर्तते।

(१) सांख्यदर्शने प्रथमन्तु करणद्वयं स्वीकृतं वर्तते। अन्तकरणं बाह्यकरणं चेति। अन्तःकरणं त्रिविधं भवति – बुद्धिः, अहंकारः, मनश्चेति। बाह्यं करणं दश भवन्ति - पञ्च ज्ञानेन्द्रियाणि। पञ्च कर्मेन्द्रियाणि[2]। एतेषु बाह्यकरणानां व्यापारः केवलं वर्तमानकालपर्यन्तम् सीमितं वर्तते। अन्तःकरणं च त्रीषु कालेषु भवति[3]।

वेदान्तिनां मते चत्वारि आभ्यन्तरकरणानि भवन्ति, यथा वेदान्तपरि-भाषायाम् (पृ.३२) विषयैः सह तदुल्लेखो वर्तते—

१. एकैव शक्तिः संज्ञाद्वयोपयोगिनीति तु चिन्त्यम्। कर्मादिपदानां कर्मत्वादितत्तच्छक्तिरूपेण बोधकतया तयोर्भेदस्यैवोचित्यादिति मञ्जूषायां विस्तरः।

— ल.श.शे. पृ. ४३५

२. साख्यकारिका – २६।

३. साख्यकारिका – ३३।

अन्तकरणंत्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्।।

"मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम्,

संशयो निश्चयो गर्वः स्मरणं विषया अमी"।।

अस्मिन् विषये सम्यक्तया विचार्यते चेत् एतेषां त्रैकालिकवृत्तित्वमनुमातुं शक्यते। सांख्यानां पूर्वोक्तभेदः करणमात्रं न व्याप्नोति, अस्य मर्यादा विषयोपलब्धेः साधनपर्यन्तं वर्तते। अतः भेदान्तरं कर्तव्यमितिं।।

(२) भरतमल्लिकः स्वस्य कारकोल्लासग्रन्थे करणस्य भेदद्वयं स्वीकरोति – बाह्यम्, आभ्यन्तरं चेति आद्योदाहरणम् "चक्रेण देव्यान् चिच्छेद समरे मधुसूदनः" इति। अत्र चक्रं बाह्यं करणं विद्यते। द्वितीयोदाहरणम् – "मनसा कृष्णपादाब्जं सेव्यते साधुना सदा" इत्यत्र मनः खलु आभ्यन्तरकरणं वर्तते। अस्मिन् विभाजने मुख्यसङ्गतिरियं विद्यते यत् हस्तपादादीनामपि शरीरसमवेतत्वात् आभ्यन्तरकरणं भवेत्, एवं च अप्रसिद्धिदोषः अपि स्यात्। इदं च विभाजनं हस्तपादादौ कमपि भेदं न स्वीकरोति।

आभ्यन्तरस्य बाह्यस्य च रूपे करणभेदः कर्तव्यश्चेत् दार्शनिकभेदः एव स्वीकार्यो भवति। अस्तु इदमपि भवितुं शक्नोति यत् प्रथमं शारीरम्, अशारीरञ्च इति भेदद्वयं कृत्वा तदनन्तरं शारीरकरणस्य बाह्यम् आभ्यन्तरञ्च इति भेदद्वयं स्वीकर्तव्यम्।

साख्यानुसारम् बाह्यमाभ्यन्तरञ्चेति करणं स्वीकृत्वा बाह्यस्य पुनः भेदद्वयं कर्तुं शक्यते – कर्तृशरीरसम्बन्धः तद्भिन्नश्चेति। "उरसा गच्छति" "नखेन छिनत्ति" इत्यादिप्रयोगे प्रथमकोटेः करणं भवति। दात्रादिप्रयोगे द्वितीयकोटेः करणं भवति।। इति।।

# ।। सम्प्रदानकारकम् ।।

**व्युत्पत्तिः —**

सम्. प्र. इत्युत्पसर्गद्वयपूर्वकाद्दा धातोर्ल्युट् प्रत्ययेसति सम्प्रदान शब्दस्य निष्पत्तिर्भवति। 'कृत्यल्युटो बहुलम्' इति सूत्रे बहुलग्रहणात् 'ल्युट्' निर्दिष्टेभ्योऽ-र्थेभ्यः पृथगर्थेष्वपि भवति। अतः 'सम्यक् प्रदीयतेऽस्मै' इत्यपि व्याख्या शक्यते। अतोऽत्र सम्प्रदानार्थको ल्युट् प्रत्ययः। व्याख्यया यस्मै पुरुषाय किञ्चित् वस्तु सम्यक् प्रदीयते सः सम्प्रदानम्। सम्प्रदानेऽस्मिन् सर्वथा दानं, स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनं वा भवति। अर्थेऽस्मिन् कैश्चित् सम्प्रदानस्य व्याख्यानेऽपि समेषां विदुषामसम्मतत्वान्न सर्वसम्मतः सिद्धान्तः। शब्दजा व्युत्पत्तिस्सर्वदा सुस्थिरा स्यादिति तु नावश्यकम्।

**पाणिनि-सूत्र विवेचनम् —**

पाणिनिना सम्प्रदान संज्ञार्थमनेकानि सूत्राणि विरचितानि सन्ति। येषु प्रथमं सम्प्रदान संज्ञायां प्रधानं परिशिष्टानि सूत्राणि सम्प्रदानसंज्ञायामप्रधानिस्वीकृतानि सन्ति। प्रथमं सूत्रम् - 'कर्मणा यमभिप्रैति स सम्प्रदानम्' (पा. १/४/३२) सूत्रस्यास्यार्थः कर्ता यं पदार्थं यां व्यक्तिं वा स्वकर्मणा सम्बन्धुमिच्छति स सम्प्रदानम् पतञ्जलिः सूत्रस्यास्य व्याख्याने (१) कर्मणा (२) यं .... सः (३) अभि-प्र-इत्यादीनां प्रयोजनानि कथयति (शास्ति)।

(१) यदि सूत्रे 'यमभिप्रैति स सम्प्रदानम्' इत्येवांशः स्यात् तर्हि कर्तुराक्षेपेणार्थो भवति यत् कर्ता यं सम्बन्धुमिच्छति स सम्प्रदानम्। अर्थात् तस्य ईप्सित-तमस्य कर्मणोऽपि सम्प्रदानत्वप्रसङ्गः स्यात्। 'उपाध्यायाय गां ददाति' अत्रोपाध्यायगावावुभावाभिप्रेतौ। करणरुपदान क्रियया गौः सम्बन्धुमिष्यमाणा। गवोपाध्यायः सम्बन्धुमिष्यमाणः उभयथा सम्प्रदानसंज्ञा सिद्धिः भवितुं योग्या परञ्च वस्तुस्थिति नैतादृशी। समाधानमिदं दीयते यत्परत्वाद्गोः कर्मसंज्ञा भविष्यति।

परिशेषत्वादुपाध्यायस्य सम्प्रदान संज्ञा भविष्यति[1]। परञ्चोभयोरभिप्रेयमाण-तायास्तुल्यत्वेऽपि सम्प्रदान संज्ञा कर्मरूपगोरेवोपयुक्ता। यतो गौरन्तरङ्गः। गौर्दान-क्रिययाभिप्रेताऽतः क्रिया-सम्बन्धोऽतरङ्गउपाध्यायस्तु दानक्रियाभिप्रेत गवाऽप्यभिप्रेतः। अतः परम्परयाभिप्रेतत्वादुपाध्यायस्य क्रिया सम्बन्धो बहिरङ्गः[2]। सम्प्रतीयमेव शङ्कोत्पद्यते यत्कर्मसंज्ञा निरर्थका भविष्यति तर्हि तस्यातीवारणमित्थङ्कर्तुं शक्यते यत्पाणिनिवचन-सामर्थ्यादुभे संज्ञे पर्याये। कारकप्रकरणे सामर्थ्यात्प्रतीयमानस्य प्रकर्षयोगस्थानाश्रयणं भवति। परञ्चान्तरङ्गबहिरङ्गयोर्व्यवहारस्तु प्रचलत्येव[3] फलतः कर्म-सम्प्रदानयोः पर्यायत्वमावश्यकं भविष्यति।

सत्यमेव सम्प्रदानकर्मणोरुभयनिष्ठधर्मस्य विभेदः सूत्रस्थ 'कर्मणे'ति पदेन भवति यत्सम्प्रदानसंज्ञातस्यैव पदस्य भविष्यति यत्पदं करणरुप-कर्मणा सम्बद्धं स्यात्। गौरभिन्नकर्मणोपाध्याय एवाभिप्रेयमाणोस्त्यतः तस्यैव सम्प्रदान संज्ञा भविष्यति न गोः।

'कर्मणा सम्पृक्त' इत्येवं सम्प्रदानत्व स्वीकारेऽपि 'अजान्नयति ग्रामम्' घटकग्रामस्य सम्प्रदान संज्ञा न स्यात्। यद्यपि नयति क्रियायाः कर्माभिन्नाजेन ग्रामः सम्बद्धोऽस्ति। हेतोरस्य ज्ञानाय पूर्वमीमांसा घटकोमैत्रावरुणन्यायस्य ज्ञानमपेक्षितं वर्तते। एकावैदिकीविधिरस्ति-'क्रीते सोमे मैत्रावरुणायदण्डं प्रयच्छति'। अत्र द्वितीया-चतुर्थी विभक्ती समान वाक्ये विद्यमाने स्तः। अयं प्रश्नो यदनयोः का प्रधाना विभक्ति? पूर्वपक्षिणो दण्डस्य प्रधानतां कथयन् दण्ड-प्रदानक्रियां प्रतिपतिकर्म (शेषस्य गुणीभूत–पदार्थस्य विहितस्थले विनियोगः–क्रियमाणा क्रिया) कथयन्ति यतोहि दीक्षित-पुरुषेण हस्तेदण्डधारणे दण्डः कृतार्थो भवति द्वितीयया च तस्यैव प्रधानता प्रतीयते, न दानस्य। अतो—मैत्रावरुणस्य हस्त एव दण्डः प्रक्षेपणीयः।

१. कैयट २, पृ. २५६
२. उद्योत २, पृ. २५६
३. कैयट २, पृ. २५६

परञ्चोत्तरपक्षी द्वितीयाव्याख्यानमत्र 'तथायुक्तं चानीप्सितम्' इत्याश्रित्य कुरुते। यस्मादयं दण्डः प्रधानमीप्सितममं वा न बोधयति। सम्प्रदानञ्च चतुर्थ्यन्तमैत्रावरुणस्य प्राधान्यं दण्ड-प्रदानक्रियायाश्चाप्राधान्यं सिध्यति। शब्दान्तरे द्वितीया-चतुर्थ्यपेक्षया दुर्बलतरा यतोह्यर्थसामर्थ्येनार्थात् कर्तृसंयोग दृष्ट्या चतुर्थ्यामवस्थितोर्थः प्रधानोऽस्ति। फलतो दण्डप्रदानमर्थः कर्मास्ति (मैत्रावरुणसंस्कारकः) दण्डप्रदाने यद्यर्थ कर्म स्यात्तर्हि (सम्प्रदानस्य) चतुर्थ्याः प्राधान्यं भवति परञ्च प्रतिपत्तिकर्मदृष्ट्या चतुर्थ्यप्राधाना भवति[1]। न्यायप्रस्तुते व्युदाहरणेऽयमेवोपादेयः। 'यमभिप्रैति' घटकेन 'यं' पदेन शेषित्वमुद्देश्यत्वेन प्रतीयते। 'कर्मणे' ति पदेन गवादयः शेषत्वेन प्रतीयन्ते। शेषस्या-र्थोऽस्ति – अपरस्योद्देश्येन प्रवर्तमानो गुणीभूतः पदार्थः। अत्र (सम्प्रदान व्याख्यायां) कस्याप्युद्देश्येन भाव्यमानेच्छाया विषय एव 'शेष' पदेन कथ्यते[2]। 'ब्राह्मणाय गां ददाति' इत्यत्रोक्तकारणत्वाद् गौःशेषः[3]। तथोद्देश्याभिन्नो ब्राह्मणः शेषी। ग्रामं प्रत्यजां शेषं न वक्तुं शक्यते न चाजां प्रति ग्रामः शेषी, अतः सम्प्रदानस्यात्र प्राप्तिरेव नास्ति।

व्याख्यानस्यास्य फलितार्थो यदुद्देश्यः शेषी, अङ्ग्यर्थात् प्रधानो भवति, शेषो न। गोदानं ब्राह्मणसंस्कारकमस्ति। अर्थकर्मास्ति, परञ्चाजानयनम् न ग्रामसंस्कारकम्। यदि च दैवादिदं स्वीकुर्यात् तदपि परत्वाद्ग्रामस्य कर्मसंज्ञां स्वीकृत्य निर्वाहयन्तु।

(२) यदि सूत्रे 'यं...सः' इति पदयोरभावस्स्यात्तदा कर्मणाभिप्रैति सम्प्रदानमित्येतावानंशः स्यात्तदा सम्बन्धुमिष्यमाणस्य अथवा सम्बन्धेच्छुककर्तुरेव सम्प्रदान प्रसङ्गः स्यात्। यद्यप्यनयोरध्याहारेणैव सम्यगर्थः कर्तुं शक्यते। तथाप्यध्याहारस्य विशेषो नियमो यदृच्छया न भवति। यदा श्रूयमाणपदार्थानां परस्परसम्बन्धैर्निराकांङ्क्षबोधो न स्यादनुपपत्तिश्च भवति तदैव पदविशेषस्याध्याहारः

१. तुलनीय वै. भू. सा. काशिका पृ. ३८९
२. वै. भू. सा. पृ. ३८९
३. द्रष्टव्य – जै. सू. ३/१/२

क्रियते। प्रकृते 'यम्...स' इत्यनयोरभावेऽपि श्रूयमाणपदार्थसम्बन्धेन निराकांक्ष-बोधो भवति, अतो नास्त्यध्याहारस्यावश्यकत्वम्। प्रत्युतसएवानुपपन्नो भविष्यति[1]। अत एव कर्तुस्सम्प्रदानत्वातिप्रसङ्ग वारणायेमे पदे आवश्यके स्तः।

(३) अभिप्रैतीत्यत्र 'अभि + प्र + एतीति' पदत्रयं वर्तते। अत्र 'अनुव्यचलत्' इव समासाभावो यतोहि 'कुगतिप्रादय' (पा.२/२/१८) इति सूत्रे यानि वार्तिकान्येतादृशस्थले समासं सम्पादयन्ति (उदात्तगतिमता च तिङा) तेषामधिकारो वैदिकभाषायामेव न संस्कृते[2]। 'सह सुपा' (२/१/४) इत्यस्य व्याख्यावसरे विषयेऽस्मिन् दीक्षितो ब्रवीति यत्तिङन्तानां समासः केवलं वेद एव, यतोहि 'अनुव्यचलिदि'त्याद्युदाहरणे यत्र समासत्वात्प्राति-पदिकत्वेन सुप् प्रत्यायानामुत्पत्तिरावश्यकी भविष्यति तत्र छान्दसोऽयमिति व्यत्ययमाश्रित्यैव सुलोपं कर्तुं शक्यते। यदीत्थन्न करिष्यामः तर्हि पर्यभूषय-दित्यादि-हलन्तोदाहरणेषु 'सु' प्रत्ययस्य (यतोहि सामान्येन समासानन्तरं प्रथमैकवचनमेव क्रियते) लोपो वयं 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तंहल्' (पा. ६/१/६८) इत्यनेन कर्तुं शक्नुमः परञ्च 'यत्प्रकरोती' त्यादिषु लोपाभावे 'सु' इत्यस्य श्रवणापत्तिः स्यात्। आमस्त्युपायान्तरम्। समासं नपुंसकलिङ्गं स्वीकृत्य 'स्वमोर्नपुंसकात्.' (पा. ७/१/२३) इत्यनेन लोपो भवितुं शक्नोति। परञ्च नपुंसकत्वाश्रयणे 'यत्प्रकुरुते' इत्यादिषु 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्वापत्तिः भविष्यति। 'यत्प्रकुर्वीरन्' इत्यत्रापि 'नलोपः प्रतिपादिकान्तस्य' (पा. ८/२/७) इत्यनेन नलोपापत्तिः स्यात्[3]। अतो दीक्षितमते प्रभवतीत्यादिषु काव्यगतेषु प्रयोगेषूपसर्गः पृथक्पदम्, न समासा-वयवः। अतोऽपिप्रैतीत्यत्रापि पृथक्पदत्रयं वर्तते।

१. कैयट २, पृ. २५६
२. द्रष्टव्य – श. कौ. २, पृ.१२०
३. श. कौ. २, पृ. १६०, तत्त्वबोधिनी पृ.४४०

पतञ्जलिमहोदया 'अभिप्रैति' घटकाभि-प्र इत्यनयोरपि सार्थक्यं सिद्धयन्ति। अनयोरभावे 'कर्मणा यमेति स सम्प्रदानम्' इत्येवांशे सति वर्तमानकालीयान्युदाहरणान्येव दातुं शक्यन्ते। सन्निहित-पदार्थ एव सम्प्रदानसंज्ञा भवितुं शक्यते। यथा–'उपाध्यायाय गां ददाति'। 'एति' क्रिया वर्तमानकालं बोधयति। अत्रोक्तोपसर्गयोरुपादानादेव काल-विषयकं बन्धनं समाप्यतेऽतो भूत-भविष्यत्कालयोरपि सम्प्रदानसंज्ञा कर्तुं शक्यते। ध्यातव्यं यद्वचनस्याविवक्षितत्वेऽपि तस्य बोधो भवत्येव। यस्माद् 'विप्रेभ्यो गां ददाती'त्यत्र सम्प्रदानं भवति। अभिराभिमुख्यार्थकः यस्माद् भविष्यत्कालस्य बोधोऽपि च 'प्र' आरम्भार्थकः। अत एव यं पदार्थं कर्मणा भूत-वर्तमान-भविष्यत्कालेषु सम्बन्धुमिच्छति कर्तेत्यवगतं भवति तदा स सम्प्रदानसंज्ञां लभते[1]।

**क्रियासम्पृक्तेन सम्प्रदानम् –**

कात्यायनमहोदयाः पाणिनिसूत्रेऽस्मिन् क्रियामपि सम्बद्धुमिच्छन्ति यत्कर्मातिरिक्तं क्रियया सम्बध्यमानपदार्थस्यापि सम्प्रदान संज्ञा स्यात्। क्रिययाऽत्राकर्मिकैव ग्राह्येति तु कात्यायनाभिप्रायं सुस्पष्टम्, यतोहि सकर्मकस्थले कर्मणैव सम्प्रदानं सम्बन्धुं शक्यते तदा वार्तिकस्य वैयर्थ्यं स्यात्[2]। अतो वार्तिकेऽस्मिन्नकर्मकक्रियाया एवोदाहरणानि दत्तानि सन्ति। श्राद्धाय निगर्हते, युद्धाय सन्नह्यते, पत्ये शेते। यत्र सकर्मकक्रियायाः प्रयोगः स्यात् परञ्च कर्म श्रूयमाणं न स्यात् तत्र गम्यमानां क्रियामाश्रित्यैव पाणिनिसूत्रेणैव सम्प्रदान संज्ञा भवितुं शक्नोति। यथा–तस्मै (कथां) कथयति। विकल्पतः सकर्मकां क्रियामकर्मकमाश्रित्यापि प्रस्तुतवार्तिकेन निर्वाहः कर्तुं शक्यते। इदं विकल्पमेतदर्थं गृह्यते यन्नाना वैयाकरणाः सूत्रस्थे 'कर्मणा' शब्दे केवलं दानक्रियाकर्मणो ग्रहणं कुर्वन्ति, अन्यासां क्रियाणामग्रहणं कुर्वन्ति।

पतञ्जलिर्वार्तिकस्यास्य प्रत्याख्यानं कुर्वन्नस्योदाहरणानि सूत्रेणैवागतार्थानीति स्वीकरोति। लौकिके प्रयोगे क्रियैव कर्म भवति यतो हि 'कां क्रियां करिष्यति'

१. भाष्य २, पृ. २५६
२. तुलनीयम् (ल.श.शे. पृ. ४४१)

इत्यस्यार्थः-किं कर्म करिष्यति। किन्तु कर्मक्रिययोः पर्यायत्वमेव नालम् शास्त्रीय कर्म-क्रियार्थकलौकिककर्मणोरुपस्थित्योः शास्त्रीयं कर्मैव गृह्यते। कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति। अतो यावत्पर्यनतं क्रिया-बोधककर्मणः कृत्रिमत्वन्न सिद्ध्यति तावत्पर्यन्तं न वयं सोद्देश्या भविष्यामः पतञ्जलिमहोदयाः कथयन्ति यत्क्रियाऽपि कृत्रिमङ्कर्मैव, यतोहि कर्मणि क्रियाया प्रयोगस्सर्वैर्वैयाकरणैर्नाभिष्टः। कृत्रिमकर्मण उत्पत्तिः तदैव भवति यदा शास्त्रान्तरे लोके वा तस्य तादृक्प्रयोगन्नकुर्यात् केवले शास्त्रे विशेष एवास्य प्रयोगं भवतु। 'कर्तुरीप्सिततमं कर्म' इत्यनेन भाव्यमानं कर्म एव कृत्रिमम्। यदि प्रकारान्तरेण कर्मक्रिययोः पर्यायता सिद्धाऽपि स्यात् तदोक्तकर्मलक्षणभूतस्य सूत्रस्यासङ्गतिर्भविष्यति। तयैव क्रियया सैवक्रिया कथमीप्सिता भविष्यति। कालभेदेन-रुपभेदेन च कोऽपि पदार्थः किमपिकारकं भवितुं शक्नोति। किन्तु समानकाल एव सैव क्रिया कर्मकरणयोर्न भविष्यति। आब्धातुना बोध्यायाः क्रियायाः करणन्तु क्रियास्त्येव, यदि क्रिया तत्र कर्मापि स्यात्तदाऽसङ्गतेः प्राचुर्यं भविष्यति।

परञ्च भाष्यकारा असङ्गत्यामपि सङ्गतिं साधयन्ति यत्क्रिययापि क्रियेप्सिततमा भविष्यति यदि संदर्शनप्रार्थना-यध्यवसायादीनां प्रतीतिस्स्यात्। दूरदर्शी पुरुषः कस्यापि पदार्थस्य स्वीये मनसि संदर्शनङ्करोति-तदा तद्विषयिणीच्छा तस्य मनसि जागर्ति (प्रार्थना) अन्ते च निश्चयति यत्कार्यारम्भः स्यात् (अध्यवसायः) तदनुरुपं यतते किञ्चित् क्षणान्तरं कार्यसमाप्तिरपि भवति। अन्ते च फलं लभते। यावत्पर्यन्तं -सन्दर्शन-प्रार्थनाध्यवसायादीनि न भवन्ति तावत्पर्यन्तं-कोऽपि पुरुषः कार्यङ्कृत्वा तस्य फलन्न लभते। अत एव सर्वाः क्रियाः प्राप्तुमिच्छति कर्ता शब्दान्तरे क्रियाऽपि कर्तुरीप्सिततमा, एतदर्थमेव क्रिया कृत्रिमकर्मतां भजते। यतोहीप्सिततमं निवारयितुं शक्यते। (भाष्य २ पृ. २५७)।

**कर्म तथा सम्प्रदानम् : भेदाभेदविवक्षा —**

अभिप्रायोऽयं विद्यते यत् यत्र सम्प्रदानमभीष्टं वर्तते तत्र सन्दर्शनादेः मुख्य-क्रियायाश्च मध्ये भेदः विवक्षितः। अत एव ताभिः क्रियाभिः ईप्सितक्रियां कृत्रिमकथने न कापि आपत्तिः एवं तत्क्रियया सम्बध्यमानपदार्थः सम्प्रदानम् उच्यते। "पत्ये शेते"

इत्यत्र ज्ञातव्यम्[1]। अपरं च सम्प्रदानस्य विवक्षाभावेन उक्तभेदस्य विवक्षाऽपि नास्ति। फलस्वरूपम् उत्पत्तिविक्लित्तिरूपस्य कस्यचनैकस्य फलस्य निश्चप्रचं सीमान्तर्गतं खलु एकीभूतक्रियया यः पदार्थो व्याप्तो भवति। स च कर्म भवति। यथा - ओदनं पचति, कटं करोति। अत एव क्रियया सम्बद्धः सन् अपि कट ओदनादौ शब्दे सम्प्रदानत्वं नास्ति। अन्यथा क्रियया यमभिप्रेति० अनेन वार्तिकेन अत्रापि प्राप्तिरासीत्। गत्यर्थकधातो भेदाभेदयोः विवक्षा भवति। भेदस्य विवक्षायां सत्यां "ग्रामाय गच्छति" अभेदस्य विवक्षायां "ग्रामं गच्छति" इति प्रयोगः दृश्यते[2]।

अत्र भाष्यकारोऽपि कथयति यत् गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायाम् अनध्वनिः (पा.सू. २/३/१२) इत्यस्य प्रत्याख्यानं कृतं वर्तते यत् द्वितीया तु कर्मणि सिद्ध्यति। चतुर्थी सम्प्रदाने स्द्धियति, यतो हि "ग्रामाय गच्छति" इत्यत्र गमनक्रियया कर्ता ग्रामं सम्बन्धयति[3]। अस्यां भेदविवक्षायां भर्तृहरेः उक्तिः सर्वत्र उपजीव्यात्मकसन्दर्भे ग्राह्या अस्ति—

"भेदस्य च विवक्षायां पूर्वा पूर्वां क्रियां प्रति,
परस्याङ्गस्य कर्मत्वान्न क्रियाग्रहणं कृतम्।।
— वा.प. ३/६/१३१

यदा प्रधानक्रियायाः सन्दर्शनादिक्रियाः भिन्नरूपेण विवक्षिताः भवन्ति, तदा प्रत्येकम् पूर्ववर्तिक्रियां प्रति तस्योत्तरवर्ती अंगः कर्म भवति। एवं च कर्मद्वारा अभिप्रेयमाणमेव सम्प्रदानमस्ति।

---

१. 'भाष्यमते तु यत्र सम्प्रदानत्वमिष्टं तत्र सन्दर्शनादीनां क्रियायाश्च भेदो विवक्ष्यते। ततश्च तैराप्यमाना क्रियापि कृत्रिमं कर्मेति सिद्धम्। तयाभिप्रेयमाणस्य सम्प्रदानत्वम्'।
— श. कौ. २, पृ. १२१

२. तत्रैव – (श.कौ. २, पृ. १२१)

३. द्रष्टव्य (कैयटर, पृ. ४९६) – तत्र यदा गमनस्य सन्दर्शनादीनां च भेदो विवक्ष्येत तदा सन्दर्शनादिभिः क्रियाभिराप्यमानत्वात् कर्मणा गमनेनाभिप्रेयमाणस्य सम्प्रदानत्वाच्चतुर्थी भवति।

अत एव "क्रियया अभिप्रेयमाणम्" इत्यस्य पृथक् उपन्यासं विना भाष्यकारः सूत्रान्तर्गतं खलु अन्तर्भावयति। यथा– प्रधानक्रिया "गच्छति" वर्तते, तस्याङ्गः सन्दर्शनम्, प्रार्थना, अध्यवसायश्च वर्तते। सन्दर्शनक्रियया प्रार्थनाक्रिया ईप्सिततमा विद्यते। प्रार्थनाद्वारा अध्यवसायोऽस्ति। एतैः त्रीभिः प्रधानक्रिया आप्यमाना विद्यते। प्रार्थना, अध्यवसायः तथा सम्पूर्णगमनक्रिया कर्म विद्यते। इदानीं एतादृशेन कर्मणा सम्बध्यमानपदार्थस्य सरलतया संप्रदानसंज्ञा भवितुं शक्नोति। (हेलाराज २, पृ.३३५)

अत्रेयं शङ्कां कर्तुं शक्यते "ओदनं पचति" इत्यत्रापि कृत्रिमकर्मणः रूपे स्वीकृतक्रियया अभिप्रेयमाणः पदार्थः अर्थात् ओदनस्य सम्प्रदानसंज्ञात्वे असङ्गतिः स्यात्। समाधानन्तु क्रियाकर्मणः विद्यमानत्वे सति अपि ओदनस्य कर्मसंज्ञात्वे न काऽपि बाधा भविष्यति, यदि तत्राभेदस्य विवक्षा वर्तते चेत् –

"क्रियाणां समुदाये तु यदैकत्वं विवक्षितम्,
तदा कर्म क्रियायोगात् स्वाख्ययेवोपचर्यते" ।।
– वा.प. ३/६/१३२।

यदा सन्दर्शनाद्यवान्तरक्रियाणां समुदायः परस्परम् अङ्गाङ्गिभावेन विद्यमानं न स्यात्, समानकोटौ एव सर्वेषां स्थितिः स्यात्, येन समुच्चयं[१] भूत्वा एकमेव फलमुत्पन्नं कृत्वा। अर्थात् एकस्येव फलस्योत्पन्नत्वेन सम्पूर्णप्रधानक्रिया अङ्गीकर्तव्या। तदा भेदबोधकस्य क्रियाकारकभावस्य प्रतीतिः न भवति। फलतः एतादृशी क्रिया न कर्मभावं प्राप्नोति। एवं च एतादृशावस्थायां क्रियया सम्बद्धमानः पदार्थः स्वस्य मूलाख्याद्वारेव व्यवहृतो भवति, न तु सम्प्रदानसंज्ञया। अभेदविवक्षावन्तः जनाः अस्मिन् पक्षे समुच्चयद्वारा अभिधानं भवति, अत एव अवान्तरक्रियासु अङ्गाङ्गिनोः सम्बन्धो न भवति। प्रधानक्रियायाः अस्य च मध्ये अभेदबोधो भवति। अतः क्रिया कर्मरूपे न भवति।

सम्प्रति प्रश्नोऽयं खलु उदेति यत् अभेदविवक्षायान्तु अत्र कर्मसंज्ञा जाता, किन्तु यदि कोऽपि भेदविवक्षां करोति चेत् किम् "ओदनस्य" सम्प्रदानमपि

१. 'यत्र परस्परनिरपेक्षाणामनेकेषामेकस्मिन् क्रियादान्वयः स समुच्चयः'।
– न्यायकोश, पृ. ९७८

भवितुं शक्नोति? उत्तरञ्चेदं विद्यते न वेति विवक्षा नियतेव।

"भेदाभेदविवक्षा च स्वभावेन व्यवस्थिता
तस्माद् गत्यर्थकर्मत्वे व्यभिचारो न दृश्यते"।
– (वा.प. ३-६-१३३)

इदञ्च व्याकरणशास्त्रं प्रसिद्धानां लौकिकानां प्रयोगाणां समर्थयितुमुपायस्य परिकल्पनां करोति। अत एव एतान् प्रयोगान् दृष्ट्वा अस्माभिः इदं निश्चप्रचं वक्तुं शक्यते यत् भेदस्य अभेदस्य च विवक्षा नियता विद्यते। "पत्ये शेते" इत्यत्र केवलं भेदस्य विवक्षा वर्तते। "ओदनं पचति" इत्यत्र तु अभेदविवक्षा वर्तते। यदि "ओदनाम् पचति" इति प्रयोगः स्यात् चेत् अस्माभिः यादृच्छिकीं विवक्षां स्वीकर्तुं शक्यते। किन्तु एवं न भवति। अतः लौकिकप्रयोगस्य आधारं स्वीकृत्य विवक्षाऽपि नियतविषया स्वीक्रियते। गत्यर्थकधातुभिः सह उभयविधप्रयोगं दृष्ट्वा भेदाभेदयोः वैकल्पिकविवक्षास्वीकरणे उक्तनियमस्य उल्लंघनं न भवति। पतञ्जलेः प्रामाव्योरि एतान् सर्वान् अपि भर्तृहरिः अभीष्टमिति स्वीकरोति–

"विकल्पेनैव सर्वत्र संज्ञे स्यातामुभे यदि।
आरम्भेण न योगस्य प्रत्याख्यानं समं भवेत्"।।
(वा.प. ३/८/१३४)

यदि सर्वत्र विकल्पेनैव संज्ञाद्वयं भवेत् तदा भाष्यकारः "गत्यर्थकर्मणि०" (पा.सू. २/३/१२) अतिप्रसङ्गः जायते। किन्तु भाष्यकारस्य मनसि विवक्षायाः नियमः व्यक्तीकर्तव्य इति उद्देश्यमासीत्। आरम्भे प्रत्याख्याने च किमपि अन्तरम-स्वीकृत्य ते खण्डयन्ति। तच्च असङ्गतं विद्यते। फलतः उपर्युक्तप्रकारेण प्रयोगेषु भेदाभेदयोः नियतविवक्षा भवति। चेष्टायाः यत्र बोधो न भवति तत्र केवलं द्वितीया भवतीति तदपि अभेदविवक्षायाः अन्तर्गतमेव यथा–"मनसा पाटलिपुत्रं गच्छति" अध्वानं गच्छति इति। इयमेव स्थितिः "स्त्रियं गच्छति" "अजां नयति" इत्यादेः उदाहरणस्य विद्यते। यत् असम्प्राप्तकर्मरूपे गत्यर्थकर्मणः व्याख्याकरणेन समर्थितं भवति। गत्यर्थधातुनां कर्मणः अर्थस्तु गमनक्रियया इदानीमपि सम्प्राप्तो नास्ति, किन्तु

सम्प्राप्तो भविष्यतीति[1]। स्त्री, अजा च सम्प्राप्तं कर्म, यतो हि कर्ता प्रथमत एव स्त्रीम् अजाम् च प्राप्तवान् अस्ति। चेष्टायाः विद्यमानत्वादपि अत्र चतुर्थेः प्राप्तिः नास्ति। सम्प्राप्तकर्मणः असम्प्राप्तकर्मणश्च विभागः वस्तुतः कर्मणः सम्प्रदानस्य च महत्वपूर्णं व्यावर्तकतत्वं विद्यते। एतस्य प्रतीतिस्तु अस्मान् वैकल्पिकेषु उदाहरणेषु भवतीति।

"ग्रामं गच्छति" इत्यत्र गत्या सह लक्ष्यसम्प्राप्तेः अपि अर्थः तिष्ठति। "ग्रामाय गच्छति" इत्यत्र ग्रामस्य उद्देश्येन जायमानायाः गमनक्रियायाः एव बोधो भवति। "अध्वानं गच्छति" अत्रापि अध्वं सम्प्राप्तकर्म विद्यते येन द्वितीयायाः प्राप्तिः भवति। वस्तुतः व्यक्तिः मार्गे प्रथमत एव प्राप्तो विद्यते। अतः एनम् कर्म एव वक्तुं शक्यते। अपरं च यदि मार्गः प्रथमत एव सम्प्राप्तं न स्यात् तस्योददेश्येन कोऽपि यात्रां कुर्वन् विद्यते, तत्र "अध्वने गच्छति" इति प्रयोगः अवश्यं भवति।

"आस्थितप्रतिषेधश्च" (सं. १४२१) इति कात्यायनवर्तिकमपि वर्तते। अध्ववाचकस्य शब्दस्य बोधानन्त बोधे सति सामान्यतः चतुर्थी निषिध्यते, किन्तु एतच्च तदा भवति यदा मार्गः प्रथमतः एव प्राप्तः स्यात्। यदा उन्मार्गतः मार्गः गन्तव्यश्चेत् तदा "उत्पथेन पथे गच्छति" अथवा 'अध्वने गच्छति" इति प्रयोगः कर्तव्यः[2]। अस्मिन् विषये भर्तृहरोऽपि समर्थयति—

त्यागरूपं प्रहातव्ये प्राव्ये संगर्गदर्शनम्
आस्थितं कर्म यत्तत्र द्वैरुप्यं भजते क्रिया।।

(वा.प.३-६-१३५)

यं मार्गं प्रति चलन् वर्तते, स चास्थितो विद्यते। गमनक्रियायाः सम्बन्धेन तत् कर्म अस्थितकर्म विद्यते। एतादृशमार्गेण सम्बद्धमानायाः गमनक्रियायाः रूपद्वयं भवति। अतिक्रमणस्य योग्यमार्गस्य विषये क्रियारूपं त्यागात्मकं भवति। किन्तु यो

१. असम्प्राप्तं यद्वस्तु गमनेन सम्प्रप्स्यते तस्मिन् कर्मणीत्यर्थः।
— प्रदीप (कैयट), पृ. ४९६

२. "यो क्षुत्पथेन पन्थानं गच्छति, 'पथे गच्छति' इत्येव तत्र भवितव्यम्"। (उद्योत)
— 'एवकारो भिन्नक्रमः। इति तत्र भवितव्यमेवेत्यर्थः'। — भाष्य २, पृ. ४९५

भागः इदानीमतिक्रान्तो नास्ति, सच आसाद्यः प्राप्यो वा वर्तते। तद्विषये क्रियारूपं संसर्गात्मकमेव भवति। अस्य त्यागरूपस्य ग्रहणरूपस्य च अविच्छिन्नप्रवाहः गमनक्रियायाम् चलति। रूपद्वयं गमनक्रियायाः अभिन्नतया सम्बन्धयति।

क्रियायाः भेदाभावे पूर्वोक्तेन अभेदविवक्षायाः विधिना अयं अध्वः कर्मभूतक्रियया न सम्बधयति। एवं च सम्प्रदानसंज्ञायाः विषयो न भवितुं शक्नोति। अत एव "अध्वानं गच्छति" इति प्रयोगो दृश्यते। ग्रामादयस्तु नाध्वरूपाः।

अत्रेदं ज्ञातव्यम् यत्र मार्गोऽनास्थितः स्यात्[1] तत्र अवश्यमेव विभक्तिद्वयं प्राप्नोति। इदं च तदा सम्भवति यदा एकस्मिन् एव मार्गे गमनबोधो न स्यात्। एतादृशावस्थायां त्यागग्रहणरूपयोः पार्थक्यं स्पष्टमेव तिष्ठति। क्रिया न एकरुपा तिष्ठति। उत्पथः त्यागः पथः च ग्रहणमिति क्रियायाः रुपद्वयमिदं प्रतीयते। एकस्मिन् एव मार्गे चलनेन रूपद्वयस्य अविच्छिन्नप्रवाहः न प्रतीयते।

कर्मणः सम्प्रदानस्य च विनिमयविवेचने न सम्बद्धं वार्तिकमेकं विद्यते – "कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा" (सं. १०९६) अत्र कर्मणः करणसंज्ञा सम्प्रदानस्य कर्मसंज्ञा विधीयते। यथा "पशुं रूद्राय ददाति" इत्यर्थे "पशुना रूद्रं यजते" इति प्रयोगो भवति। अत्र यजनक्रिया न पूजार्थिका अपितु दानार्थिका विद्यते।

कैयटः इदं वार्तिकं छन्दोविषयकं मनुते, यतो हि लोके तु उक्तक्रिया पूजार्थे भवति, येन पशुः कारणरूपे एव सिद्ध्यति। वैदिकोदाहरणत्वात् भट्टोजिदीक्षितः अत्र सुपः व्यत्ययं स्वीकृत्य खण्डनीयमिति कथयति (श. कौ. २, पृ. १२१)।

**दानक्रिया तथा सम्प्रदानम् : अन्वर्थसंज्ञकता —**

पाणिनितन्त्रे सम्प्रदानस्य अन्वर्थसंज्ञकतोपरि मतद्वयं स्पष्टं विद्यते। पतञ्जलेः कथनं विद्यते यत् सम्प्रदानस्य महासंज्ञात्वात् अपि नान्वर्थसंज्ञात्वम्। भर्तृहरि-जयादित्य-भट्टोजिदीक्षिताद्याचार्याः सम्प्रदानस्य अन्वर्थसंज्ञात्वमेव स्वीकुर्वन्ति। केवलं

१. द्रष्टव्य — हेलाराज ३, पृ. ३३७-३८

दानार्थकक्रियया सम्बद्धस्वीकरणेन एव सम्प्रदानस्य अन्वर्थता भवति। प्रत्युत सम्यक्-रूपेण प्रदानमेव अत्र निहितं वर्तते। दानं नाम किम्? इति प्रश्ने, उच्यते "स्वत्वनिवृत्ति-पूर्वकं परस्वत्वोत्पादानमेव दानम्" इति। अर्थात् स्वत्वनिवृत्तिः परस्वत्वोत्पादनं चेति क्रियाद्वयं दानान्तर्गतं विद्यते।

यावत्पर्यन्तं क्रियाद्वयं न भवति तावत्पर्यन्तं सम्यक् प्रदानमिति वक्तुं न शक्यते। तत्रान्तरे आचार्यः "पूजा-अनुग्रह-काम्या" इत्यादेः दानस्य कारणेषु स्वीक्रियते[१]।

पुरुषोत्तमदेवस्य अनुसारं भावस्य शुद्धिं कुर्वन् गुरु–देवता–ब्राह्मणानां सम्मानं यत् ध्यानं–प्रणाम–दानादिभिः क्रियते सा एव पूजा इत्युच्यते। कुरूप--प्रमत्त-धनहीनान् धृणाप्रदर्शनम् अकुर्वन् यत् दानसम्मानद्वारा पूर्ण क्रियते सः अनुग्रह इत्युच्यते। एवमेव प्रकारेण कस्यचित् फलस्य दानयज्ञजपादि यत् कायिकं कर्म क्रियते तत् विद्वद्भिः काम्याधीनम् स्वीकृतं वर्तते[२]।

यद्यपि पतञ्जलिः मुख्यवृत्तितः अन्वर्थसंज्ञकतायाः निरासनं न करोति, तथापि अस्य मतस्य ग्रहणपक्षे इमाः युक्तयः भवितुं शक्नुवन्ति।

(क) क्रियाग्रहणवतां वार्तिकानां खण्डनेन इदं प्रतीयते यत् पतञ्जलिः सम्प्रदानग्रहणे सम्यक् प्रदानन्तु दूरमेव केवलं दानस्य ग्रहणे उदासीनो वर्तते। ते तु सकर्मक-क्रियायाः अकर्मकक्रियायाश्च ग्रहणसूत्रे एव कर्तुम् इच्छन्ति। केवलं दानं न क्रियायाः। स्पष्टं वर्तते यत् सम्प्रदानम् दानक्रियापर्यन्तमेव सीमितं नास्ति।

(ख) "गत्यर्थकर्मणि" (पा. २/३/१२) इत्यस्य व्याख्याने गत्यर्थकधातुना सह अपि सम्प्रदानं भवति। अस्य पुष्टिं ते कुर्वन्ति।

(ग) भाष्यकारस्य केचन प्रयोगाः सन्ति। यथा "न शुद्राय मतिं दद्यात्",

१. 'पूजानुग्रहकाम्याभिः स्वद्रव्यस्य परार्पणम्। दाने, तस्यार्पणस्थानं सम्प्रदानं प्रकीर्तितम्'।।
— रामतर्कवागीश, मुग्धबोध टीका (सू. २९४)

२. पुरुषोत्तम, कारकचक्र, पृ. १०९

"खण्डिकोपाध्यायः शिष्याय चपेटां ददाति" एतेषामुदाहरणानां सम्यक्प्रदानस्य समीक्षे यदि स्थाप्यते चेत् स्थितिः स्पष्टेव ज्ञातुम् शक्यते। स्वस्य स्वत्वत्यागं कृत्वा अन्येभ्यो दातव्यमिति अर्थस्तु कुत्रापि नास्ति[1]।

आचार्यभर्तृहरेः हेलाराजस्य अनुसारं सम्प्रदाने प्रदानार्थस्य निहितत्वात् इयं संज्ञा अन्वर्थसंज्ञा विद्यते। यद्यपि क्रियाग्रहणवतां वार्तिकानाम् अपि वाक्यपदीये कारिकाबद्धं कृतं वर्तते। किन्तु भाष्यकारस्य केवलं व्याख्यानेन प्रयोजनं वर्तते। न तु तेषां समर्थनेन।

हेलाराजस्तु स्पष्टं कथयति "अन्वर्थत्वात्सम्प्रदानशब्दस्य त्यागाङ्गमिति लक्षणलाभः" (पृ. ३३१) इति। भर्तृहरेः सम्प्रदानस्य लक्षणं विद्यते त्यागाङ्गं कर्मणेप्सितम् इति। अर्थात् स्वत्वोत्पत्तिकरणमेव त्याग इति। अस्य त्यागस्य अङ्गं निमित्तं वा सम्प्रदानं विद्यते। किन्तु केवलमेतावत्कथनेन हस्तपादादीनामपि सम्प्रदानत्वं भवितुं शक्नोति। अत एव विशेषणरूपे "कर्मणा ईप्सितम्" इत्यपि उक्तं वर्तते।

यत् कर्म त्यागस्य विषयो विद्यते, तेन कर्ता यं प्राप्तुमिच्छति तत् सम्प्रदानमित्युच्यते। वस्तुतस्तु इदं पाणिनिसूत्रस्यैव प्रकारान्तरेण कथनं वर्तते, किन्तु पाणिनेः "कर्मणा" इति शब्देन विभिन्नक्रियाणाम् कर्मरूपे अस्य व्याख्यानस्य अवकाशः वर्तते। भर्तृहरिस्तु एतत् "त्यागकर्मणा" अथवा "दानकर्मणा" इत्यस्मिन् रूपे सीमितं करोति। अयमेवार्थः काशिकायाम् जयादित्यस्य दीक्षितस्य च स्वग्रन्थे स्वीकार्यः विद्यते।। इति।।

### नव्यन्याये सम्प्रदानविवेचनम् : उद्देश्यत्वम् —

पाणिनेः "अभिप्रेति" इति प्रयोगात् नव्यन्यायग्रन्थेषु सम्प्रदानमित्यस्यार्थः उद्देश्यत्वं स्वीकृतं वर्तते[2]। किन्तु उद्देश्यमात्रं न सम्प्रदानम्। अत एव कौण्डभट्टः उद्देश्यविशेष एव सम्प्रदानमिति कथयति। भवानन्दोऽपि विषयेऽस्मिन् वदति यत्

१. कैयट २, पृ. २५७।

२. 'उद्देश्यः सम्प्रदानचतुर्थ्यर्थः'। – वै. भू. पृ. ११२

"तत्क्रियाकारणीभूत-कर्मजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वम् इति"। एतदनुसारं कस्याश्चित् क्रियायाः कारणरूपे यत् गवादि कर्म स्यात् तेनोत्पद्यमानस्य फलस्य अधिकारी सन् यदुद्देश्यं भवति तदेव सम्प्रदानमित्युच्यते। इयमेव उद्देश्यस्य विशिष्टता वर्तते। लक्षणेऽस्मिन् "तत्क्रियाकारणीभूतम्" इति विशेषणपदम् "चैत्रो ग्रामं गच्छति" इत्यत्र चैत्रादेः सम्प्रदानत्वं वारयति। अत्र गमनाक्रियायाः कर्मणः उत्पद्य-मानस्य फलस्य अधिकारित्वेन चैत्रः उद्देश्यन्तु वर्तते किन्तु ग्रामः गमनक्रियायाः कारणं भवितुं न शक्नोति। गमनैकदेशस्य संयोगस्य तु कारणं भवितुं शक्नोति, न तु केवलं गमनस्य। सम्प्रदानं न भवितुं शक्नोति।[१] "विप्राय गां ददाति" "वृक्षेभ्यो जलं सिञ्चति" इत्यत्र लक्षणसमन्वयः पूर्णतो भवति। यतो हि दानसिञ्चनक्रियायाः कारणं गौः। जलादि कर्म च विद्येते। एतत्कर्मणः उत्पन्नफलस्य अधिकारिरूपे विप्रः वृक्षश्च उद्देश्यो वर्तते। अतः सम्प्रदानमस्ति। यदि लक्षणेऽस्मिन् कर्मपदाभावे कर्मणोऽपि सम्प्रदानत्वापत्तिः। यथा "ओदनं पचति" इति। अत्र पाकक्रियारुपकारणेन उत्पद्यमानस्य विक्लितिरूपफलस्य अधिकारित्वे ओदनमेवोद्देश्यं वर्तते। अतः तत् संप्रदानमुच्यते, किन्तु पाकक्रियायाः कारणरूपकर्मणः उत्पन्नफलस्य अधिकारी स नास्ति। भाष्यकारोऽपि "कर्मणा" इत्यस्य पदकृत्ये एतादृशीमेव वार्ता खलु उक्तवान् अस्ति।। इति।।

**स्वत्वविचारः —**

आचार्यो नागेशः स्वत्वपदार्थस्य दार्शनिकं विवेचनं करोति, यस्योपयोगः जयरामस्य कारकवादनामके ग्रन्थेऽपि जातोऽस्ति[२]। नव्यनैयायिकैः सह सहमति स्थापयन् नागेशः स्वत्वस्य अतिरिक्तपदार्थत्वं स्वीकरोति। इदं च स्वत्वं दानक्रियया नश्यति, प्रतिग्रहक्रियया च उत्पद्यते।

१. 'ग्रामं गच्छतीत्यत्र गमनकर्मजन्यफलभागित्वेनोद्देश्यस्य चैत्रादौ सत्वात्, चैत्रादेस्तत्क्रियायां सम्प्रदानत्वाभावात् तद्वारणाय कारणीभूतेति'। — कारकचक्र, पृ. ५५-६

२. द्रष्टव्य — ल.म.कला, पृ. १२६४ एवम् कारकवाद पृ. २६-२७।

कस्यचन वस्तुनः इच्छानुकूलः विनियोगः कर्तुं शक्यते चेत् तदा तदुपरि अस्माकं स्वत्वं वर्तत इति वक्तुं शक्यते। सत्यमिदम् अवश्यं वर्तते शास्त्रेषु अस्य विनियोगस्य निषेधः न भवितव्यः। इदं च स्वत्वं क्रयविक्रयादीनां विषयो भवति। अर्थात् स्वत्वं क्रेतुमपि शक्यते विक्रयः कर्तुमपि शक्यते। नव्यप्राचीनयोः विषयेऽस्मिन् मतभेदो दृश्यते यत् इदञ्च स्वत्वं बाह्येन्द्रियैः ज्ञातुं शक्यते न वा? । प्राचीनाचार्याः प्रतिग्रहादेः मानसज्ञानरूपत्वं स्वीकुर्वन् बहिरिन्द्रियस्य अविषये स्वीकुर्वन्ति। किन्तु नव्याचार्याः एतत् खण्डयन्ति यत् प्रतिग्रहादेः नाशानन्तरमपि स्वत्वस्य व्यवहारः भवत्येव। दानक्रियया स्वत्वनिवृत्तिः, प्रतिग्रहक्रियया स्वत्वोत्पत्तिः तु सर्वैः ज्ञायत एव।

"स्वं पश्यामि" अनेन प्रयोगेणापि इदमेव सिद्ध्यति। कस्यचन स्वत्वस्य साक्षात्कारः तदा भवति यदा मम एतज्ज्ञानं भवतु इति इच्छानुकूलविनियोगस्य योग्यता अत्र स्यात्[१]। जयराजस्य अनुसारं स्वत्वानुमितिरेव भवति, न तु साक्षात्कारः। स्वत्वस्यालोकिकविषयितया युक्तेः तत्साक्षात्कारे विशेषदर्शनस्य हेतुत्वे कल्पनागौरवं स्यात् (कारक पृ.२७) "स्वं पश्यामि" इत्यस्य अनुव्यवसायस्तु "सुरभिचन्दनं पश्यामि" इतिवत् विशेषणांशे लौकिकविषयेण सहैव सम्बद्धो भवति।।

१. 'तत्साक्षात्कारे च तदीयस्वत्वव्याप्य – तदीययथेष्टविनियोग्यत्व वदिदमिति ज्ञानं हेतुः'। ल.म.पृ. – १२६५

# ॥ अपादान-कारकम् ॥

**व्युत्पत्तिः —**

अप एवं आङ् उपसर्गपूर्वकाद् दानार्थकदाधातोः भाववचने ल्युट् प्रत्ययं विधाय अपादानशब्दो निष्पद्यते, अस्य निर्वचनम् – 'अपादीयते पृथक् क्रियते' अर्थात् पृथक्करणम्। आदानशब्दः ग्रहणधारणादिषु संश्लेषात्मकार्थेषु प्रयुज्यते, किन्तु अपादानशब्दः तद्विपरीतः विश्लेषात्मकार्थेषु प्रयुज्यते। सामान्यतया सम्प्रदानापादानशब्दौ परस्परं सम्बद्धौ वर्तते। एतावेव उभयोः कारकयोः आधारो वर्तते।

**पाणिनीयलक्षणम् —**

अपादानस्य उक्तलौकिककार्थः शास्त्रीयार्थेन अनिवार्यतया सम्बन्धेसत्यपि भिन्नः वर्ते। पाणिनेः अपादानलक्षणम् - 'ध्रुवमपायेऽपादानम्' (१/४/२४)। अपायः = विभागजनको व्यापारः। तदनाश्रयम्। विभागश्च वास्तवसम्बन्धपूर्वको वास्तव एव, किन्तु बुद्धिपरिकल्पितोऽपि संबन्धपूर्वको बुद्धिपरिकल्पितोऽपि। यथा 'माथुराः पाटलिपुत्रकेभ्य आढ्यतराः' इत्यादौ बुद्धिपरिकल्पितापायाश्रयेणैव भाष्ये पञ्चमी साधिता। ध्रुवम् = स्थिरम्[१]। पतञ्जलिनाऽपि एषः अर्थः स्वीकृतः, यद्यपि कालान्तरे वैयाकरणैः अवधिरुपार्थे (यतः विभागः आरभते) परिभाषितम्। तथा च सूत्रगत-ध्रुवपदस्य अर्थः–विभागजनकक्रियानाश्रयत्वे सति विभागाश्रयत्वं ध्रुवत्त्वम्। हरिरप्याह

'अपाये यदुदासीनं चलं वा यदि वा चलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते'।।

सूत्रार्थस्तु–विश्लेशे सति यः पदार्थः ध्रुवम् = स्थिरं भवेत् तद अपादानं कथ्यते। यथा - 'वृक्षात् पर्णं पतति'। वृक्षपर्णयोः विभागे पर्णस्य अस्थिरता वृक्षस्य स्थिरता विवक्षिताऽस्ति, अतः वृक्षः अपादानम् अस्ति।

सूत्रे यदि 'ध्रुव' शब्दस्य प्रयोगो न भवेत् तदा 'ग्रामाद् आगच्छति शकटेन'

१. 'ध्रु गतिस्थैर्ययो इत्यस्मात्कुटादेः पचाद्यच्। ये तु ध्रुव स्थैर्ये इति पठन्ति तेषामिगुपधलक्षणः कप्रत्ययः'। — श. कौ. २, पृ. ११५

अस्मिन् वाक्ये विश्लेशमात्रस्य आधारेण शकटस्याऽपि अपादनत्वम् उच्यते स्म, किन्तु अध्रुवत्वात् शकटस्य अपादानत्वन्न। तथा 'ग्रामादागच्छन् कांसपात्र्यां पाणिनौदनं भुङ्क्ते' अस्मिन् वाक्ये 'कांसपात्री' इत्यत्र अपादानत्वं कर्तुमशक्नोत्, किन्तु विश्लेषे सत्यपि ध्रुवत्वाभावे नेदम् अपादानम्। अत्रोच्यते यत् परत्वात् करणाधि-करणसंज्ञौ नेदम् अपादानम्। अत्रोच्यते यत् परत्वात् करणाधिकरणसंज्ञौ अपादान-संज्ञायाः प्राप्तिम् अवरुन्धः। अत एव सूत्रस्थस्य 'ध्रुव' पदस्य प्रयोजनं दर्शनाय पतञ्जलिः अपराणि उदाहरणानि ददाति – वृक्षस्य पर्णं पतति, कुड्यस्य पिण्डः पतति। पतनक्रियायाः सत्त्वाद् अत्र आपाततः अपायस्य प्रतीति र्भवति, किन्तु वस्तुतः अपायो नास्ति। वृक्षपर्णे न पृथग् भवतः न च कुड्यपिण्ड्योः वियोगोऽपि विवक्षितोऽस्ति। ध्रुववस्तुनः सत्तां विना गतिमात्रम् अपायं नोच्येत। लौकिकदृष्ट्या अपाये सत्यपि ध्रुवत्वम् अविवक्षितं वर्तते, अतः अत्र वृक्षकुड्ययोः अपादानसंज्ञा न भविष्यति।

**ध्रुवस्य शास्त्रीयता अवधेः अनिवार्यता –**

यदि ध्रुवस्यार्थः स्थिरः अचलश्च स्वीक्रियते चेत् "वृक्षात्पर्णं पतति" इत्यत्र अचलतया अपादान संज्ञा वृक्षादेः भवितुं शक्नोति। किन्तु गतिशीलपदार्थेषु अपादानसंज्ञा कथं भवेत्? यथा "रथात्प्रवीतात् पतितः" "अश्वात् त्रस्तात्पतितः" "सार्थाद् गच्छतो हीनः" इत्यादी गतिशीलपदार्थाः रथ-अश्व-सार्थादयः निश्चप्रचं अपादानसंज्ञकाः सन्ति। एतेषां का व्यवस्था स्यात्?

कात्यायनः कथयति यत् अत्रापादानत्वं स्वीकर्तुं शक्यते यतो हि अत्र अध्रुवत्वं अविवक्षितं वर्तते[१]। अर्थात् वक्ता एतेषां पदार्थानां खलु अध्रुवजे सत्यपि ध्रुवत्वं स्वीकर्तुम् इच्छति। परन्तु इदं कथम् भवितुं शक्नोति यत् स्पष्टतः परिस्पन्दित-पदार्थस्य ध्रुवत्वं स्वीकार्यम्।

पतञ्जलिः वदति यत् अश्वे विद्यमानम् यत् अश्वत्वम्, आशुगामित्वं वर्तते तदेव ध्रुवपदार्थः। निश्चयमेव ते एकरूपतायाः ध्रुवत्वं स्वीकुर्वन्ति[२]। यतो हि अश्वस्य उपर्युक्तः धर्मः सदैव एकरूपः विद्यते, स च धर्म शान्तो वा त्रस्तो वा भवतु। कैयटः कथयति एतादृशेषु उदाहरणेषु प्रथमं कारकस्य क्रियया सह अन्वयो भवति। स चान्वयः श्रुतिगम्यो विद्यते। इदानीं विशेषणेन सह वाक्यगतसम्बन्धो भवति। एवं प्रकारेण यदि "अश्वात् पतितः" इत्यत्र अश्वे अध्रुवता नास्ति चेदनन्तरं त्रस्तेन सह अन्वये सति अश्वस्य अन्तरङ्गसंज्ञायाः निवृत्तिः न भवति। येन तस्य अध्रुवत्वं पूर्ववत् भवति। त्रस्तशब्दस्य अपादानतत्वविषये इदं वक्तुं शक्यते यत् तत्र अपादानस्य अविद्यमानत्वेन विशेष्यानुरोधेन विभक्तिः उपयुज्यते। न तु अनियमेन[३]। "त्रस्तम्" इत्यत्र विभक्तिसाधनस्य उपायानन्तरमपि कैयटः प्रदर्शयति, तच्च नागेशानुसारेण भाष्यस्य स्वारस्यं विद्यते। तच्चेदं वर्तते त्रस्तमित्यस्यापि अपादानत्वं भवतु। यतो हि त्रासस्य अपेक्षया तत्र यद्यपि अध्रुवत्वं स्यात् किन्तु पतनक्रियां पश्यन् एव तत्र ध्रुवत्वम् अस्त्येव। इयमेव कल्पना परवतिर्वैयाकरणानां विवेचनेषु विकसिता जाता।

एवमेव प्रकारेण रथे सार्थे च ध्रुवत्वस्य बोधः कर्तुं शक्यते। रथे रथत्वजातिः वर्तते रमन्तेऽस्मिन् इति रथः इति व्युत्पत्तिरियं अर्थ एव ध्रुवत्वेन विवक्षितः। सार्थे सार्थत्वजातिः विद्यते, तथा सहार्थाभावः ध्रुवपदार्थो वर्तते।

---

१. 'न वाऽध्रौव्यस्यविवक्षितत्वात्'। १/४/२४ ........ वार्तिक

२. ध्रुवमेकरूपमुच्यते – कैयट २, पृ. २४९

३. 'विशेषणस्यासत्यप्यपादानत्वे सामयिकी विभक्तिः।
सा च विशेष्यानुरोधेन प्रवर्तते, न त्वनियमेन'।। – तत्रैव (कैयट २, पृ.२४९)

किन्तु व्यवस्थेयं तत्रैव सम्भवति यत्र क्रिया प्रवृत्तिनिमित्ता न स्यात्। यदि क्रिया शब्दस्य व्यवहारिकार्थउपरि चलेत् – यथा "धावतः पतितः" "त्वरमाणात्पतितः" तदा अपादानत्वसाधकस्य ध्रुवस्य मर्यादा कुत्र भवेत्[१]? पतञ्जलिः अत्रापि अध्रुवत्वस्य अविवक्षां व्यवस्थापयति। लोके सत्पदार्थस्य अविवक्षा असत्पदार्थस्य विवक्षा इति एतयोः द्वयोः उदाहरणं मिलति। "समुद्रः कुण्डिका" "विन्ध्यो वर्धितकः" अत्र पदार्थः वस्तुतः न तथा वर्तते तथापि विवक्षा तु वर्तते। अतः अवस्थिततत्वादपि अध्रुवत्वस्य अविवक्षा लोकिकव्यवहारे न नूतना।

एवं प्रकारेण पतञ्जलिः अपादानसंज्ञायाः सूत्रेषु ध्रुवस्य अपायस्य च द्वयोः व्यावहारिकार्थं स्वीकृत्य समस्तानां संभाव्यप्रयोगाणां व्याख्यानं करोति। अनन्तरकालिनवैयाकरणैः उभयमपि पारिभाषिकार्थरूपेण स्वीकृतं वर्तते। अस्मिन् विषये भर्तृहरेः महत्वपूर्णं योगदानं वर्तते। किन्तु तन्नाम्ना अनेकाः कारिकाः सन्ति ताः च अपादानप्रसङ्गे वैयाकरणैः उद्धृतं वर्तते। तत् वाक्यपदीयस्य वर्तमानसंस्करणे न प्राप्यते। तथापि तेषामपादानस्य विवेचनं समस्तपरवर्तिग्रन्थकाराणां कृते प्रत्यक्षेण परोक्षेण वा उपजीव्यं वर्तते, इत्यत्र न कोऽपि सन्देहो विद्यते। प्रस्तुतध्रुवत्वस्य भर्तृहरिः द्रव्यस्य स्वभावः अर्थात् निष्क्रियार्थरूपं न स्वीकरोति। पतञ्जलेः "अश्वत्व" आशुगमित्वेत्यादिव्याख्यया असम्मतिं प्रदर्शयन् अपायस्य विषयः ध्रुवपदार्थः इति स्वीकरोति[२]। "धावतोऽश्वात्पतितः" अस्मिन् वाक्ये अपायबोधिका क्रिया "पतितः" वर्तते। अस्य कर्ता अश्वो नास्ति, अपितु अश्वः तां क्रियां प्रति उदासीनो विद्यते। पतनक्रियायाः अनावेशत्वात् अश्वत्वस्य ध्रुवत्वं निर्विवादं विद्यते[३]। नव्यव्याकरणग्रन्थेषु भर्तृहरेः नाम्ना अस्याः कारिकायाः बहुधा उद्धरणं वर्तते।

१. 'ये त्वेतेऽप्यन्तं गतीयुक्तास्तत्र कथम्। धावतः पतितस्त्वरमाणात्पतित इति'।।

— भाष्य २, पृ. २४९

२. 'द्रव्यस्वभावो न ध्रौव्यमिति सूत्रे प्रतीयते। अपायविषयं ध्रौव्यं यत्तु तावद् विवक्षितम्'।।

— वा.प. ३/७/१३८

३. 'ध्रुवं कूटस्थं निष्क्रियमिति द्रव्यस्वभावः। ध्रुवताश्वस्य तत्रास्त्येव'

— हेलाराज २, पृ.३४०

"अपाये यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते"।।

अस्य उदाहरणं प्रदर्शयितुं अन्योऽपि श्लोको विद्यते—

"पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।
तस्याप्यश्वत्वस्य पतने कुड्यादि ध्रुवमिष्यते"।।

एतेषां श्लोकानां भाव: हेलाराज: प्रकटीकृतो वर्तते, भर्तृहरि: अपि समर्थयति एतम्।

अभिप्रायोऽयं विद्यते पूर्वोक्तक्रमेण विश्लेषक्रियां प्रति उदासीन: निरपेक्षश्च स्यात् स च चलो वा भवतु अचलो वा भवतु। स एव ध्रुवपदार्थ:। यतो हि तस्य विश्लेषबोधकक्रियया साक्षात् सम्बन्धो नास्ति। अत एव ध्रुवस्य भेदद्वयं वर्तते, अचल: चलश्चेति अपरे श्लोके चलरूपध्रुवस्येव सोदाहरणव्याख्या वर्तते। "कुड्यात्पततोऽश्वात्पतति" इत्यत्र विश्लेषणहेतो: क्रियाद्वयं विद्यते। "पतति" इत्यनेन बोध्य: कोऽपि द्वितीयपतनक्रियाया: कर्ता वर्तते, य अश्वोपरि आरूढो विद्यते। येन अश्वेन स व्यक्ति: पतति तस्य एतादृशीं क्रियां प्रति उदासीनत्वात् ध्रुव: वर्तते। अर्थात् व्यक्ते: पतनक्रियां प्रति अश्व: ध्रुवो विद्यते। किन्तु स एव अश्व: "पतति:" इत्यनेन बोध्य: पतनक्रियां प्रति कर्ता अस्ति परन्तु ध्रुवो नास्ति। एतां क्रियां प्रति निरपेक्षत्वात् कुड्यं खलु अवश्यं ध्रुव: विद्यते। एवं प्रकारेण ध्रुवपदस्य निर्गलितार्थो जात: यत् विश्लेषहेतुकक्रियाया: प्रयोगेण य: पदार्थ: तां क्रियां प्रति उदासीन: स्यात् स एव ध्रुवपदार्थ: भर्तृहरिणा ध्रुवाध्रुवयो: भेद: प्रदर्शितो विद्यते—

"सरणे देवदत्तस्य ध्रौव्यं पाते तु वाजिन:।
आविष्टं यदपायेन तस्या ध्रौव्यं प्रचक्षते"।। (वा.प.)

अश्वे समेवतक्रियाया: सत्वात् येन प्रकारेण देवदत्ते ध्रुवत्वं वर्तते, यतो हि तया क्रियया स: अप्रभावितो विद्यते, तथैव देवदत्ते समवेतपतनक्रियाया: विद्यमानत्वात् तेन अप्रभावितेन अश्वे अपि ध्रुवत्वं वर्तते।

अत्रेदं स्मर्तव्यं यत् अश्वस्य धावनेन देवदत्तस्य लौकिकदृष्ट्या ध्रुवत्वं यद्यपि उच्येत, किन्तु परिभाषिकध्रुवत्वस्याभावे तस्य अपादानसंज्ञात्वं न भवति। कारणं चेदं वर्तते ध्रुवत्वं जायते चेदपि अवधिरूपे देवदत्तस्य ग्रहणं न भवति। यदि तत्र ग्रहणं क्रियेत तदा "सरतो देवदत्ताद् धावत्यश्वः" इति प्रयोगापत्तिः अवश्यमेव स्यादेव। इयं चावधिः ध्रुवं लोकप्रयुक्तार्थतः दूरीकृत्य शास्त्रीयार्थे व्यवस्थितं करोति। तदनुसारं इयं विभागस्य सीमाद्वारा अपायद्वारा च अनाविष्टपदार्थरूपे ध्रुवस्य नियतं करोति।

अवधेः महत्वमेतावदधिकं विद्यते यत् एतस्याभावे कामपि गतिम् अपायत्वेन वक्तुं न शक्यते[1]। स्पष्टतः अपायोऽपि सावधिगत्यर्थम् एव प्रयुक्तो भवति तेन पारिभाषिकः शब्दः सिद्ध्यति।

"वृक्षस्य पर्णं पतति" वाक्येऽस्मिन् वृक्षात् सम्बद्धपर्णस्य पवनं विवक्षितं वर्तते। वक्ता वृक्षं खलु अवधिरूपे स्थापयितुं नेच्छति। अत एव अपादानमूलकपञ्चमी अपि नास्ति। अपायस्य विवक्षात्वेन वृक्षः अवधिः इति भवति। तदेव "वृक्षात् पर्णं पतति" इति प्रयोगः सम्भवति। एतादृशस्थितौ एतद् ज्ञानं न भवति यत् पर्णं केन सह सम्बद्धं वर्तते। षष्ठ्याः उदाहरणे वृक्षस्य विवक्षा पर्णस्य विशेषणत्वेन जाता वर्तते। अस्यार्थस्तु अयं प्रयोगः तदा भवति यदा शाखायां स्थितं पर्णं वृक्षस्य त्यागं विना भूमेः स्पर्शं करोति। अतः अवधिहीना गतिः अपायो भवितुं न शक्नोति। अन्यथा उक्तवाक्ये अपादानसंज्ञा भवितुं शक्नोति स्म[2]।

ध्रुवस्य पर्यायत्वेन प्रयुज्यमानस्य उदासीनशब्दस्य व्याख्यां कुर्वन् पुरुषोत्तमदेवः अधिकं स्पष्टयति। ते कथयन्ति, अपायस्य विषये या अविचलता वर्तते स एव ध्रुवपदार्थः। "धावतोऽश्वात् पतति देवदत्तः" इत्यत्र देवदत्तस्य पतनेन अश्वस्तु न

---

१. 'गतिर्विना त्ववधिना नापाय इति कथ्यते। वृक्षस्य पर्णं पततीत्येवं भाष्ये निर्दिशितम्'।।

— वा.प. ३/७/१४३

२. एतस्माच्चावसीयते – सावधिकगतिरपायो, न शुद्धा। अन्यथावध्यविवक्षायामप्यत्रापायसम्भवादपादानत्वं स्यादेवेति ज्ञापकमेतत्।

पतति। यदि अश्वोऽपि पतेत् तदा "अश्वदेवदत्तौ पततः" इति प्रयोगः स्यात्। पतनक्रियायामनुप्रवेशाभावात् अश्वस्य उदासीनत्वमेव ध्रुवत्वं वर्तते। सम्प्रति एका शङ्का उदेति यत् यदि अयं ध्रुवः क्रियां प्रति उदासीनः स्यात् तदा कारकं भवितुं न शक्नोति। यतो हि कारकं घटनारूपं भवति, उदासीनत्वं तु घटितं न भवति। तस्य घटितत्वे उदासीनतोपरि आक्षेपः स्यात्[१]। अस्योत्तरं पुरुषोत्तमदेवः ददाति यत् सर्वाणि कारकाणि स्वगतक्रियया प्रधानक्रियायाः निमित्तानि भवन्ति। इदं च सर्वसम्मतं वर्तते। यथा – पाकक्रियायां काष्ठादीनां ज्वलनक्रियया एव निमित्तानि भवन्ति, तथैव "ग्रामाद् देवदत्तः आगच्छति" वाक्येऽस्मिन् ध्रुवरूपो ग्रामोऽपि अवस्थान-क्रियया देवदत्तस्य आगमनं प्रति निमित्तं भवति सत्यमिदं यत् ग्रामोऽवस्थितो वर्तते, तथापि सः प्रधानक्रियायाः निर्वतकत्वात् कारकं वर्तते। शब्दान्तरे ग्रामः स्वस्य अनागमनेन देवदत्तस्य आगमनं प्रति निमित्तं वर्तते। सर्वेषामपि कार्याणां काश्चन कारणसामाग्र्यः भवन्ति। अत्र स्वक्रियया उदासीनरूपेणं साधनेन साध्यत्वात् अपायरूपस्य कार्यस्य इयमेव कारण सामग्री विद्यते[२]। पुनः शङ्का भवति यत् अवस्थानं गतिनिवृत्यर्थरूपे आगच्छति, तत् च अभावरूपपदार्थः वर्तते। अस्य क्रियात्वं कथं वक्तुं शक्यते? उत्तरमिदं वर्तते यत् वैयाकरणैः धात्वर्थ एव क्रियेति स्वीक्रियते। अतः धातुना अभिहितत्वात् अभावोऽपि क्रिया वर्तते, यथा-"नश्यति" इत्यनेन अभिधेयरूपा क्रिया अभाव एव वर्तते। यदि अभावरूपस्य क्रियात्वं न स्वीक्रियते चेत् "अवतिष्ठते" "नश्यति" इत्यत्र अक्रियार्थकस्य धातुसंज्ञा भवत्येव न।

उदासीनस्यार्थः विद्यतेऽत्र यत् आगमनक्रियां प्रति सः कर्ता नास्ति। देवदत्तः गच्छति, ग्रामः देवदत्तस्य अनुगमनं न करोति। तथापि सः अपायस्य निमित्तं तु वर्तते एव। अपायः कश्चन एकः सम्बन्धो विद्यते। यस्य सिद्धिः सम्बन्धद्वयेन भवति।,

१. 'ध्रुवं न कारकं मन्ये नोपकारि गतौ यतः। अपायाधारभूतोऽसौ स क्रियश्च न कथ्यो'।। – पुरु. कारकचक्र, पृ. १११

२. 'कस्यचित्कार्यस्य कियत्यपिसामग्री, स्वक्रियोदासीनसाधनसाध्यत्वाद् अपायस्येयती सामग्री'।

कदा कदा परस्परं खलु अवधिभावस्य विवक्षा न भवति। एकशब्दस्य ग्रहणं कृत्वा उभयत्र विद्यमानायाः क्रियायाः संयुक्तरूपेण विवक्षा भवति, यथा "पर्वतात् मेषावपसर्पतः" अथवा परस्परस्मात् मेषावपसर्पतः इति। विषयेऽस्मिन् भर्तृहरिः कथयति—

"अभेदेन क्रियैका तु द्विसाध्या चेद्विवक्षिता।
मेषावपाये कर्तारौ यद्यन्यो विद्यतेऽवधिः।।"

वा.प. ३/७/१४२

कर्तृद्वयेन सम्पाद्या क्रिया यदि एकात्मत्वे प्रतीयते चेत् मेषद्वये क्रियायाः आवेशेन कर्तृत्वं सिद्ध्यति। यद्यपि एतादृशस्थितौ अपायो वर्तते तथापि कस्यापि एकस्य अवधित्वं वक्तुं न शक्यते। अत एव अत्रापादनकारमपि न भवति। ध्रुत्वत्वे पर्वतादिः यदा अवधित्वेन भवति तदा अपायस्य कर्ता मेष एव भवति। पर्वतस्य परस्परस्य च ध्रुवत्वस्याधारोपरि अपादानसंज्ञा जाता वर्तते।

दीक्षितः कोण्डभट्टश्च "परस्परस्मान्मेषावपसर्पतः" इत्यत्र प्रत्येकं ध्रुवं कर्तारमिति स्वीकुर्वन् एकस्मिन् मेषे विद्यमानां गतिं नीत्वा मेषान्तरस्यापादानत्वं जातं वर्तते[१]। नागेशट्टेन अत एव स्वस्य परमलघुमञ्जुषायाम् भूषणकारस्य मतानुवादं कृत्वा प्रबलं खण्डनं कृतं वर्तते।

१. 'तथा परस्परस्मान्मेषावपसरत इत्यत्र सुधातुना गतिद्वयस्याप्युपादानात् एकमेषनिष्ठां गतिं प्रत्यपरस्यापादानत्वं सिध्यति'। — श.कौ.२, पृ. ११५

## अपादान भेदाः

परवर्तीनि सूत्राणि प्रचञ्चानीति स्वीकर्तारोऽपादानभेदान् प्रचारितवन्तः। तेषाम्मते सर्वेऽपादानभेदाः त्रिषु भेदेष्वेव निहितास्सन्ति। निर्दिष्ट विषय-उपात्तविषय-अपेक्षित क्रियाणि एतान्येव त्रयो भेदाः। एतेषां सर्वप्रथमोल्लेखो वाक्यपदीये (३/७/१३६) अभवत्। अधो भेदानां तेषां निरुपणं भवति।

(क) निर्दिष्टविषयमपादानम्–

निर्दिष्टविषयमपादानं तत्रैव भवति यत्र धातुना साक्षाद्विभागनिर्देशः स्यात्[१]। अस्मिन्नपादान विषयः स्वधातुना व्यक्तङ्क्रियते। यथा-ग्रामादागच्छति, पर्वतादवरोहति, अश्वात्पतति। नागेशमते 'घटाद्भिन्न' इत्यत्रापीत्थमेवापादानम्, यतोहि सूत्रघटकापायशब्दस्य भेदोप्यर्थः। यथा 'पञ्चमी विभक्ते' (पा. २/३/४२) घटकविभक्तस्य भेदोऽर्थः तथैव यदा वक्ता भेदमूलकं सम्बन्धम् अभिव्यक्तुमिच्छति तदा घटगतभेदोऽपि तस्य विषयो भवितुं शक्नोति। धातुपाठे य'भ्दिदिर-विदारणे' इति पठितमस्ति तत्र विदारणं भेदज्ञानस्यापि विषयः। तात्पर्यमिदं वर्तते यद्विदारणेन भौतिकबौद्धिकावुभौ भेदौ प्रतीयते। 'घटाद्भिन्न' इत्यत्र बौद्धिकभेदमादायैवापादनं जातम्। एकत्वेन यदि वस्तुनः ग्रहणं कुर्यात् भौतिक दृष्ट्या भेदज्ञानाऽभावस्स्यात्तर्हि बौद्धिक भेदमाश्रित्या-पादानसंज्ञा कर्तुं शक्या[२]। भिन्नशब्दस्यैव पर्यायेणान्यशब्देन सहापादानसंज्ञा न भवति यतोहि 'घटादन्यः' इत्यत्र कापि क्रिया कारकत्वस्य समर्थनाय नास्ति। अतः क्रियाऽभावे 'घटःपटो न' इत्यत्र पञ्चम्यभावः। नञः भेदार्थकत्वेऽपि स क्रियारुपोन। 'घटादन्य' इत्यत्र तु 'अन्यारादिरर्तेदिक्शब्दाञ्चूत्तर-पदाजाहियुक्ते' (२/३/२९) इत्यनेनो-पपद-पञ्चमीविभक्तेः प्राप्तिरपि भवति 'घटःपटो न' इत्यत्र तु तादृक्किमपि नास्ति[३]।

१. द्रष्टव्यम् – (क) यत्र धातुनापायलक्षणो विषयो निर्दिष्टः। उद्योत– पृ.२४८
(ख) यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम् – वै.भू., पृ.१११

२. तुलनीयम् – ल.म.पृ.१२९१

३. तुलनीयम् – ल.श.शे. पृ. ४५६

(ख) उपात्तविषयमपादानम् –

यत्र वाक्यस्थो धातुरेतादृक्स्वार्थं प्रकटयतु यदपरस्माद्धातोरर्थे घटकतया प्रविष्टस्यात्तदुपात्तविषयमपादानम्[1]। अपरस्यधातोरर्थोऽप्रधानः प्रधानो वा भवितुं शक्नोति यथा–बलाहकाद् विद्योतते। द्युत्धातोर्विद्योतनमर्थः। इदन्निसरणक्रियाङ्गभूत-मर्थाद् बलाहकान्निसृत्य ज्योतिर्विद्योतते। अयमर्थः फलति। इत्थन्निसरणक्रिया प्रधानाऽ-प्रधाना च विद्योतन क्रिया।

हेलाराजोऽवान्तरक्रिया विद्योतन-क्रिययोर्मिथोऽङ्गाङ्गिभावं स्वीकरोति। निः-सरणाङ्गभूतं विद्योतनमथवा विद्योतनक्रियाङ्गभूतं निःसरणम्। अस्मिन्नेवार्थे वि उपसर्गपूर्वको द्युत् धातुः प्रयुज्यते। इत्थं निःसरणाश्रितोऽपायोविद्योतनक्रियाया प्रधानावस्थायामप्रधानावस्थायामुपात्तो भवति[2]। नागेशमतेऽस्याः क्रियाया अर्थः विभाग जन्य संयोगानुकूलक्रियाऽभिन्न–निःसरणानन्तरं विद्योतनरूपो व्यापारः। अतः उक्त-प्रयोगस्य शाब्दबोधोऽप्यनयैवरीत्या कर्तुं शक्यते। बलाहकापादानक–विभागजन्य--संयोगानुकूल क्रियोत्तर कालिकं विद्युत्कर्तृकं विद्योतनम्। (ल.म.पृ.१२९०)

धूम-ज्योतिःसलिल-मरुतां सन्निपातो मेघः। यदा कश्चित्पुरुषोमेघावयव-ज्योतिर्भेदं विवक्षते तदा ज्योतेः भेदस्य विवक्षितत्वेन मेघोऽवधि र्भवति। पुनश्च यदि मेघे ज्योतेराधारत्वविवक्षीतदा (बलाहके विद्योतते) मेघे–आधार सप्तम्यपि भवति। अन्ते यदि कोऽपि मेघ-ज्योत्योरभेदं विवक्षतां यज्ज्योतिस्वरूपत्वेनास्मिन् प्रकाशनस्य सामर्थ्यमस्ति, तथा च जलाद्यङ्गीभूतपदार्थानां प्रतिबन्धकत्वेनाविवक्षास्यात्तदा 'बलाहको विद्योतते' इत्यपि भवति। अत्र क्रियायाः स्वाधीनाश्रयत्वेन रूपेण मेघः क्षमो वर्तते।

अपादानस्यास्योदाहरणं 'कुसूलात्पचति'। आदानाङ्गभूतः पाकोऽत्र पच्धात्वर्थः। यश्चापायेन सम्बद्धाऽऽदानक्रिया सा प्रधाना। 'कुसूलादादाय पचति'। इत्थमेव ब्राह्मणात् शंसतीत्यत्र ग्रहण-क्रियाङ्गं शंस्धात्वर्थः। अतोऽर्थः–ब्राह्मणाद्गृहीत्वा

१. उपात्तः क्रियान्तरस्य गुणभावेन प्रधानभावेन वा यत्रापायलक्षणो विषयस्तदुपात्तविषयं हेलाराज – ३ पृ.३३८ २. हेलाराज - ३ पृ. ३३८

शंसति। पतञ्जलिमतयिदमुपातविषयापादानस्योदाहरणम्। कात्यायनमहोदयास्तु 'ब्राह्मणाच्छंसी' शब्दे द्वितीयार्थे पञ्चमीति स्वीकृत्य तस्या अलुक्च स्वीकुर्वन्ति[1]।

(ग) अपेक्षितक्रियमपादानम्–

यत्र क्रियापदन्नश्रुतिगोचरमपितु प्रतीयमानं स्यातत्रापायविषयोऽपेक्षितक्रियमपादानमुच्यते। क्रियायाः प्रतीतिश्श्रूयमाणपदैरेव भवति[2]। यथा–सांकश्यकेश्यः पाटलिपुत्रकाः अभिरूपतराः। अत्र 'विभक्ता' इति क्रियापदस्य प्रतीतिर्भवति[3]। प्रकर्षप्रतीतित्वादत्र विभागहेतुः सांकाश्यः। अतोऽपायबोधिकाऽपकर्षणक्रियाऽनुमीयते। उपात्तविषयेऽपादाने धातुनैवापायः सूच्यते क्रियातु प्रतीयमानाऽपेक्षिता वा भवति। अपादानस्यास्य विषये दीक्षित–कौण्डभट्ट–नागेशानाम्मते समानान्येव लक्षणोदाहरणानि। कस्यचित् प्रत्यक्षागमनं मनसि निधाय पृच्छति 'कुतो भवान्?' उत्तरयति–पाटलिपुत्रात् उभयत्रागमनक्रियापेक्षिता। कस्यचिन्मुख्यविषयस्यानुपादानादाकांक्षा भवति। अतआकांक्षया एव प्रेरितोभूत्वा क्रियाध्याह्रीयते। कारक विभक्तेः प्राप्तिस्तु गम्यमानक्रियामाश्रित्यैव भवति–अतः कारकत्वोच्छेदनन्नशङ्कनीयम्।

**अपादानसंज्ञायाः अन्यानि सूत्राणि –**

(१) "भीत्रार्थानां भयहेतुः" (पा.सू. १-४-२५) इत्यस्मिन् सूत्रे भीशब्दः त्राशब्दश्च (१) एताभ्यां धातुभ्यामेव क्विप्–प्रत्ययं कृत्वा निष्पन्नो वर्तते। अत एव अयमर्थः जातः भयार्थे त्राणार्थे च जायमानधातूनां योगे भयहेतुकारकमपादानं भवति। यथा – "वृकेभ्यो बिभेति" "चौरेभ्यः त्रायते" इत्यादि। विषयेऽस्मिन्

---

१. 'ब्राह्मणानि ग्रन्थविशेषरूपाणि यः शंसति स कथ्यते ब्राह्मणाच्छंसीति वृत्तिविषयेऽत्र द्वितीयार्थे पञ्चमी वक्तव्या। भाष्यकारस्तु ब्राह्मणाद् गृहीत्वा आहृत्य शंसतीत्याहरणाङ्गे शंसने शंसिर्वर्तते इत्युपात्तविषयमेतदपादानं मन्यते'।

– हेलाराज, ३, पृ. ३३८-३९, भाष्य (६/३/२)

२. यत्र क्रियावाचि पदम् न श्रूयते, केवलं क्रिया प्रतीयते–कैयट २, पृ.२४८

३. तुलनीय - बुद्ध्या समीहितैकत्वान् पञ्चालान् कुरुभिर्यदा।
पुनर्विभजते वक्ता तदापायः प्रतीयते ।। पा.प. ३/७/४

भाष्यकारः कथयति यत् विचारं कृत्वा कार्यं कुर्वाणः व्यक्तिः पश्यति यदि वृकः चौरश्च तं पश्यतः चेत् अवश्यमेव मृत्युः भविष्यति। कैयटः अत्रोपात्तविषयस्य अपादानत्वे स्वीकरोति, यतो हि भयक्रिया निवृत्तक्रियायाः अङ्गं विद्यते। चौराद् बिभेति = चोरान्निवर्तते। भयस्य अर्थाः बहवः भवन्ति। आकुलीभाव इति कैयटः अनिष्टसम्भावनेति गदाधरः। अनिष्टज्ञानमिति नागेशः। वैयाकरणमतेन बोधो भविष्यति यत् – "चोरापादानकमनिष्टज्ञानम्" इति। अनिष्टपरिहारोऽपि वक्तव्यः। प्रथमः भयार्थकः द्वितीयस्तु त्राणार्थकः। एतयोः द्वयोः अर्थेषु अनिष्टबोधात् भयहेतोः अर्थः अनिष्टहेतुः अनिष्टजनको वा स्वीकारे उपयुक्तो वर्तते। किन्तु प्रश्नोऽयं विद्यते यदि भयस्य अर्थः अनिष्टज्ञानं वर्तते चेत् भयहेतोः अनिष्टहेतुत्वकथनं कथं सम्भवति? अधिकाधिकं वयं अनिष्टज्ञानस्य हेतुं भयहेतोः अर्थः इति वक्तुं शक्नुयामः। इमामेव शङ्कां मनसि स्थापयन् नागेशः भयहेतोः अर्थं करोति यत् – भयस्य एकदेशस्य अनिष्टहेतुभवनम्। अस्यां स्थितौ गदाधरः अपादानस्य व्यवस्थां सर्वत्र करोति। शत्रोः भयाद् यदि मित्राद् अनिष्टसम्भावना प्रसक्ता स्यात् तदा "मित्राद् बिभेति" इति कथने न काऽपि आपत्तिः। अनिष्टं च सर्वत्र अनुगतदुःखस्य अर्थे स्वीक्रियते। कदाचित् केनचन पदार्थेण उत्पद्यमानं दुःखं सर्वेषु पुरुषेषु प्रसिद्धं न भवति। यथा सर्पादेः। एतैः उत्पद्यमानेन दुःखेन कोऽपि अनभिज्ञः न भवति। अस्यां स्थितौ स्वानुभवस्य आधारं स्वीकृत्य भयस्य त्राणस्य च प्रयोगं कृत्वा पञ्चमी विभक्तिः कर्तुं शक्यते[१]। नागेशोऽपि कथयति येन उत्पद्यमानभयम् लोकप्रसिद्धं न स्यात् तत्र अपादानाश्रितपञ्चमी विभक्ती न भवितुं शक्नोति। किन्तु एतादृशः प्रयोगः यदि अभीष्ट एव अस्ति चेत् तत्र हेतुत्वस्य आरोपं कर्तुं शक्यते, यथा – "कण्टकाद् बिभेति" इति। इदञ्च स्मरणीयम् भयस्य लोकप्रसिद्धिः देशकालापेक्षा वर्तते। आरोपस्याश्रयं नीत्वैव "अन्तरिक्षेण जुहोति" "परमाणुं न पश्यति" इत्यादिप्रयोगाः समीचीनाः। अन्यथा असम्भवस्य पदार्थस्य बोधो निषेधो वा सर्वथा

१. 'यज्जन्यं दुःखं कस्यापि न प्रसिद्ध्यति तादृशस्याहिकण्टकादेर्यद्यपादानत्वमिष्यते तदातन्निष्ठस्वदुःखोपधायक–व्यापार–विरहानुकूलव्यापारस्तदपादानकं स्वकर्मकं रक्षणमिति वक्तव्यम्'। – व्यु. वा. पृ. २५५-५६

असम्भवः वर्तते। महाभाष्ये भयपूर्वकनिवृत्तेः, त्राणपूर्वकनिवृत्तेश्च अर्थे एते धातवः स्वीकृताः सन्ति। तच्च नागेशोऽपि स्वीकरोति। अत एव मञ्जुषायाम् शाब्दबोधकरणे नागेशः कथयति यत् —

(१) "बुद्धिप्राप्तचौरापादानिका प्रत्यासत्या तद्भयपूर्विकां निवृत्तिः"।

(२) "बुद्धिप्राप्तचौरापादानिका प्रत्यासत्यानिष्टपरिहारफलिका निवृत्तिः"। इति वाल्मीकिना "कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे" इति प्रयोगः कृतो वर्तते। अत्र अपादानत्वस्य अविवक्षया षष्ठ्याः समर्थनं कर्तुं शक्यते, किन्तु आचार्योदीक्षितः अत्र "कस्य संयुगे" इत्यस्यान्वयं कृत्वा भयहेतोः समस्यामेव समापयति। संयुगेऽपि अपादानस्य शङ्का न कर्तव्या, यतो हि परत्वस्य कारणात् अधिकरणमपादानस्य बाधकं भविष्यति।

(३) "पराजेरसोढः" (पा.सू. १-४-२६) परापूर्वकस्य "जि" इति धातोः प्रयोगे यः पदार्थः असह्यरूपे विवक्षितो भवतु तदेव अपादानमुच्यते। "असोढः" इत्यस्य व्युत्पत्तिस्तु नञ् + सह् + क्त इति। परा + जि इत्यस्य प्रयोगस्तु प्रायः अभिभवार्थे आगच्छति, यथा – "शत्रूनाराजयते"। किन्त्वत्र एतत् असहिष्णुतार्थे गृह्यते। इदं च "असोढः" इति प्रयोगेण ध्वनितं भवति। यथा– "अध्ययनात्पराजयते" इत्यत्र धातुः अकर्मको वर्तते। अत एव एतत् न्यूनीभावार्थे शक्तिवैकल्यार्थे च स्वीकृतं वर्तते।

पतञ्जलिः उदाहरणस्यास्य व्याख्याने कथयति यत् विवेकी पुरुषः अध्ययनं दुःखदं दुर्घरं च मनुते गुरुणां स सम्यक्तया उपचारोऽपि न कर्तुं शक्नोति। इत्थं विचार्य तस्मात् निवृत्तो भवति। अतः बौद्धापायं स्वीकृत्य मुख्यसूत्र एव अस्य अन्तर्भावः भवितुं शक्नोति। इदं च अत एव उपात्तविषयः अपादानं वर्तते यत् "परा + जि" इत्यस्मात् बोध्या पराजयक्रिया निवृत्तक्रियायाः अङ्गं वर्तते। शक्तिवैकल्येन स व्यक्तिः अध्ययनात् निवृत्तयति। "असोढः" इति शब्दे क्तप्रत्ययः यद्यपि भूतकालिकः तथापि कालोऽत्र अविवक्षितो वर्तते। कालान्तरेषु अपि उदाहरणं भवितुं शक्नोति, यथा "अध्ययनात्-



SMT. HANSA MEHTA LIBRARY The M.S. University of Baroda

-पराजेष्यते" इति। दीक्षितः "असोढ" इति शब्दं व्यर्थं मनुते, यतो हि अस्य प्रयोजनं यत् "शत्रून् पराजयते" इत्यत्र पञ्चम्याः वारणम् इति। तच्च अन्यथाऽपि सिद्ध्यति[1]। अस्य समाधानं ज्ञानेन्द्रसरस्वती करोति यत् यत्र कर्मत्वस्य विवक्षा न भवति तत्र शेषे षष्ठीं प्रबाध्य पञ्चमी भवितुं शक्नोति। तद्वारणाय "असोढः" इत्यस्योपस्थितिः सूत्रे अनिवार्या विद्यते[2]।

नागेशः नव्यन्यायस्य विश्लेषणपद्धतिं स्वीकृत्य एतासां शङ्कानां समाधानमत्यन्तं सूक्ष्मेक्षिकया प्रस्तौति। उक्तोदाहरणे धात्वर्थोऽस्ति यत् कृतेः असाध्यताज्ञानस्य समानाधिकरणतद्विषयकस्य उत्साहस्याभावः। यस्य व्यक्तेः अध्ययनस्य असाध्यताज्ञानं वर्तते, तत्रैव अध्ययनं प्रति उत्साहस्याभावोऽपि वर्तते।

विषय एवात्रापादनं वर्तते। अस्मिन् मते शाब्दबोधस्तु एवं भवति, अध्ययनापादानको देवदत्तकर्तृक–उत्साहाभावः। नागेशः प्रकारान्तरेण तत्पूर्वकनिवृत्तिरूपे धात्वर्थं मनुते। आशयस्तु अयं विद्यते यत् उत्साहाभावानन्तरे विषयेण निवृत्तिः एव धात्वर्थो विद्यते। एतच्च भाष्यकारमतस्य समर्थनं वर्तते। "शत्रून् पराजयते" इत्यत्र धातोः अर्थः स एव नास्ति योऽर्थः अत्र विद्यते। अत्र पराजयस्य अर्थस्तु तिरस्कारस्यानुकूलो व्यापार इति। इदमेव कारणं यत् फलस्य व्यापारस्य च आश्रयः भिन्नः भिन्न वर्तते, अतः अत्र क्रिया सकर्मकरूपा। व्यापराश्रयः कर्ता तथा फलाश्रयः कर्म वर्तते। नैयायिकैः पूर्वोदाहरणे अनिष्टस्य धात्वर्थत्वं स्वीकृतं वर्तते। शाब्दबोधश्च भवति "अध्ययनेन उत्पद्यमानमनिष्टम्"। नागेशः अस्य प्रत्याख्यानं करोति यत् (१) अस्माकं मते एतादृशो बोधानुभवो न भवति, अध्ययनेन अनिष्टं जातमिति ज्ञात्वा कोऽपि ततः पलायनं क्रियेत इति। (२) पुनः "असोढः" इत्यनेन नैयायिकानां सम्मतार्थस्य प्राप्तिः न भवति। पतञ्जलिस्तु उक्तवान् व्यक्तिः स्वस्य मनस्येव अध्ययनस्य असाध्यता तथा दुर्धरता इति द्वयोः विचारं कृत्वा तस्माद् दूरे

१. 'वस्तुस्तु असोढग्रहणंव्यर्थम्, शत्रून्पराजयते इत्यत्र परत्वात्कर्मसंज्ञासिद्धेः'।

– श. कौ. २, पृ. ११८

२. तत्वबोधिनी, पृ. ४५३

तिष्ठति। एवं च अध्ययनस्य सर्वथा अप्रवृत्तत्वात् अपि एतादृशः प्रयोगः भवितुं शक्नोति। (३) अन्ते यदध्ययनमपि नारब्धम् तदपि अनिष्टमुत्पादयेत्। कार्यस्योपत्यर्थं कारणस्य सत्ता आवश्यकी भवति प्रकृते सत्ता आवश्यकी भवति। प्रकृते असदध्ययनेन अनिष्टप्राप्तेः प्रसङ्गेन इदं न्यायमतं भ्रामकं विद्यते इति।

(३) वारणार्थानामीप्सितः (पा.सू. १/४/२७) वारणार्थकधातोः प्रयोगे क्रियया यं प्राप्तुमिच्छति तदपि अपादानम्। यथा – "यवेभ्यो गां वारयति" इत्यत्र गोः वारणार्थो वर्तत तस्य प्रवृत्तेः विधातकरणमिति। पतञ्जलिः "माषेभ्यो गां वारयति" अनेन उदाहरणेन ईप्सितस्य व्याख्यां करोति। यस्य व्यक्तेः पार्श्वे माषः भवतु गोः मास्तु, तस्य व्यक्तेः माषः ईप्सितः भवितुं शक्नोति, किन्तु यस्य पार्श्वे केवलं गोः विद्यते माषः नास्ति चेत् तस्य कृते तु गोरेव ईप्सितो भवति। यतो हि तत् गवाम् वारणं करोति, अतः माषः तस्य ईप्सितस्तु वर्तत एव। वारणक्रियायां परकीयत्वेऽपि माषाणां वारणकर्ता ईप्सितं मनुते यत् एतेषां नाशो मा भवतु। अत एव स्वस्यगाः तेभ्यः भिन्ना कथ्यते[१]। अभिप्रायोऽयं विद्यते अत्र यस्य वारणक्रियया प्राप्तुम् अभीष्टं स्यात् तदेव इप्सितम् इति। अत्रैव भाष्यकारः "कूपादन्धं वारयति" इत्यत्र कूपस्य ईप्सितत्वं साधयति। वारणकर्ता एतत् पश्यति कुत्रचित् अन्धः कूपे न पतेत्। अतः वारणक्रियायाः ईप्सितः कूप एव वर्तते। यथा गवां वारणे शस्यविनाशं मनसि निधाय विचार्यते यत् गावः माषक्षेत्रे न गच्छन्तु, तथैव अत्र अन्धस्य विनाशः मनसि स्थाप्यते।

भाष्यकारः प्रकारान्तरेणापि कूपस्येप्सितत्वं साधयति। तदनुसारं वारणकर्तुः कूपस्य ईप्सितत्वं नास्ति अपितु अन्धस्य वर्तते[२]। वस्तुतः इयं व्याख्या सूत्रार्थं

१. 'तत्र वारणक्रियया परकीया अपि भाषा वारयितभिष्टा भवन्ति, मा नशन्नेते इत्येतेभ्योऽसौ गा वारयति'। – कैयट २, पृ. २५१

२. 'ईप्सित इत्यनेन कर्मणा कर्तृमात्रस्याक्षेपान्निवार्य माणस्यान्धस्य गमनादिक्रियया कूप आप्तुमिष्टो भवतीति प्रवर्ततेऽउपादानसंज्ञा'। – कैयट २, पृष्ठ-२५१

स्पष्टयति यत् वारणक्रियायाः कर्मणः ईप्सितमपादानं भवति। अन्धस्य किमपि दर्शनं न भवति, अत एव तस्य यथा कूपेतरस्थानं खलु ईप्सितं वर्तते तथैव कूपोऽपि वर्तते। सः अन्धः किं जानीयात् अहं कूपं प्रति गच्छन् अस्मि अथवा मार्गं प्रति गच्छन् अस्मि। द्वयं तस्य कृते समानरूपेणेप्सितं वर्तते।

"अग्नेर्माणवकं वारयति" इत्यत्र माणवकस्येप्सितत्वात् अपादानस्य प्राप्ति-प्रसङ्गे सति वक्तुं शक्यते कर्मसंज्ञायाः परवर्तित्वात् अपादानं बाधयति। किन्तु एतादृशस्थितौ अग्नेरपि अपादानत्वं बाधितं स्यात्। अत एवोक्तं कर्मणः यदिप्सितं तदेवापादानमिति[1]। कात्यायनः कथयति कर्मणः लक्षणे ईप्सिततमम् इति प्रयोगोऽस्ति। तत्र प्रकर्षविवक्षा वर्तते। कर्मसंज्ञायाः अवकाशः वारणार्थभिन्ने धातौ वर्तते। अपादानस्य अवकाशः प्रकर्षहीने ईप्सितपदार्थे विद्यते। यत्र द्वयं प्रसज्येत, तत्र तदा ईप्सिततमे परत्वस्य कारणात् कर्मसंज्ञैव भवति[2]। अन्ते भाष्यकारः एतत्सूत्रं ध्रुवसूत्रान्तर्गतं कुर्वन् कथयति विवेकी पुरुषः विचारयति यत् गावः यदि क्षेत्रे गच्छन्ति चेत् शस्यविनाशः भविष्यतीति, येन अधर्मं राजदण्डं च मिलति। इदमेव विचार्य तद् भयात् पूर्वमेव पृथक् करोति। अत्रापि निवृत्यङ्गं वारणक्रिया वर्तते।

इदानीं नागेशस्य चिन्तनप्रक्रियया एतेषामुदाहरणानां विश्लेषणं दृश्यते। "यवेभ्यो गां वारयति" "अग्नेर्माणवकं वारयति" "कूपादन्धं वारयति" इत्यत्र क्रियात्रयस्य अर्थस्तु भक्षणम्, संयोगादिफलम् उत्पाद्यमानव्यापाराभावस्यानुकूलो व्यापार इति (ल.श.शे. पृ. ४५३) प्रथमोदाहरणे गवा यवभक्षणं फलं वर्तते। तमुत्पाद्यमानव्यापराभावः यस्मिन् कस्मिन् अपि रूपे भवतु एतादृशव्यापारस्य बोधः "वारयति" इत्यनेन भवति। उदाहरणान्तरे संयोगः फलरूपे

१. 'तस्माद् वक्तव्यम् – कर्मणो यदीप्सितमिति। ईप्सितेप्सितमिति वा'।
— महाभाष्य, खंड २, पृ. २५२

२. कैयट २, पृ. २५२।

विद्यते। एतदुत्पन्नक्रियमाणव्यापाराभावस्य योग्यव्यापारमत्र धात्वर्थत्वेन स्वीकूर्मः।

अभावस्य प्रतियोगिव्यापारेण उत्पद्यमानफलस्य आश्रयोऽत्र ईप्सितो वर्तते। वारणक्रिया व्यापारेण उत्पद्यमाने भक्षणे तथा संयोगरूप फले, अग्नौ कूपे च निहिता वर्तते। अत एव नागेशस्यानुसारेण वारणार्थधात्वर्थफलस्य आश्रय एव ईप्सितो वर्तते। (ल.म.पृ. १२९५) ईप्सितशब्देन प्रधानाप्रधानयोः कस्य-चिदेकस्य व्यापाराश्रयस्य ग्रहणं क्रियते। कर्मणः लक्षणे तमप्प्रत्ययस्य ग्रहणेन प्रकृतधात्वर्थस्य फलाश्रयस्य बोधो भवति। (ल.श.शे., पृ. ४५४) "वारयति" इत्यर्थं दानाय नागेशेन अनुकूलव्यापारस्य प्रयोगः क्रियते। अनुकूलस्यार्थः विद्यते यत् सः तादृशार्थकरणे सर्वथा समर्थो वर्तते। अनुकूलत्वं नाम योग्यत्वम्। प्रतिषिद्धत्वेऽपि गोः यवं भक्षयति। अयं वारयति, तथापि न निवर्तते इति प्रयोगस्तु भवितुं शक्नोति। अत्र भक्षणजनकव्यापारस्य सर्वथा अभावो नास्ति, तथापि व्यापाराभावम् आनयनाय योग्यता तु वारणकर्तरि वर्तत एव। एवमेव प्रकारेण यदा गोः भक्षयितुं नारब्धवान् तस्मिन् समयेऽपि तस्य वारणकरणे अयं प्रयोगः समर्थः। नागेशस्य इयं व्याख्या अनेकशङ्कानां समाधानं कृत्वा सर्वेषामपि उदाहरणानां समावेशः कर्तुं शक्नोति, तथापि "कूपादन्धं वारयति" इत्यस्य विषये अभिमुखदेशे गमनेन कूपपतनम् अन्धस्य इच्छाविषयो भवति। अन्धः तद्दिशां प्रति गच्छति एवं तत्र विद्यमान-कूपस्य सत्तां न जानाति, तथापि कूपपतने तद्दिशां प्रति गमनमेव तस्य इच्छाविषयो विद्यते। सारांशस्तु साधनमभीष्टं वर्तते चेत् तत्सम्बद्धसाध्यं फलं वाऽपि अभीष्टमेव भवति।

अत्र नागेशस्य पूर्ववर्तिगदाधरस्य कथनं वर्तते यत् यद्यपि कूपगमनं नेच्छाविषयं कारयितुं शक्यते। यतो हि ज्ञाते सति अन्धः कदापि कूपं प्रति न गन्तुं शक्नोति, तथापि अभिमुखदेशे गमनस्य कारणं कूपगमनमपि इच्छाविषयो वर्तते। अन्ततः कूपादिदेशे अन्धस्य क्रियया उत्पद्यमानः संयोगः इच्छायाः विषयो भवति। किन्तु एतदाधारीकृत्य गदाधरेण "मित्रं विषाद् वारयति"

इत्यस्य या व्याख्या कृता वर्तते, सा व्याख्या नागेशस्य कृतेऽमान्या वर्तते। गदाधरः कथयति यत् यत्र चैत्रादिः पुरुषः स्वभोजनादभिन्नरूपे विषं खादन् अस्ति। स्वेच्छया केवलं विषं न खादेत् चेत् एतद्दृशस्थाने भोजनव्यापारस्य अवरोधककर्तुः अयं प्रयोगः न भवति, यथा "विषाद् वारयति"। शुद्धः प्रयोगस्तु "सविषाद् भोजनाद् वारयति" इति। प्रथमप्रयोगस्य निवारणायेव सूत्रकारेण इप्सितमित्यत्र सन्प्रत्ययस्य प्रयोगः कृतः। सविषान्ने अन्नमिच्छाविषयो वर्तते न तु विषमिति। अत्महत्यायाः अतिरिक्तं कदापि विषम् इच्छाविषयो न भवति। आत्महत्यायाः स्थलमेतद् नास्ति[1]।

गदाधरस्य धारणा भ्रममूलका वर्तते, यतो हि येन प्रकारेण अभिमुखदेश गमनस्य कारणम् यत् कूपगमनं तत् ईप्सितं वर्तते, तथैव भक्ष्यरूपे प्रतीय-मानत्वेन विषमपि इच्छायाः विषयो भवितुं शक्नोति। यद्यपि विषं विषरूपे इच्छाविषयो न स्यात्, किन्तु भक्ष्यरूपे विषं खलु अवश्यमेव इच्छाविषयो वर्तते। अत एव "विषाद् वारयति" इति प्रयोगः कर्तुं शक्यते[2]। अत्रेदं स्मर्तव्यं यत् यदा कोऽपि स्वेच्छया आत्मघातोद्देश्येन शुद्धविषयस्य भक्षणं करोति चेत् तदा विषम् अवश्यमेव ईप्सितं वर्तते। एवम् अस्य वारणे गदा-धरस्यापि "विषाद् वारयति" इति प्रयोगे न काऽपि आपत्तिः।

(४) "अन्तर्धौ येनादर्शनमिच्छति" (१-४-२८ पा.सू.) अन्तर्धेः अर्थस्तु व्यवधानं प्रश्लेषश्चेति। यदि व्यवधानस्य अर्थः कर्तृद्वारा स्वस्य दर्शनानिषेधं कोऽपि इच्छति चेत् तस्य अपि अपादानत्वमुच्यते। "येन" इति शब्दे कर्तरि तृतीया विभक्तिर्वर्तते। "कर्तृकर्मणोः कृतिः" (पा.२/३/६५) इत्यनेन सूत्रेण

१. "यत्र चैत्रादेर्नान्तरीयकतया विषभोजनादिकं, न तु स्वेच्छास्तत्र तद्भोजनविरोधव्यापार-कर्तरि 'चैत्रं विषाद् वारयति' इति न प्रयोगः, अपि तु 'सविषाद् वारयति' इत्यादिरेव। तत्र पूर्वप्रयोगवारणाय सूत्रकृतां ईप्सित इत्यनेन सम्प्रत्ययेनेच्छोपादानात्"।

— व्यु.वा.पृ.२५७

२. ल.म., पृ. १२९६

कृद्योगे षाष्ठ्याः प्राप्ते सति "उभयप्राप्तौ कर्मणि" (२/३/६६) इत्यनेन केवलं कर्मणि एव भवति, न तु कर्तरि। दीक्षितस्य अनया व्याख्यया नागेशः न तुष्यति, यतो हि अनुसूत्रस्य प्रवृत्तिः तत्रैव भवति यत्र कर्तुः कर्मणश्च वास्तविकः प्रयोगः जातः स्यात् उद्योतग्रन्थे (पृ. २५२)। अत एव नागेशः "येन" इत्यत्र सोत्रीं तृतीयां स्वीकरोति। तदनुसारेण अर्थो भवति-व्यवधानाय यस्य कर्तृत्वं निर्माय स्वस्य कर्मत्वरूपे स्थापयन् अदर्शनमिच्छति तद् अपादानं वर्तते। अन्तर्धिनिमित्तकं "यत्कृतकमात्मकर्मकमदर्शनमिच्छति तदपादानम्" इति। यथा-"उपाध्यायादन्तधत्ते" "मातुर्निलीयेत कृष्णः" इति। उपाध्यायेन सः न दृश्येत, अत एव सः तिरोभूतो भवति। एवमेव माता कृष्णं न पश्येत्, अनेनेव उद्देश्येन कृष्णः निलीयते।

पतञ्जलिः अस्यापि बोद्धापायान्तर्गतं स्थापयन् कथयति यत् शिष्यः प्रथमतः विचारयति यदि उपाध्यायेन अहं दृश्ये तदा किमपि कार्यं दीयेत, अथवा उपालम्भनं क्रियेत।

दीक्षितः सूत्रेऽस्मिन् "इच्छति" इत्यस्य प्रयोजनं प्रदर्शयति। यदा अदर्शनेच्छा विद्यमाना स्यात् एवं तस्य अनुकूलकार्यमपि क्रियेत, किन्तु देववशात् दर्शनं भवतु, एतादृशावस्थायामपि अयं प्रयोगः भवति, यतो हि दर्शने सत्यपि अदर्शनेच्छा तु मनसि वर्तत एव। यदि "इच्छति" इत्यस्य प्रयोगं सूत्रकारः न कूर्यात् तदा केवलं दर्शनाभावस्थल एव एतादृशः प्रयोगः भवितुं शक्नोति, न तु दर्शनावस्थायाम्[१]। "मातुर्निलीयते" इत्यादौ इच्छायाः बोधो भवत्याक्षेपद्वारा "चोरान्न दिदृक्षते" इत्यत्र व्यवधानसत्तायाः अभावेन अपादानं जातं नास्ति। तथापि शब्दकौस्तुभे "अन्तर्धिः" इत्यस्य चिन्त्यप्रयोजनं प्रतिपादयन् तिरस्कारः कृतो वर्तते यत् उक्तोदाहरणे परत्वस्य कारणात् कर्मसंज्ञा उपपद्यते। व्यवधानस्य किमपि आवश्यकं नास्ति। किन्तु ज्ञानेन्द्रसरस्वती

१. तुलनीय (श.कौ. २, पृ. ११९ तथा ल.श.शे. पृ. ४५४) 'अदर्शनेच्छया तदनुकूलव्यापारकरणे दैववशात् दर्शने सत्यपीत्यर्थः। अन्यथा यत्र दर्शनाभाव एव तत्रैव स्यादिति भावः'।

अस्य अनिवार्यत्वं व्यक्तिकुर्वन् चौरः माम् न पश्येत् इत्युद्देश्येन स चोरं द्रष्टुं नेच्छति, अयमेवार्थः विवक्षितो वर्तते। इदानीम् कर्मणि यदि कर्मत्वविवक्षा न स्यात् प्रत्युतः शेषत्वविवक्षा अस्तु चेत् तेन तदुत्पन्नां षष्ठीं प्रबाध्य अत्र अनेन सूत्रेण पञ्चमी भविष्यति। एतद्वारणाय अन्तर्धेः प्रयोगः आवश्यको विद्यते। अतः अन्तर्धेः बोधाभावे "चोरान्न दिदृक्षते" इति प्रयोगो भवति।

नागेशस्यानुसारेण "निलीयते" इत्यस्य अर्थस्तु स्वकर्मकदर्शनाभावप्रयोजिका देशविशेषे स्थितिः। धात्वर्थे प्रयुक्तस्य दर्शनव्यापारस्य कर्ता एवात्र अपादानं वर्तते एवं च तेनैव निवृत्तीभवनं धातोः अर्थोऽस्ति। अतः शाब्दबोधे मातृ-प्रभृतिशब्दानाम् अपादानरूपे अन्वयो भविष्यति। इदं च भाष्यकारस्यापि मतं वर्तते। दर्शनव्यापारस्य माता कर्तृभूता विद्यते। इदं च ज्ञानम् प्रत्यासत्या प्राप्तुं शक्यते।

(५) "आख्यातोपयोगे" (१-४-२९ पा.सू.)

आख्याता नाम प्रतिपादनकर्ता, उपयोगो नाम नियमपूर्वकं विद्याग्रहणम्। छात्रद्वारा यदा विद्याग्रहणस्य प्रवृत्तिः दृश्यते तदा नियमस्य सार्थकता भवति। अतः नियमपूर्वकं विद्यास्वीकारः साध्यो यदा, तदा अपादानकारकं भवति। यथा "उपाध्यायादधीते" इति अत्र छात्रद्वारा नियमपूर्वमर्थग्रहणं तु वर्तत एव। अत्र ग्रहणक्रिया साध्यत्वेन विवक्षिताऽस्ति। ग्रन्थस्य शब्दानामर्थाणां च धारणार्थं यद् ग्रहणं क्रियते स एव उपयोगोऽस्ति। यदि उपयोगः न स्यात् तर्हि "नटस्य गाथां शृणोति" इतिवत् अपादानस्य प्राप्तिः न भविष्यति। अत्र कात्यायनः प्रश्नं करोति यत् अनुपयोगस्थितौ इयञ्च आख्याता कारकं भवति उत अकारकमिति? यदि कारकं तदा अकथितत्वाद् कर्मत्वप्रसक्तिः। यदि च अकारकं तदापि उपयोगशब्दः निरर्थकः स्यात्। उपयोगाभावे अपा-दानस्य निवारणप्रश्नः नोदेति। भाष्यकारः कर्मसंज्ञाप्रसक्तेः प्रत्याख्यानं करोति यत् अकथितकर्मणः धातुः परिगणितो विद्यते। यदृच्छया अकथिव्यपदेशो न भवति। फलतः अनुयोगस्थितौ "नटस्य गाथां श्रृणोति" अयं प्रयोगः निर्भ्रान्तो विद्यते।

पतञ्जलिः अत्रापि बोद्धापायस्य उपपत्तिं करोति उपाध्यायतः अध्ययनवाक्यं पृथक् भवति। अत्र यथा वृक्षाद् फलापायवत् उपाध्यायतः वाक्यानां आत्यन्तिकापायः किमर्थं न भवति? अत्रोच्यते! उपाध्यायस्य मुखात् शब्दरूपे विचारः निरन्तरं प्रवाहितो भवति। शब्दव्यञ्जकध्वनयः आचार्यमुखाद् पुनः पुनः उत्पद्यन्ते। तेषां भिन्नरूपत्वेऽपि सादृश्यकारणेन तत्वतः ज्ञातुं शक्यते। तथा श्रोतुः श्रोत्रप्रदेशे अविरतगत्या व्यक्तिस्फोटरूपे शब्दानां अभिव्यञ्जनं करोति। इदमपि वक्तुं शक्यते यत् ज्ञानं ज्योतिवत् भवति। यथा ज्वालारूपे अविच्छिन्नोत्पन्नज्योतिसादृश्येन सततं प्रतीयते, तथैव आचार्यस्य विभिन्नं ज्ञानमपि भिन्नरूपशब्देषु निष्पद्यते। अत एव आत्यन्तिकापायस्य समस्या न भवति, यतो हि अत्र धाराप्रवाहः न्यायेन भवति। अस्मिन् स्थले कैयटेन नागेशेन च स्वटीकायां दार्शनिकचिन्तनं पाण्डित्यं च प्रदर्शितं वर्तते।

लघुमञ्जुषायां नागेशः "अधीते" इति क्रियायाः अर्थं करोति यत् उच्चारणानन्तरं जायमानग्रन्थस्वीकारानुकूलो व्यापारः। उच्चारणस्य आश्रयोऽत्रापादानं वर्तते। अर्थो भवति सः शिष्यः उपाध्यायस्य मुखाद् निस्सरितग्रन्थस्य अध्ययनं करोति। अत्र "नटस्य शृणोति" इत्यत्र योऽतिप्रसङ्गः भवति तदनभिधानाश्रयं स्वीकृत्य दूरीकर्तुं शक्यते। (उद्योत २, पृ. २५४)

(६) "जनिकर्तुः प्रकृतिः" (पा.सू. १-४-३०)

जनेः यः कर्ता भवति सः जनिकर्ता अस्यार्थस्तु जायमानपदार्थः, यतो हि स एव जननक्रियायाः कर्ता वर्तते। जन्म यः गृह्णाति तादृशपदार्थस्य प्रकृतिम् अपादानसंज्ञा भवति। यथा "गोमयाद् वृश्चिको जायते" "ब्रह्मणः प्रजाः प्रजायन्ते" "पुत्रात्प्रमोदो जायते" इति। पतञ्जलिरत्रापि प्रकृत्या तत्तद्पदार्थाणाम् अपक्रमणेन अपायं स्वीकरोति। एवं च आत्यन्तिकापायाभावत् ते विभिन्नरुपेषु जायमानं प्रादुर्भावं मन्वते।

प्रकृतिशब्दस्य अर्थस्तु विवादास्पद एव भवति। काशिकारः, भट्टोजिदीक्षितः, गदाधरश्चैते त्रयः कारणमात्रं स्वीकुर्वन्ति। भाष्यकारः, कैयटः नागेशश्चैते त्रय केवलमपादानकारणार्थे स्वीकुर्वन्ति। "ब्रह्मणः प्रजाः प्रजायन्ते" इति

उभयनिष्ठमुदाहरणम् सामान्यतः हिरण्यगर्भः सृष्टेः हेतुः भवति न तु अपादानस्येति। किन्तु अद्वैतवेदान्तानुसारेण मायारुपोपाधियुक्तं चैतन्यब्रह्म वर्तते। यत् कार्यसामान्यं प्रति उपादानं भवति। तदनुसारम् सर्वमपि जगद् ब्रह्मरूपोपादानस्य विवर्तरूपमिति।

हेत्वर्थे प्रकृतिशब्दस्य ये प्रयोगं कुर्वन्ति तेषां युक्तिः वर्तते यत् "पुत्रात्प्रमोदो जायते" इत्यत्र प्रकृतसूत्रेण अपादानसंज्ञां भूत्वा या पञ्चमी विभक्तिः जायते, तद् नोपादानकारणनिष्ठम्। पुत्रः प्रमोदस्योपादानं कारणं नास्ति। अत एव प्रकृत्यर्थः समवायि-असमवायि-निमित्तपरकः स्वीकर्तव्यः, न तु केवलं प्रथमकारणपरकः। गदाधरः प्रकृतेः विकारित्वार्थस्य खण्डनं कुर्वन् कथयति यत् यस्मिन् पदार्थे प्रकृतेः विकृतिभावः नास्ति तत्रापि पञ्चमीति स्वीकर्तव्यम्। यथा-"प्राक्केकयीतो भरतस्ततोऽभूत्"। पुत्रस्य शरीरं न मातृपितृशरीरस्य विकाररूपं न भवति प्रत्युत तयोः शुक्रशोणितादिभिः निर्मितं भवति। शुक्रादिनां यद्यपि शरीरे एव विद्यमानत्वं वर्तते, तथापि मलमूत्रादिवत् शुक्रादयोऽपि शरीरस्य अवयवाः न भवन्ति[1]। इयं च शङ्कात्र न कर्तव्यां यत् मृत्पिण्डाद् घटो जायते इत्यत्र अपादानपञ्चमी नास्ति, अपितु हेतुपञ्चमी वर्तते। हेतुपञ्चम्याः प्रवृत्तिः अस्त्रीलिङ्गैः गुणवाचकैः शब्दैः भवति। मृत्पिण्डस्तु न गुणवाचकं पदम्। अतः अत्र अपादानपञ्चमी एव वर्तते। (व्यु. वा.पृ. २५७) गदाधरो यद्यपि "दुग्धाद् दधि जायते" मृदो घटो जायते इत्यादिषु समवायिकारण एव प्रकृतेः व्यवस्थां करोति, तथापि सिद्धान्ततः स कथयति-"तस्मात्कारणत्वमेव प्रकृतित्वम्" इति। अत एव दण्डाद् घटो जायते इत्यादयः इष्टप्रयोगाः उपपद्यन्तो यत्र दण्डः घटस्य निमित्तं कारणं वर्तते। इयमेव स्थितिः कर्म तथा जातिश्च "यतो द्रव्यं गुणाः कर्म तथा जातिः परापरा" इत्यत्र वर्तते। "यतः" इत्यस्य अर्थस्तु ईश्वरादिति। एतेषां प्रकृत्यर्थरूपे ईश्वरः निमित्तकारणतायाः आश्रयं नीत्वा सिद्ध्यति।

१. 'शुक्रशोणितादेः शरीरस्थत्वेऽपि मलमूत्रादेरिव शरीरावयत्वाभावात्'।

— व्यु. वा. पृ. २५७

प्रकृत्यर्थस्य उपादानकारणत्वं ये स्वीकुर्वन्ति नागेशाः, ते कथयन्ति "ब्रह्मणः प्रजाः प्रजायन्ते" इत्यनेन अयं बोधो जायते – ब्रह्मापादानिका प्रजाकर्तृकोत्पत्तिः इति। "पुत्रात्प्रमोदो जायते" इत्यत्र प्रत्यक्षतः उपादानं कारकं नास्ति, किन्तु उपादानत्वस्य निर्वाहः तस्यारोपं कृत्वा नागेशेन क्रियते। संक्षेपेण वक्तुं शक्यते प्रकृत्यर्थः भवति समवायिकारणमिति, किन्तु आरोपेण कारणान्तरेऽपि अस्य निर्वाहः कर्तुं शक्यते (ल.म.पृ. १२९७) "मृदो घटो जायते", तन्तुभ्यो वस्त्रं जायते, "ब्रह्मणः प्रजाः प्रजायन्ते" इत्यादिषु पञ्चमी उपादानकारणे जाता। यतो हि, "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येवं सत्यम्" (छा. उ. ६-१-१) अत्र उपादानकारणस्य मृत्तिकायाः कारणं दृष्टान्तीकृत्य ब्रह्मणः उपदानकारणत्वं समर्थितं वर्तते। अत एव "यतो वा इमानि भूतानि जायन्ते" इत्यादिवाक्ये प्रदर्शितस्य प्रपञ्चितस्य ब्रह्मणि एव स्थितिः सिद्ध्यति, यथा घटस्य मृदि, पटस्य च तन्तौ स्थितिः भवति। पुनः "आदित्यात् जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः" इत्यत्र प्रजायाः उपादानकारणं खलु अन्नं वर्तते अन्नस्य वृष्टिः, वृष्टेश्चादित्यः इति एतत् पञ्चाग्निविद्यायाः अनुरोधेन उपपन्नो भवति। आदित्यं चात्र ज्योतिस्वरूपम्। इयमेव ज्योतिः वृष्टिरूपे परिणमति, वृष्टिः अन्नरूपे, अन्नं च प्रजारूपे परिणमति।

केचन "विभाषा गुणेऽस्त्रियाम्" (२/३/२५) इत्यत्र विभागस्य योगविभागं कृत्वा अगुणकवाचकशब्दे एव हेतुपञ्चमी सिद्ध्यति इति साधयन्ति, यथा "धूमादग्न्यनुमितिर्जायते" एवं च "पुत्रात्प्रमोदो जायते" इत्यत्रापि पञ्चमीं साधयन्ति एवं च पुत्रस्य प्रमोदहेतुत्वं स्वीकुर्वन्ति। किन्तु एतेन पञ्चमी विभक्तिः ब्रह्मणः निमित्तकारणता न साधयितुं समर्था। एतदतिरिक्तं "तदैक्षत बहुस्यां प्रजायेय" इति (छा.उ. ६/२/३) अत्र कुर्यामिति अनुक्त्वा "स्याम्" "प्रजायेय" इति पदद्वयं ब्रह्मणः उपादानकारणत्वमेव साधयति[1]। एतेन विवेचनेन इदं सिद्ध्यति यत् प्रकृतसूत्रे "प्रकृतिः" इति शब्दः उपादानवाचकः, तथा च यत्र उपादानकारणाभावेऽपि पञ्चमी तत्र अपादानो नास्ति, अपितु

१. श. कौ. २, पृ. ११९-२०

हेतौ पञ्चमी अस्ति। अस्य सिद्धिस्तु उक्तसूत्रे "विभाषा" इत्यस्य पृथक् कृत्वा भवति, अन्यथा सूत्रानुसारेण हेतोः गुणवाचकत्वे एव पञ्चमीं विकल्पेन भवितुं शक्नोति।

(७) "भुवः प्रभवः" (पा. सू. १-४-३१) भूधातोः कर्तुः उत्पत्तिस्थानस्यापि अपादानत्वमुच्यते, यथा "हिमवतो गङ्गा प्रभवति, कश्मीरेभ्यो वितस्ता प्रभवति"। भाष्यकाराणामनुसारेण जलस्य अपसरणत्वेन अपायान्तर्गतमेवात्र अपादानं वर्तते। आत्यान्तिकापसरणमेतदर्थं न भवति तत्र सातत्यं नास्ति। अतः प्रथमप्रकाशाधिकरणं अपादानं कथ्यते। इदं सूत्रार्थं विद्यते[१]।

भवानन्दः कथयति यत् सूत्रेऽस्मिन् पञ्चम्याः अर्थो हेतुः नास्ति, अन्यथा "जनिकर्तुः प्रकृतिः" इत्यत्रैव अस्यान्तर्भावः स्यात्। अतः अत्र आद्यबहिस्संयोगस्य धात्वर्थत्वं स्वीकर्तव्यम्। बहिरिति पदार्थः पृथिवी एव, यतः गङ्गा तत्रैव प्रकटयति।

पञ्चम्यर्थस्तु हिमवत्संयोध्वंस्य अव्यवहितोत्तरक्षणे विद्यमानत्वमिति। आख्यातार्थः आश्रयो भवति। एवं च न्यायमतेन शब्दबोधः - हिमवत्संयोगध्वंसअव्यवहितोत्तरक्षणवर्त्याद्यपृथिवीसंयोगाश्रयतावती गङ्गा (का.च. ७३)। शाब्दबोधेऽस्मिन् "अव्यवहितम्" "आद्यम्" इति द्वयोः पदयोः निवेशः न स्यात् तदा "वैकुण्ठात् काशीतो वा गङ्गा प्रभवति" इति अपप्रयोगापत्तिः। मेघदूतस्य "वल्मीकाग्रात्प्रभवति" इत्यस्यापि अयमेवार्थः भवानन्दस्य शिष्यः जगदीशः गुरुमार्गस्य संक्षेपं कृत्वा प्रभवनमित्यस्य अर्थस्तु प्रथमप्रकाशनमिति स्वीकरोति। तच्च नागेशगदाधरयोः सम्मतं वर्तते। जगदीशानुसारेण शाब्दबोधस्तु वल्मीकाग्रवृत्तिप्रथमप्रकाशनवद् आखण्डलस्य धनुःखण्डम् इति। अत्र जगदीशेन वल्मीकमित्यस्य सातपमेघरिति अर्थः कृतो वर्तते। "हिमवतो गङ्गा प्रभवति" इत्यस्य शाब्दबोधः - "हिमवदपादानको गङ्गाकर्तृकः प्रथमः प्रकाशः" इति।

१. प्रभवनं प्रथमप्रकाशः, प्रग्रहणात्। तदधिकरणमपादानमित्यर्थः।

— ल.श.श., पृ. ४५५

किन्तु एतादृशं नास्ति यत् सम्प्रदाने अपादाने च क्रियाजनकत्वं नास्ति। प्रकारोपकारयोः तारतम्येन किञ्चिद् अन्तरम् अवश्यं वर्तते। अपादानाङ्गिकारस्य स्वरुपं स्पष्टीकृतवन्तः। कर्तरि स्थितगतिरपि वर्तते। सा च द्विधा–अन्तर्गता बहिर्गता च। बहिर्गतगतिविधेरवस्थायां द्रव्यपदार्थस्य आवश्यकता भवति यतः गतेः प्रारम्भो स्यात्। गतिक्रियायां विभागस्तु विद्यते एव यत्र द्वे तत्त्वे अनिवार्यरुपेण भवतः। एकस्तु गतिधारककर्ता, अपरं सः पदार्थः यतः गतेरारम्भो जातः। अत्र यः अन्तिमः वर्तते स एव अवधिः। सोऽपि द्विधा-एषस्तु कर्तुः गतौ क्रियाशीलो भविष्यति उदासीनो वा। क्रियाशीलावस्थायाम् अयं स्वयमेव कर्ता भविष्यति यथा– 'मेषावपसरतः'। किन्तु यदि अयम् अवधिरुदासीनः अस्ति तदा अपादानकारकं वर्तते। यथा – 'वृक्षात् पर्णं पतति'। उदासीनावधिभूतात् वृक्षात् कर्तुः (पत्रस्य) गतेरारम्भो भवति, अतः कर्त्रा निष्पद्यमानायां गतिक्रियायाम् अपादानमुपकारकं वर्तते[१]। अपादानं सर्वेभ्यः धातुभ्यो न भवति, केवलविभागजनकधातुभ्य एव भवति। अत्र इदं ध्यातव्यं यत् प्रकृतधातोः वाच्यार्थः विभागो न स्यात्, त्यज् धातोः अर्थः एव विभागो वर्तते, अस्य प्रयोगे अपादानं नैव स्यात् – 'वृक्षं त्यजति'।

सम्प्रदाने अपि क्रियायाः परोक्षतया उपकारकत्वमास्ते। क्रियायाः किञ्चित् फलन्तु भवत्येव, यत्कर्म बिभर्ति। 'घटमानय' अत्र आनयन-क्रिया क्रियते येन घटः यथाशीघ्रं सम्मुखम् आगच्छेत्। किन्तु क्वचित्परिस्थितौ एतत् सद्यः फलम् अन्यफलस्य प्राप्तौ साधकं भवति, यथा – 'ब्राह्मणाय घटं देहि'। अस्मिन् वाक्ये दानक्रियायाः फलं घटरुपकर्मणि निहितं वर्तते, घटः फलाश्रयो वर्तते। किन्तु एतत्फलं ब्राह्मणेन लप्स्यमाणस्य फलस्य साधनमस्ति। दानस्य कर्म घटो वर्तते घटदानं च ब्राह्मणः फलं लभेत एतदर्थं क्रियते। इत्थं फलाश्रयभूतकर्म अपराश्रयरुपब्राह्मणं दर्शयति। तदनुसारं ब्राह्मणः घटकर्मद्वारा दानक्रियायाः फलसम्पादने उपकारको वर्तते, अतः एतत् पृथक् कारकं सम्प्रदानमुच्यते[२]।

१. **R.C. Pandey, Problen of Meaning in Indian Phil; P.144.**

२. **R.C. Pandey, Problen of Meaning in Indian Phil; P.145.**

(१) अपादानवत् सम्प्रदानेऽपि सर्वासां क्रियाणां प्रयोगो न भवति। केचन वैयाकरणाः दानार्थकधातुमेव संप्रदानत्वमभ्युपगच्छन्ति। किन्तु! अपरे कतिपयैः अन्य-धातुभिरपि अस्य परिकल्पनां कुर्वन्ति। किन्तु एते परिगणिता धातव एव सन्ति। अन्तिमचरणे सम्प्रदानापादानयोरपि कारकेषु स्थानं लभ्यते। यतो हि कर्ताद्वारा (अपादानस्थितौ) कर्मद्वारा (सम्प्रदानस्थितौ कांश्चन धातून् उपकरोति, तथापि कतिपयस्थानेषु अनयोः कारकत्वं सन्दिग्धं मन्वते[१]। संशयस्यमुख्यकारणानि चेत्थम्—

यत् कारकं भवति तद् अवश्यं कर्ता अपि भवितुं शक्नोति, यतो हि तत्तत् कारकाणाम् अविवक्षावस्थायां द्रव्यस्य अन्तर्निहिता कर्तृत्वशक्तिः अभिव्यनक्ति। सम्प्रदानापादानाभ्याम् सह एतादृशं नास्ति। 'श्रृङ्गात् शरो जायते' 'अजाविलोमभ्यो दूर्वा जायते' इत्यादिषु उदाहरणेषु यत् अपादानस्य अविवक्षायां श्रृङ्गं शरो जायते, अजाविलोमानि दूर्वा जायन्ते इत्यादीन्युदाहरणानि दृश्यन्ते तत्र मूलतः अधिकरण-कारकमेव युक्तियुक्तं वर्तते - श्रृङ्गे शरो जायते, अजाविलोमेषु दूर्वा जायन्ते। केवलं पञ्चमीविभक्तेः विधानार्थमेव जन् धातोः प्रयोगं पाणिनिः करोति[२]। किन्तु! एतत् कथनं न युक्तिसंगतं यत् पञ्चम्याः विधानार्थमेव अत्र कारकस्य कल्पना वर्तते। यदि एतदेव अभिष्टं पाणिनेः स्यात् तदा तु 'क्रियाजन्या-पायावधौ पञ्चमी' उच्येत। अतः वैयाकरणैः अवधिरुपे अवस्थानमेव अपादानस्य व्यापारः स्वीकृतः। एतस्मात् कारणाद् एतत् कारकं वर्तते।

(२) कर्तृकर्मादिषु चतुर्षु कारकेषु यथा क्रियासामान्यस्य बोधकः कृधातुः अनुस्यूतो वर्तते तथा सम्प्रदानापादनयोः नास्ति। अत्र सम्प्रदानम् अपादानं सर्वेषां धातूनां योगे न भवति। केषाञ्चित् परिगणितधातूनां प्रयोगे एव कारकं भवति। किन्तु एषा प्रबलतरा युक्तिः न यत् अनयोः कारकत्वं व्याहन्येत। यतो हि कर्मकारकमपि केवलं सकर्मकधातुभ्य एव भवति। एतत् सत्यं वर्तते यत् भाषा-विकासस्य आरम्भिकस्थितौ क्रियासामान्यस्य सम्बन्धस्य

१. रामज्ञा पाण्डेय, व्याकरणदर्शनभूमिका, पृ. २०८-१४।

२. तत्रैव, पृ. २०९।

कारणं चत्वारि कारकाणि स्वीकृतानि, तत्पश्चात् क्रियाविशेषं प्रति सम्बन्धित्वात् अनयोः कारकेषु अन्तर्भावो जातः। वयं पूर्वं दृष्टवन्तः यत् षण्णां कारकाणां विकासे चत्वारि चरणानि सन्ति।

(३) धातुना वाच्यः क्रियायाः वृत्तिः पूर्वोक्त-चतुर्षु कारकेषु भवति, सम्प्रदानापादानयोः न। एतस्माद् एव कारणात् अनयोः कर्तृत्वविवक्षा न भवति। किन्तु! क्रियायाः प्रकृतधातुना अवाच्यत्वात् तस्मिन् क्रियाबोधः नास्ति एतादृशं नास्ति। क्रिया तु सम्प्रदानापादाने भवति एव। सत्यं यत् अपादाने प्रधानस्थानं अपायस्य (विभागस्य) वर्तते, तत् प्रयुक्तधातुवाच्यं न स्यात्। अपादाने अवधिस्थः व्यापारः तथा सम्प्रदाने अनुमत्यादिप्रदानस्य व्यापारस्तु वर्तते एव[१]।

भाष्यकारः पतञ्जलिः अन्यकारकाणां कर्तृत्वनिदर्शनसमये 'अपादानादीनां त्वप्रसिद्धिः' (पृ. - २४३) इति उक्तवान् तत्तु वस्तुतः पूर्वपक्षत्वेन आक्षेपवार्तिकः वर्तते। अस्य एतत् तात्पर्यं यत् सम्प्रदानापादानयोः कर्तृत्वं भवति किन्तु व्यवहार-जगति न संभवति। 'कारक' शब्दे खण्डद्वयं वर्तते – प्रकृतिः (कृ = धातुः) तथा प्रत्ययः (तृच्–प्रत्ययः कर्त्रर्थकः) । यदि प्रत्ययम् आधृत्य पश्यामः तर्हि अनयोः कारकयोः कारकत्वव्यवस्थापने काठिन्यं भविष्यति। किन्तु! यदि प्रकृतिम् आधृत्य पश्यामः चेत् क्रियया सम्बन्धस्तु तस्य वर्तते एव[२]।

१. शब्दशक्तिस्वभाव्याच्चापादानव्यापारे धातुर्न वर्तते। वस्तुतस्त्वपादानस्यावधिभावेनावस्थानं व्यापारोऽस्ति, सम्प्रदानस्याप्यनुमननादिलक्षणः। प्रतीयमानोऽपि व्यापारः कारकव्यवदेश-निबन्धनम्। यथा–प्रविश पिण्डीमिति।

२. नागेशकृत उद्योत २, पृ. २४४।

# ॥ अधिकरणकारकम् ॥

**व्युत्पत्तिः —**

अधिपूर्वककृधातोरधिकरणार्थकल्युट्प्रत्ययं कृत्वा अधिकरणशब्दो निष्पद्यते। अस्य निर्वचनं तु 'अधिक्रियन्ते (क्रियाः) यस्मिन्' अर्थात् यत्र क्रियायाः निवासः आश्रयो वा भवेत्। अस्मिन् शब्दे प्रयुज्यमानस्य 'अधि' निपातस्य रुपे वैदिककालतः एव सप्तमीविभक्तौ नियमनं करोति, यथा—'वयो न सीदन्नधिबर्हिषि प्रिये' (ऋ.१/८५/७ घ), 'प्रतीदं विश्वं रोचते यत्किञ्च पृथिव्यामधि' (ऋ.५/८३/९ गद्य)। यद्यपि 'अधि' इत्यस्य योगे कुत्रचित् पञ्चमी अपि दृश्यते किन्तु तत्तु अस्य गौणः प्रयोगः तथा एतादृशाणि अल्पस्थलान्येव[१]। सप्तम्याः प्रयोगाधिक्येनैव 'अधि' इत्यस्य उपयोगः सप्तमीविभक्त्यर्थे जायमाने अव्ययीभावसमासेऽपि भवति यथा —अधिहरि, अधिकन्धरम् (शिशु. १/५४)। पाणिनिः 'अधि' इति निपातम् ईश्वरार्थे कर्मप्रवचनीयं स्वीकरोति ('अधीश्वरे' पा.सू.१/४/९४) तथा एतेषां कर्मप्रवचनीयानां योगे तच्छब्दात् सप्तम्याः विधानमपि कुरुते यस्मात् आधिक्यदर्शनं वा यत्र स्वामित्वप्रदर्शनम् इष्टं भवेत्। 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' (२/३/९), यथा—'अधि ब्रह्मदत्ते पाञ्चालाः' 'अधि पञ्चालेषु ब्रह्मदत्तः'। 'यस्य चेश्वरवचनम्' इत्यत्र ईश्वरशब्दः भावप्रधानो (ईश्वरवाचको) वर्तते, अतः स्वामिवाचके तथा अधिकृतपदार्थवाचके उभयत्र सप्तम्याः विकल्पो भवति[२]।

**'अधि' इत्यस्य प्राचीनार्थः —**

'अधि' इत्यस्य अमुस्मिन् अर्थप्रयोगविवेचनसन्दर्भे अधिकरणसंज्ञायाः सार्थकता प्रतीयते। आधिक्यवाचकेन 'अधि' इत्यनेन सह करणस्य संयोगोऽपि

१. Macdonell, Vadic Grammar for students, Art.176.2.

२. 'यस्य चेश्वरवचनम्' इत्यत्रार्थद्वयम्। ईश्वरशब्दो भावप्रधानः। यस्य स्वामिन ईश्वरमुच्यते तस्मात्स्वामिनः सप्तमीत्येके:, यस्य स्वस्येश्वर उच्यते तस्मात् स्वात्सप्तमीत्यपरः।
— पदमञ्जरी, १/४/९४

रोचकः एव। तदनुसारं करणापेक्षया अधिकव्याप्तिमतः कारकस्य अधिकरणसंज्ञा भवति। वयं दृष्टवन्तः यत् करणलक्षणे प्रकर्षवाचकतमप्-प्रत्ययस्य योगेन तस्य व्याप्तिः परिनष्टा, अधिकरणेन सह एतादृशं नास्ति। अत्र तमप्प्रत्ययाभावेन सर्वेषाम् आधाराणाम् अधिकरणसंज्ञा भविष्यति, न तु करणवत् केवलं केषाञ्चित् साधकानाम्। अतः गौणाचारोऽपि अधिकरणं भवति। अतः करणापेक्षया अधिकव्यापकत्वात् एतद् अधिकरणमुच्येत इति सम्भवति। अतः पाणिनिः करणस्य परवर्ति अधिकरणं स्थापितवान्।

**अधिकरणस्य अर्थः —**

आधारपदम् अधिकरणस्य लक्षणं मनुते (आधारोऽधिकरणम् १/४/४५) कारकप्रकरणं क्रियासापेक्षत्वात् क्रिया अध्याह्रियते तदनुसारं क्रियाऽऽधारोऽधिकरणम् वर्तते। अत्र प्रश्नः समुद्भवति यत् क्रियायाः आधारः कर्ता कर्म वा भवेत्, यतो हि कर्तृस्था (रामो गच्छति) कर्मस्था (ओदनं पचति) क्रिया भवति। तदा अधिकरणं क्रियाऽऽधारः कथं वक्तुं शक्यते? यदि अस्य प्रश्नस्य उत्तरे वयं कर्तृकर्मसंज्ञयोः अनवकाशम् उक्त्वा निराकरणं कुर्मः चेत् न युक्तिसम्मतम्। यतो हि अस्यां दशायाम् अधिकरणेन सह अस्य पर्यायस्य प्रसङ्गः उत्पद्येत—क्वचित् अधिकरणसंज्ञा क्वचित् कर्तृकर्मसंज्ञा वा[१]। स्पष्टं यत् लक्षणं स्वस्मिन् अपूर्णं वर्तते।

**आधारस्य परम्परया अधिकरणता —**

अस्मिन् प्रसङ्गे निवारणार्थलक्षणस्य व्याख्यायाम् उच्यते क्रियायाः आश्रयरुपे विद्यमाने कर्तरि कर्मणि वा स्थितां धारणक्रियां प्रति यः आधारभूतः कारको भवेत् तदेवाधिकरणम् उच्यते[२]। धारणक्रियायाः प्रयोगेण एतद् ज्ञपनीयं यत् सम्प्रदानापादानवत् अधिकरणमपि क्रिया-विशेषेण सह सम्बध्नाति। तद्विपरीतम् एतत् सर्वाभिः क्रियाभिः सम्बध्नाति। क्रियाधारणस्य विषयत्वात् तासां तासां क्रियाणां धारणस्य चर्चा अवश्यं

१. न्यास (१/४//४५), पृ. ५६१।
२. द्रष्टव्य—काशिका, उक्तसूत्रे।

तत्र वर्तते। क्रियां कोऽपि पदार्थः द्विधा धारयति। साक्षात् परम्परया वा। साक्षात् क्रियाधारस्य प्रश्नः चेत् एतत् केवलं कर्त्रा कर्मणा एव सम्भवति अधिकरणं व्यवहितत्वेन (व्यवधानभावेन) एव क्रियां बिभर्ति।

अतः अधिकरणं क्रियायाः साक्षात्-आश्रयरुपकर्तुः कर्मणो वा आधारो भूत्वा क्रियाधार उच्यते[१]। तात्पर्यमिदं यत् अधिकरणम् उक्तप्रकारेण क्रियाधारणं प्रति असाक्षात् उपकारको वर्तते। उक्तञ्च भर्तृहरिणा—

कर्तृकर्मव्यवहितामसाक्षादधारयत्क्रियाम्।
उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।।

— वा.प. ३/७/१४८

१. न्यास—उपरिवत्, पृ. ५६१-६२।

## वाक्यपदीये अधिकरणस्य लक्षणम् —

भर्तृहरिः अधिकरणस्य लक्षणमेवं करोति यत्—

"कर्तृकर्मव्यवहिताभस्यक्षाद्धारयत्क्रियाम्"।

उपकुर्वत्क्रियासिद्धो शास्त्रेऽधिकरणं स्मृतम्।। - वा.प.३/७/१४८

अर्थात् कर्त्रा कर्मणा वा व्यवहितां क्रियाम् असाक्षादरूपेण धारयन् यः क्रियायाः निष्पत्तौ सहाय्यो भवति स एव अत्र अधिकरणशब्दवाच्यः इति। लोके अधिकरणरूपे द्रव्यगुणक्रियाः भवन्ति, किन्तु शास्त्रेऽस्मिन् कारकान्तर्गतत्वात् क्रियायाः अध्याहारोऽनिवार्यः वर्तते, अतः क्रियायामेव एकेन विशेषोपकारत्वेन अधिकरणसंज्ञायाः व्यवस्था भवति। कर्तस्थक्रियायाः अधिकरणोदाहरणं वर्तते यत्-कटे शेते इति। अत्र शयनक्रिया कर्तरि वर्तते तथा तस्यैव आधारत्वेन कटः क्रियाधारस्य अधिकरणं विद्यते। कर्मस्थक्रियायाः अधिकरणोदाहरणं वर्तते - "स्थाल्यां पचति" इति अत्र विक्लित्तिरूपफलवती पाकक्रिया ओदनादिकर्मणि वर्तते। कारकं यदि क्रियायाः जनकं व्यवहितरूपे वर्तते चेदपि न काऽपि हानिः[१]। अधिकरणस्य क्रियायाश्च मध्ये व्यवधानस्य पुष्टिः भर्तृहरेः शब्दद्वयेन भवति, तच्च व्यवहिताम्, असाक्षादिति च। तदनुसारेण अधिकरणे व्यवधानं बहु आवश्यकं भवति। अनया दृष्ट्या करणमधिकरणं च परस्परं प्रतिलोमं वर्तते यत् क्रियाकरणमध्ये लेशतोऽपि व्यवधानं न भवति क्रियाधिकरणमध्ये तु व्यवधानमनिवार्यम्। कर्तुः कर्मणो वा व्यापारः करणात् पूर्वं भवति। अधिकरणस्य पश्चादेव तस्य स्थितिः भवति। अत्रेयं शङ्का जायते यत् कर्तुः कर्मणश्च साक्षाद् क्रियाधारत्वेन मुख्याधारः किमर्थं नोच्यते? अन्यच्च कर्तुः कर्मणश्च आधारभूतकटादेः गौणाधारत्वं वक्तव्यम्, यतो हि कटादेः असाक्षाद् क्रियाधारत्वं वर्तते। यदा मुख्याधारः वर्तते एव तदा गौणधारस्य कथं खलु अधिकरणसंज्ञा वक्तुं शक्यते? अत्रेदं खलूत्तरं वर्तते करणप्रयोगस्य लक्षणे तमप्प्रत्ययस्य प्रयोगेण

१. कारकाणां च क्रियानिमितत्त्वं यथा तथापि भवदाश्रीयत इति व्यवधानेन क्रियोपकारकत्वम्-विरुद्धम्। — तत्रैव - हेलाराज ३, पृ. ३४८

वक्तुं शक्यते यत् गौणाधारस्यापि अधिकरणत्वमिति। किन्तु नैतत् उत्तरं भवितुं शक्नोति। पाणिनीसूत्रेषु अधिकरणानन्तरं कर्ता कर्म च द्वौ आगच्छतः एवं च विप्रतिषेधास्थितौ परसंज्ञेव भवति। स्वविपरीतस्य कर्तुः कर्मणश्च संज्ञया बाधितः सन् तद्विषये अयं अतिकान्तो न भवति (न्यास पृ.५६२) तथ्यं चेदं क्रियायाः साक्षाद् आधाररूपे कर्ता कर्म चेतौ द्वौ व्यवस्थितौ, एतयोः द्वयोः आधारजे स्थितस्य आधारभूत कारकस्य अधिकरणत्वमुच्यते।

यद्यपि अधिकरणकारकस्य परम्परया आधारवल्लक्षणस्य आवृत्तिः पाणिनीय-संप्रदाये सम्प्रदायान्तरे च जाता वर्तते। किन्तु क्रियायाः साक्षादाधारस्यापि उदाहरणं मिलति, यथा "गले बद्ध्वा गोर्नीयते" इति अत्र बन्धनक्रियायाः साक्षात्सम्बन्धः गलेन सह वर्तते न तु कर्त्रा कर्मणा च सह। कातन्त्रसम्प्रदायस्य टीकाकारः सुषेण-कविराजः अस्य परम्परावादपरिधौ स्थितिरिति कथयति। अत्र क्रियायाः कर्माधारः गलः सरलतया सिद्ध्यति। एवं च अधिकरणस्य उक्तलक्षणस्य रक्षणं भवति[१]।

किन्तु स्वस्यानेन व्याख्यानेन सुषेणः न तुष्यति। व्याख्यान्तरेण तेषां अपरितो-षप्रकटोऽयम् जायते[२]। तेषां कथनं वर्तते यत् क्रियाधाररूपे यस्य विवक्षा तदेव अधिकरणमुच्यते। एतदनुसारेण "असाक्षाद् धारयत् क्रियाम्" एतद्व्याख्यानमुप-लक्षणमात्रम्।

पाणिनितन्त्रे साक्षाद् आधारवतां मतानामपि कदापि मान्यता न प्राप्ता। उदा-हरणस्वरूपं कालस्य साक्षाद् क्रियाधारस्वीकारः भ्रमः। यतो हि "समये चेत्रस्तण्डुलं पचति" एतादृशः प्रयोगो भवति। वस्तुतः अधिकरणसंज्ञायाः विहितसूत्रे स्वरितत्वस्य प्रतिज्ञया[३] इदं निश्चितं भवति यत् कालोऽपि परम्परया क्रियाया आश्रयोऽस्ति। उक्तोदाहरणे कालः चैत्रस्य तण्डुलस्य च आधारो भवति। यदि क्रियायाः साक्षात् आधाररूपे कालस्य विवक्षा अस्ति चेत् "कालः भूतानि पचति" इति प्रयोगः

१. डो. रामशंकर भट्टाचार्य, पाणिनि व्याकरणस्य अनुशीलन, पृ. १५७

२. व्याख्यान्तरविकल्पस्य द्वयमिष्टं निबन्धनम्। स्वव्याख्यापरितोषो वा व्यप्तिर्वा विषयान्तेर।।

३. स्वरितेनाधिकारः (१/३/११)

स्यात्[1]। परिणामतः अधिकरणस्य क्रियया सहान्वयस्तु कर्तादिनामन्वयमाध्यमेनैव भवति। यतः यस्य कारकभावः यस्यमाध्यमेन भवति तस्य क्रियया सहान्वयोऽपि तन्माध्यमेनैव भविष्यतीति शास्त्रीया व्यवस्था वर्तते।

**आकाशस्य कालस्य चाधारत्वम् —**

भर्तृहरिः अधिकरणविवेचनस्य प्रसङ्गे आकाशस्य कालस्य च निरूपणं करोति। तदनुसारेण सर्वेषां संयोगवत्पदार्थाणां आधारः आकाश एव वर्तते। ग्रह-नक्षत्र-विमानादीनां आकाशादीनां खलु आधरत्वम् आकाशस्यैव भवति। रथादिपार्थिवाणां पदार्थाणां आधारः पृथिवीति ज्ञायते सोऽपि अन्ततः परम्परया आकाश एव आधृतः। अत एव सर्वेषां संयोगिपदार्थाणां प्रथमाधारः आकाश एवेति कथने न कापि आपत्तिः[2]। आचार्यः हेलाराजस्तु केवलं संयोगिपदार्थाणां नापितु समवायिपदार्थाणामपि आधारः आकाशमेवेति कथयति। यतो हि तेषां तात्कालिकाधारस्तु स्वावयवः एव अन्ते परमाणुपर्यन्तम् गन्तुं शक्यते।

अत्र देशगतविभागकरणमाकाशस्य प्रधानं कार्यं स्वीकर्तव्यम्, अन्यथा एकत्व-संख्यया विशिष्टे नित्याकाशे विभिन्नपदार्थाणामाधेयरूपे अवस्थितत्वाद् साङ्कर्यदोषस्य उपस्थितिर्भविष्यति। एकस्मिन् देशभागे एकं वस्तु स्थातुं शक्नोति। किन्तु तथ्यमिदं वर्तते व्यापकाशान्तर्गतं विभिन्नाः पदार्थाः स्वस्य स्वस्य देशविशेषं रुन्धन्ति। अतः आकाशाधारे एव सर्वेऽपि पदार्थाः परस्परं सत्तागतविरोधं विना निवसन्ति[3]। आकाशे इयं देशविभागः कल्पनामात्रम्, केवलं व्यवहारार्थं न तु परमार्थतः इति।

१. यद्यपि कालस्य साक्षात्क्रियापरिच्छेदकत्वं, तथापि तदधिकरणं कर्तृकर्मद्वारैव, तथैवानुभवात्। साक्षात्तदाधारत्वेऽपि (आधारपदे) स्वरितत्वप्रतिज्ञानात्परम्पराधारस्य ग्रहणम्। — ल.श.शे. पृ. ४७७

२. आकाशमेव केषञ्चिद् देशभेदप्रकल्पनात्। आधारशक्तिः प्रथमा सर्वसंयोगिनां मता।। — वा.प. ३/७/१५१

३. द्रष्टव्य — हेलाराज (उक्तकारिका पर) पृ. ३५०

उक्ते प्रथमाधाररूपे निरूपिताकाशस्य सत्ताऽपि आधारशक्तौ आगता वर्तते[1]। सर्वभावपदार्थविषये यदुच्यते अत्रेदं वर्तते इति व्यवहारः एव साधयति यत् "अत्र" इत्यनेन कस्यचन भावपदार्थस्य निर्देशः भवति। स च पृथ्वीतः भिन्नः।

सामान्यवस्तुतः पृथ्व्याः भागः परिमितो न भवति। पृथ्वीतः ऊर्ध्वस्थानमेव व्याप्तं भवति। अन्ततः पृथिवी अपि तमाच्छादयति। फलतः तत्शून्यस्थानरूपभाव-पदार्थस्य आकाशत्वमिति व्यवहरन्ति।

कस्यचन वस्तुनः व्यपदेशः तस्य निरूपणानन्तरमेवं भवतीति साधारणः व्यवस्था। लोके शब्दजन्यो यो व्यवहारः भवति तस्मिन् तस्यैव वस्तुत्वमिति कथननियमो वर्तते[2]।

भर्तृहरिहेलाराजयोः अस्मिन् विषये महत्वं प्रदर्शितं वर्तते यत् अभावपदार्थे अधिकरणत्वं भवितुं न शक्नोति। अधिकरणे आधेयाभावस्य प्रश्नः पृथक् वर्तते, यत्र अधिकरणत्वस्य क्षतिः न भवति, यथा "घटे जलं नास्ति" इति। किन्तु "शत्रोरभावे सुखम्" इत्यत्र अभावस्य निरूप्यमाणत्वेऽपि वस्तुनः सापेक्षत्वाभावेन आधारः न वक्तुं शक्यते। यद्यपि अभावे सप्तमी इत्यनेन समर्थनीयमिति मन्यन्ते। अतः सिद्ध्यति इदं यत् लोके प्रसिद्धव्यवहारस्य कारणरूपमाधारः आकाशः नास्ति[3]।

सर्वेषां भावपदार्थाणामाधाररूपमाकाशः केवलं सिद्धवस्तूनामाधाररूपे प्रसिद्धो वर्तते, यथा घटपटादेः। "गच्छति" "पचति" इत्यादिसाध्यक्रियाणां प्रश्नः वर्तते एतेषामाधारत्वक्षमता केवलं काले वर्तते। अत्र भर्तृहरिः स्पष्टयति यत्—

कालात्क्रिया विभज्यन्ते आकाशात्सर्वमूर्तयः।
एतावाँश्चैव भेदोऽयमभेदोपनिबन्धनः।। (वा.प. ३-६-१५३)

१. इहाधारशक्तिरेवान्यथानुपपत्तेराकाशसद्भावं गमयति। — हेलाराज ३, पृ. ३५१

२. निरूप्य हि व्यपदेशो, निरूपणा च वस्तुनिबन्धना, शाब्दे व्यवहारे निरूपितस्यैव वस्तुत्वात्। — तत्रैव, हेलाराज - ३, पृ. ३५१

३. इदमत्रेति भावानामभावान्न प्रकल्पते। व्यपदेशस्तमाकाशनिमित्तं सम्प्रचक्षते।।
— वा.प. ३/७/१५२

कालस्य कारणं सर्वस्यां क्रियायाम् एवं च आकाशस्य कारणरुपेषु मूर्तपदार्थेषु विभागकल्पना भवति। यद्यपि कालाकाशौ द्वौ अत्यन्तं खलु अभिन्नपरब्रह्मणः शक्तिरूपौ, तथापि उक्तकार्यरूपे पृथक् पृथक् शक्तीनां धारणत्वेन अत्र भेदावभासोपपत्तिः व्यवहारदशायां भवति।

साधनशक्तीनां व्यापारव्याघातेन क्रियायां प्रतिबन्धो भवति, यदि तेषां व्यापारः प्रक्रान्तः भवति चेद् क्रियापि चलति यम् अभ्यनुज्ञेति उच्यते। क्रियायाः प्रतिबन्धद्वारा अभ्यनुज्ञाद्वारा च कालस्य नित्यवृतौ भेदः प्रतीयते[१]। उदाहरणार्थम् घटीयन्त्रस्य छिद्रेण जलनिस्सरणप्रक्रिया ग्रहीतुं शक्यते।

घटीयन्त्रस्य अन्तः विद्यमानस्य जलस्य कश्चन भागः एककालविशेषे छिद्रतः बहिः निर्गच्छति एवं तस्मिन् समये भागान्तरम्, इदानीमन्त एव वर्तते। शक्तेः अयं प्रतिबन्धः अभ्यनुज्ञा च कालद्वारैव निष्पद्यते। यतः यदि कालशक्तिः गुरुत्वस्य कारणात् सर्वजलस्य निःसरणमेकस्मिन् एव समये भवति। क्रमशः निःसरणस्य प्रश्नः एव नास्ति। इदं सिद्ध्यति यत् जलनिःसरणस्य प्रक्रियया पृथक् स्वव्यापारेण युक्तस्य कालस्य शक्तिः वर्तते[२]।

अयं च कालः उपयुक्तनियमद्वयेन कारणक्रमस्य प्रदर्शनं करोति। तथा समस्तभावपदार्थाणामुपकारः जन्मस्थितिविनाशरूपे प्रविभागं कृत्वा करोति। तदनुसारं क्रियाणाम् आधारोऽयं काल एव सिद्धौ वर्तते। "इह जायते" "इह तिष्ठति" "इह नश्यति" इत्यादयः सर्वेऽपि व्यवहाराः कालस्य आधारत्वेन निष्पद्यन्ते। आकाशः अव्यापकद्रव्याणां परिणामेन युक्तपदार्थाणां संयोगस्य कारणं प्रविभागस्य

१. कस्याश्चित्क्रियायाः साधनशक्तीनां व्यापारविधाते प्रतिबन्धस्तद्विपर्ययोऽभ्यनुज्ञाताभ्यामुपलक्षिता कालस्य नित्या प्रवृत्तिर्भावेषु सततपरिणामिषु हि किञ्चित्प्रजायते किञ्चिदपक्षीयते इति नियतमेतत्। — हेलाराज (३/९/९०)

२. द्रष्टव्य – वा.प. ३/९/७० एवम् हेलाराज।

ग्रहणं करोति। अन्ततः आकाशे द्रव्याणां विभाजनस्य शक्तेः विद्यमानत्वेन सः तस्यैव आधारो वर्तते कालस्तु क्रियाणां जनकत्वेन क्रियायाः आधारो वर्तते।

**उपवासक्रियायाम् आधारः —**

कालस्य आकाशस्य चाधिकरणतायाः प्रसङ्गे भर्तृहरिः पाणिनिमहोदयस्य "उपान्वध्याङ्वसः" (पा.१/४/४८) इति सूत्रान्तर्गतमागतानां वार्तिकाणां विचारः अकुरुत। उक्तसूत्रे वस्धातोः आधारः कर्म इति स्वीकृतवान् वर्तते। अत्र वार्तिककारः कात्यायनः संशोधनं करोति यत् अशननिवृत्तेः अर्थे उप + वस् इति धातुः वर्तते चेद् कर्मसंज्ञा न भवति, आधारस्य कारणम् अधिकरणमेव भवति, यथा – ग्रामे उपविसति। यथा "तिष्ठति" इति क्रियया गतिनिवृत्या विशिष्टावस्थितेः बोधो भवति तद्वत् अत्रापि "उपवसति" इत्यस्यार्थः अपि भोजननिवृत्याविशिष्टः वासः वर्तते। अतः सूत्रविहितायाः कर्मसंज्ञायाः निवृत्तिः भवति। ग्रामस्य विवक्षा अत्र ईप्सिततममित्यस्मिन् रूपे नास्ति, अपितु आधाररूपे वर्तते। अर्थात् इदं वार्तिकं विवक्षानियमस्यापि समर्थनं करोतीति[१]।

किन्तु पतञ्जलिः अनेन वार्तिकेन न तुष्यति। तत्कथनं वर्तते अत्र ग्रामोपसर्गकस्य वस्धातोः अधिकरणं नास्ति। अनेनैव "ग्रामे वसंस्त्रिरात्रमुपवसति" इति उदाहरणं ते ददति। (भाष्य १/४/४८) तेषामाशयस्तु ग्रामस्य साक्षाद् सम्बन्धः वासक्रियया सह वर्तते, यतो हि अत्र अन्तरङ्गसम्बन्धो वर्तते। उपवासक्रिया स्वरूपतः कालं अपेक्षति। अतः तस्य अन्तरङ्गसम्बन्धः कालेन सहैव भवितुं शक्नोति। ग्रामेण सह तु तस्य बहिरङ्गः सम्बन्धो विद्यते[२]। हेलाराजः विश्लेषयति यत् यद्यपि उपवासक्रियया सह कालविशेष एवान्तरङ्गो भवति, तथापि भोजनमकुर्वाणः पुरुषः तस्य निरधिकरण-स्थितिः असम्भवः। अतः आधारस्य अपेक्षा भवति यस्य पूर्ति ग्रामः करोति।

१. द्रष्टव्य – हेलाराज (३/७/१५३) पृ. ३५२।
२. द्रष्टव्य – प्रदीप तथा उद्योत पृ. २६० (खण्ड–२)

अतः उपान्वध्याङ्वसः (पा. १/४/४८) इत्यनेन जायमाना कर्मसंज्ञा तत्र न प्रसज्यति, प्रत्युतः कालवाचके त्रिरात्रम् इति शब्दे कर्मसंज्ञा जाता वर्तते। एतस्यैव उपपादनम् वाक्यपदीयस्य अस्यां कारिकायां विद्यते –

यद्यप्युपवसिर्देशविशेषमनुरूध्यते।
शब्दप्रवृत्तिधर्मात्तु कालमेवावलम्बते।।

(वा.प.३-७-१५४)

"तीर्थे उपवसति" इत्यत्र उपवासक्रियायाः सम्बन्धः तीर्थादिदेशविशेषद्वारा यद्यपि दृश्यते तथापि सः देशसम्बन्धः शब्दशक्त्या न प्राप्यते। उपवासार्थस्तु भोजन निवृत्तिः, यस्योपपत्तिः कालसम्बन्धेन भवति। उक्तक्रियायाम् कालशक्तिः अन्तर्हिता भवति। आकाशशक्तिस्तु उपवासकर्तुः सत्तायाः निराधारता असिद्धो आश्रितत्वेन सम्बन्धे जायमानेऽपि शब्दार्थे अन्तभूता नास्ति। भोजननिवृत्या देशस्य साक्षाद् सम्बन्धो न भवति। उपवासार्थे निवासकरणस्यापि अर्थः अङ्गरूपे तिष्ठति। तेनैव देशसम्बन्धोऽस्ति। अनेन प्रकारेण यत्र देशस्य उपवासेन सह सम्बन्धः तदङ्गमाध्यमेन भवति। कालस्य तेन साक्षादेव योगो भवति[१]।

अनशनार्थकोपवासक्रियायाः योगे एवं प्रकारेण देशस्य कालस्य च आधारत्वस्य स्पष्टं विभाजनं वर्तते। कस्यांचिदपि स्थितौ देशवाचकशब्दस्य अधिकरणविभक्तित्वं भवति। कालवाचकस्य कर्मविभक्तित्वं भवति। तदनुसारं इदं वार्तिकं भाष्यकारभर्तृहरिमतानुसारं निरर्थकं विद्यते।

एवं प्रकारेण इदं सिद्ध्यति यत् भोजननिवृत्यर्थे उपवासक्रियायाः साक्षादाधारः कालो भवति, यस्य कर्मसंज्ञात्वं दीयते। देशाभिमतेऽपि अङ्गभूतायाः वासक्रियायाः माध्यमेन तस्याधारः भवति। तदधिकरणमेवोच्यते। उभयत्र कस्यचन अनुपस्थित्या

१. तथा चाङ्गभूतवसतिक्रियाद्वारेणोपवासेऽधिकरणतां देशः प्रतिपद्यते। साक्षात्कालेन तु तथा योगः।

– हेलाराज ३, पृ. ३५३

संज्ञोपरि कोऽपि प्रभावः न भवति। "तीर्थे उपवसति" "एकादशीमुपवसति" इत्यत्र उभयोः प्रयोगयोः सिद्धिः सूत्रेणैव भवति। प्रथमोदाहरणे कालो गम्यमानो वर्तते चेद् द्वितीये देशः इति।

शब्दकौस्तुभे दीक्षितः उक्तवार्तिकं स्वीकुर्वन् "उपोष्य रजनीमेकाम्" इति द्वितीयायाः उपपदविभक्तित्वं स्वीकुर्वन् "कालाध्वनोरत्यन्तसंयोगे" (पा. २-३-५) इत्यनेन कालव्याप्तिद्वारा निष्पद्यते। पुनः ते "एकादश्यां न भुञ्जीत" इत्यत्र सप्तम्याः सिद्धिं अधिकरणस्याधारोपरि कुर्वन्ति यत् उपपदविभक्तेः कारकविभक्तिः प्रबला भवति। अयं च प्रश्नः यदि कारकविभक्तिः प्रबलतरा एव अस्तिचेत् "रजनीमेकाम्" इत्यत्र सप्तमी कथं न स्यात्। एतदपेक्षया भर्तृहरेः उक्तव्याख्यान-मधिकं सन्तोषप्रदम्। अतः "एकादश्यां न भुञ्जीत" इत्यत्र "उपान्वध्याङ्वसः" इति सूत्रं अप्रसक्तं भविष्यति। यतो हि उप + वस् इत्यस्य प्रयोगो नास्ति। भुज्धातोः आधाररूपकालस्य अधिकरणत्वं जातं वर्तते। "रजनीमेकाम्" इत्यत्र उपवासक्रियायाः आधारः कालो वर्तते, यः कर्म एव भवति।। इति।।

**अधिकरणभेदाः —**

पाणिनिव्याकरणे सर्वप्रथमं 'संहितायाम्' इति सूत्रव्याख्यावसरे पतञ्जलिना-धिकरणस्यभेदत्रयं निरूपितमस्ति। व्यापकं औपश्लेषिक-वैषयिकानि इति ते त्रयो भेदाः। विषयेऽस्मिन् द्वयोश्शब्दयोर्मध्येऔपश्लेषिकमिति संहिताधिकार सूत्रस्य प्रत्या-ख्यानावासरे ते निर्णयन्ति। शब्दस्यशब्दान्तरेण सह कोन्योऽभिसम्बन्धो भवितुमर्हत्य-न्यदत उपश्लेषात्। अत एव 'इको यणचि' इति सूत्रघटकेऽचीत्यत्रौपश्लेषिकाधिकरणम्

यस्यार्थ-परवर्तिन्युपश्लिष्टस्येको यण् भवति[1]।

अन्यत्र[2] पतञ्जलिरेवेमान् त्रीन् भेदानन्यथोल्लेखङ्कृतवान्। सूत्रेऽ 'स्मिन्नधिकमि'त्यस्य स्थाने 'ऽस्मादधिकम्' इति भवितव्यमिति वार्तिककारस्योक्तिमुत्तरयति कथयति यदत्र न पञ्चम्या आवश्यकता परञ्च सप्तम्येव समीचीना। वार्तिककारस्य प्रश्नोऽयं यदत्र कीदृगधिकरणम्? वैषयिक-व्यापकयोरत्रासम्भावनयौपश्लेषिकमेवात्र संगतं भवति। 'उपश्लिष्टः सम्बन्ध' इत्यर्थकरणयुदाहरणे संघटितुं शक्यते। शतं रुप्यकाणि समूहे एकादश कार्षापणान्यधिकानि सन्ति, अर्थादुपश्लिष्टानि सन्ति एकादशं शतम् (एकादशन् + ड-प्रत्यय) अतोध्याहृतोपश्लेषण-क्रियापेक्षयात्राधिकाणकारकम्, यत् कर्त्रा जाततमस्ति-कर्त्रा एकादशकार्षापणानि शतं रुप्यकेषूपश्लिष्टानि वर्तन्ते।

भाष्यस्य तृतीयमपि स्थलं[3] प्रमुखमस्ति यत्र यद्यपि भेदत्रयन्ननिरुपितमस्ति, तथाप्यौपश्लेषिकस्य विषयमुपर्युक्तस्थलानां पुष्टिस्तेन भवति। दीयते, कार्यमुभयोरर्थयोः सप्तमीसमर्थात् कालवाचकाच्छब्दात्ते एव प्रत्ययाः भवन्ति, ये 'तत्र भवः' इत्यर्थे विहितास्सन्ति। यथा—मासे दीयते कार्यं वा मासिकम् (ठक्)। अत्र शङ्कते' यत् 'तत्र दीयते इति 'तत्र भवः' इत्यनेन कथं गतार्थन्न स्यात्?, मासे यद्दीयते तत्तस्मिन् मास एवोत्पद्यते। अस्मिन् विषये भाष्यकारः कथयति 'यन्मासे दीयते इत्यस्यार्थे मासे गते' इति। मासातिक्रान्ते यद्वेतनादिकं दीयते तस्यौपश्लेषिकमधिकरणं मासः, यतोहि मासेन सह तस्यसामीपिकस्सम्बन्धोस्ति (तेन 'वटे गावः' इतिवत् सामीपिक-

१. 'अधिकरणं नाम त्रिप्रकारम्—व्यापकम्, औपश्लेषिकं, वैषयिकमिति। शब्दस्य च शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हत्यन्यदत उपश्लेषात्। इको यणचि—अच्युपश्लिष्टस्येति'। — भाष्य, ५, पृ. ७४

२. 'तदस्मिन्नधिकम्०' (५/२/४५)—यद्यपि 'तावद् वैषयिके व्यापके वाऽधिकरणत्वे सम्भवो नास्ति, औपश्लेषिकमधिकरणं विज्ञास्यते। एकादश कार्षापणा उपश्लिष्टा अस्मिञ्छते = एकादशं शतम्' (भाष्य ४, पृ. ३२४)।

३. 'तत्र च दीयते कार्यं भववत्' (पा० ५/१/९६)—"तत्र 'तत्र भवः' इत्येव सिद्धम्। न सिध्यति। न तन्मासे दीयते। किं तर्हि? मासे गते। एवं तर्हि – औपश्लेषिकमधिकरणं विज्ञास्यते" (भाष्य ४, पृ. २८३)।

-मिदमधिकरणम्-उद्योत, उपरिवत्)

उक्तत्रयाणामधिकरणानां पृथक् पृथक् व्याख्यायाः प्रागहं भेदानामेतेषाम्मूलकारणं विवेचयामि। विषयेऽस्मिन् वाक्यपदीयस्य काशिका एव सहायभूताः। उपश्लेषस्य सत्ता सामान्येन सर्वेष्वधिकरणेषु तिष्ठति। तिलःस्यात्, आकाशं स्यात् कटं वा स्यात्[1]। उपश्लेषस्याभिन्नत्वं सर्वत्र सत्वेऽपि सम्बन्धस्योपकारस्य वा प्रकारत्वं पृथक् पृथक्। संयोग आधारेऽन्यत् सम्बन्धः कालरुपेऽन्यत्प्रकारके सम्बन्धः[2]। देवदत्तः कटे आस्ते। उदाहरणेऽस्मिन् संयोगसम्बन्धेन युक्तः कटोपश्लेषः देवदत्तेन सह सर्वावयवेन व्याप्तो नास्ति, प्रत्युत कतिपयावयवेषु व्याप्तत्वादौपश्लेषिकमधि-करणम्। तिलेषु तैलम् अत्र तैलरसः समवायसम्बन्धेन युक्तोऽस्ति, स रसः तिलस्य सर्वावयवव्याप्तो भवति, अत इदं व्यापकमधिकरणम्। 'खे शकुनयः' अत्राकाशे परमार्थतोऽवयवाभावात् तस्मिन् प्रविभागं प्रकल्प्य पक्षिणस्सम्बन्धः दर्शितोऽस्ति इदं वैषयिकमधिकरणम्।

हेलाराजमतेऽत्र विषयस्यार्थः अनन्यत्रभावः अतोऽत्रापि कतिपयावयवान् व्याप्तत्वेनोपश्लेषमेव। 'गुरौ वसती'त्यत्र यतोहि शिष्यवृत्तिर्गुरोराधीनात इत्थं स्वीकुर्वन् वैषयिकमधिकरणं गुरुः, शिष्येणात्र क्रीयाधारता। अत्रोपश्लेषमपि बुद्ध्या परिकल्पितम्। युद्धे संनह्यते-अत्र युद्धोद्देश्यकं कवचादिबन्धनम् प्रवृत्तेरस्या विषयो युद्धः। इदमपि वैषयिकस्योदाहरणम्। 'गङ्गायां गावः' इत्यत्र गङ्गापदं सामीप्येन सहवप्रदेशस्यापि बोधकम्। अतोऽत्रौपश्लेषिकम्। 'शत्रोरभावे सुखम्' इत्यत्राभावस्य बुद्धिपरिकल्पितं कारकत्वम्। (हेलाराज, ३ पृ.३४९)

इत्थमुपकारभेदादुपश्लेषात्मकस्य नानाभेदाः भवन्ति। एत उपकारका यद्यप्यनन्ताः, तथापि केचन् वाक्यपदीये निर्दिष्टास्सन्ति। प्रमुखतयेमेत एवोपकारास्सन्ति ये आधारत्रयस्य व्याख्याने समर्थास्सन्ति।

१. 'उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु।
उपकारास्तु भिद्यन्ते संयोगिसमवायिनाम्' ।। — वा. प. ३/७/१४९

२. अन्यथा तु संयोगिन्याधारे सम्बन्धः, अन्यथा तु समवायिनीति सम्बन्धिभेदाद् भिन्नत्वेन व्यपदेशः। —हेलाराज ३, पृ. ३४९

अविनाशो गुरुत्वस्य प्रतिबन्धे स्वतन्त्रता।
दिग्विशेषादवच्छेद इत्याद्या भेदहेतवः।। वा.प. (३/७/१५०)

अधिकरणकारकस्य भेदे हेतुषूपकारेष्वेषु प्रथमोपकारोऽविनाशः। केचनाधाराः स्वीयाधेयस्येत्थमुपकारङ्कुर्वन्ति यदाधेयरुपस्य विनाशो न स्यात्। यदि तिलस्य नाशे सति तैलस्यापि नाशः स्यादित्थं तिलेन तैलस्याविनासोपकारः क्रियते। द्वितीयोपकारः गुरुत्वस्य प्रतिबन्धने स्वतन्त्रो भवति। पर्यङ्के शेते। अत्र पर्यङ्कस्यायमेवोपकारो यच्छयानपुरुषगुरुत्वस्य प्रतिबन्धने स्वतन्त्रतया कार्यं करोति। उपकारस्यास्याभावे पुरुषः स्वीयेन गुरुत्वेन भूमावागमिष्यति। तृतीयोपकारः–दिग्विशेवादवच्छेदः। 'खे शकुनयः' अत्राकाशस्य पक्षिणः प्रत्ययमेवोपकारो यताक्षिणो द्विग्विशेषेण सम्बद्धाः सन्ति। तेषामधोदेशादपाकरणादेवाधेये आधारत्वं समायाति।

हेलाराजस्त्वादिशब्दाद् गम्यमानेषूपकारेषु शकटाद्याधारेण देशविशेषस्य सम्प्राप्ति-मुल्लिखति। यस्य वाक्यस्य-शकटे याति। पुनश्च 'गुरौ वसति' इत्यत्र गुरुणा शिष्येषु संस्कारातिशयोत्पादनम्। पर्यङ्कमप्युपर्युक्तोपकारेण सह सौस्थित्यरुपमप्युपकारं करोति। दिग्विशेषेण सम्बन्धरुपो यदुपकार आधारेणाधेयस्य तथाविधानि नानोदाहरणानि प्राच्यामादित्य उदेति-प्राच्यामस्तमेति, दक्षिणस्यामगस्त्यः, उत्तरस्यां ध्रुवः[१] सम्प्रत्यत्रोपर्युक्त-निर्दिष्टभेदानां निरुपणं भविष्यति।

१) व्यापकमधिकरणम् –

अस्य सामान्यन्नामाभिव्यापकमप्यस्ति। अस्यद्वेस्थिती–आधेयपदार्थेन सह समवाय-सम्बन्ध, स्वीयेषु सर्वेष्ववयवेष्वाधेयेन व्याप्तिः[२]। अस्योदाहरणानि–तिलेषु तैलम्, घटे रुपम्, शरीरे चेष्टा, दधनि सर्पिः। पाणिनीयेतर सम्प्रदायस्य केचन् वैयाकरणाः तिलस्य व्यापकत्वविषयिकां शंङ्कामुत्थापितवन्तः। सुषेणःकविराजः

१. द्रष्टव्य–हेलाराज ३, पृ. ३४९ तथा ल.म.पृ. १३२५-२६।
२. (क) 'यत्र सर्वावयवावच्छेदेन व्याप्तिस्तत्'। –ल.म., पृ.१३२७
(ख) 'यत्र सर्वावयवावच्छेदेनाधेयस्य व्याप्तिः, ......समवायेन यदधिकरणमिति यावत्'। — प.ल.म. वंशी–टीका, पृ. १५८

(कातन्त्र) तिलतैलयो: समवाय सम्बन्धस्याभावमवलोक्य तिलमौपश्लोषिकमधिकरणं स्वीकरोति[1]। परञ्च रामतर्कवागीशादय: कथयन्ति यदुभयोस्संयोगसम्बन्धस्य प्रतीयमानत्वेनापि देश-विभागाभावे (यतोहि सत्ताधिकरण उभयो:) संयोगसम्बन्धो न वक्तुं शक्यते[2]। संयोगस्तु तत्रैव यत्र विभागोऽपि सम्भवति, परञ्च तैलस्याधिकरणान्तरत्वे तिलस्य सत्तैव न भवति। अत: संयोगाभावे समवाय एव स्वीकर्तुं शक्यते। नव्यवैयाकरणा: सामान्यतया समवाय-सम्बन्धं साधयन्ति। इदन्तु सर्वसम्मतं तथ्यं यदवयवावयविनोस्समवायोऽस्ति। इदमपिसत्यं यत्तैलनिष्ठाधेयतावच्छेकता सम्बन्धेन सर्वेष्ववयवेषु स्थिता (वर्तमाना)। तेष्वयवेषु तिलस्यापि सत्ता समवाय सम्बन्धेनास्ति। तिलस्त्ववयवी, स्वावयवेषु समवायसम्बन्धेन भविष्यत्येव। अन्ततो गत्वा वयं वक्तुं शक्नुमो यत्तिल: समवायसम्बन्धेनावच्छिन्नव्यापकतायुक्तोऽस्त्यतोऽभिव्यापकम्।

पतञ्जलि: उभयत्राधारमिमम्[3] व्याख्यायन्निमम् (तिलं) मुख्याधारं स्वीकरोति, परञ्च अधिकरणसूत्रे तमब्ग्रहणस्याभावात्ते कथयन्ति यदत्र गौणमुख्ययो: वास्तविको भेदो नास्ति। व्यापक: स्वीये मुख्यत्वेऽपीदन्न कथयति यदन्याधारा अधिकरणानि न। पतञ्जले: पङ्क्तयस्सन्ति तथाधारमाचार्य: किं न्याय्यं मन्यते? यत्र कृत्स्न आधारात्मा व्याप्तो भवति। तेनेहैव स्यात्-तिलेषु तैलम्, दध्नि सर्पिरिति। गङ्गायां गाव:, कूपे गर्गकुलम् इत्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो न भवति इत्यत्रापि सिद्धं भवति (भाष्य १/४/४२) चरमे वाक्य 'ऊह' इति कृत्वा स्वरित-सूत्रेऽपीमा: पङ्क्तय: सन्ति। स्पष्टत: भाष्यकारा: व्यापकेतरान्याधिकरणानि गौणानीति स्वीकुर्वन्ति। इदन्त्वाधारे तमबभावो यदन्याधारा अप्यधिकरणानि भवन्ति।

नागेशा आधारस्य गौण-मुख्यताया: कारणं प्रतिपादितवन्त:। (ल.म.पृ. १३२७-२८) व्यापकाधारोऽतो मुख्यो यत्प्रकृत्यर्थतारुपावच्छेदकाद्विशिष्ट एव विभक्त्यर्थस्यान्वय उचित:। तिलस्य प्रकृत्यर्थ: तिल एव यस्यावच्छेदकन्तिलत्वम्।

१. न्यास १, पृ. ५६२

२. गुरुपद हाल्दार, व्या. द. इति. पृ. ३२६।

३. पा. १/४/४२ (साधकतमं करणम्) तथा १/३/११ (स्वरितेनाधिकार:) सूत्राणाम् व्याख्यायाम्।

तिलत्वन्तिलस्य सर्वेष्ववयवेष्ववस्थितम्, नैकस्मिन्नवयवे। तिलत्वविशिष्टे तिल एव सप्तम्यर्थोऽवस्थितः, अन्वितः। अभिप्रायोयं यद्व्यापकाधारे सम्बन्धस्य साक्षात्सत्ता भवति, औपश्लेषिके त्ववयवस्थः संयोग-सम्बन्धोऽवयविन्यारोप्यते। वृक्षस्यैकदेशे वृक्षत्वन्न भवति सकले वृक्षे भवति परञ्च 'वृक्षे वानरः तिष्ठति' इत्यत्र वृक्षेऽधिकरणताया भानोभवति। अत्रसत्यमेव एकदेशस्थस्याधारस्य वृक्षयारोपाद्बोधो भवति। अतोऽयं गौणः। वैषयिकीधारे 'खे शकुनयः' इत्यत्र व्याकाशत्व विशिष्टे सकले आकाशेऽधिकरणत्वस्याप्रतीतिः, अतस्सोऽपि 'गौणाधार' एवास्ति। व्यापका धारोदाहरणे 'दध्नि सर्पिः' इत्यत्रापि दधित्वविशिष्ट एवाधिकरणत्वस्य प्रतीतिर्भवति, येनारोपमन्तरेणैवाधिकरणान्वयस्य बोधोभवति। अतोऽस्यमुख्यत्वं निर्विवादम्। स्वरितत्वप्रतिज्ञया गौणाधारेष्वपि सप्तम्याः शक्तिरिति त्वन्यदेतत्।

(२) औपश्लेषिकमधिकरणम् –

उपश्लेषशब्देन सम्बद्धात् सामीप्यगतसम्बन्द्धादुत्पन्नस्याधारस्यार्थे भवति। भाष्योक्त त्रिषु प्रसङ्गेष्वस्यार्थस्य समर्थनं भवति। तदनुसारमाधाराधेययोस्सामीप्य-सम्बन्धादिदमधिकरणं भवति। यथा–इको यणचि। परञ्चशाब्दिकेऽस्मिन्नर्थ औपश्लेषिकाधारस्यग्रहणे सति 'कटे आस्ते' इत्याद्युदाहरणानामनुपपत्तिः भविष्यति[1]। अतोऽस्य व्युत्पत्तिनिमित्तकमर्थं परित्यज्य प्रवृत्तिनिमित्तकोऽर्थो ग्राह्यः।

हेलाराजमतेऽस्माभिः दृष्टम्, यदेकाधार इत्थमपि भवति यत्र कतिपयावयवानामेव व्याप्तिर्भवति यस्योदाहरणे 'कटे आस्ते' इति दत्तमस्ति। अस्माद्धेतोर्लक्षणान्तरस्याभासः प्राप्तुं शक्नोति। नागेश मते यदाधेयेनाधारस्य कांश्चिदवयवा एव व्याप्तं क्रियन्ते तदा तदप्युपश्लेषमेव कथ्यते, एतादृशोपश्लेषेण निष्पन्नमधिकरण-मौपश्लेषिकमस्ति[2]। कटस्य कांश्चनावयवानेवाधेयो व्याप्नोति। अतः कटऔपश्लेषि-कमधिकरणम्। अस्मिन्नर्थेऽप्युपश्लेषस्य व्युत्पत्तिङ्कर्तुं यत्नः कृतोऽस्ति। सर्वाधारस्य

१. प.ल.म. पृ. १८८

२. द्रष्टव्य – (ल.म., पृ. १३२६)–'यत्किञ्चिदवयवावच्छेदेनाधारस्याधेयेन व्याप्तिरप्युपश्लेषः। यथा–कटे आस्ते'।

व्याप्तिरुपेऽर्थे मुख्याधारः इति श्लेषस्यार्थः स्यात्, आधारश्च निकषा विद्यमानः आधारोपश्लेषोऽस्तीतीत्थं वक्तुं शक्यते[१]। अत एव गङ्गाया एकदेशे तरन्तीनां गवां कृते गङ्गायां गावः, कूपस्यैकदेशेस्थस्य गर्गकुलस्य कृते कूपे गर्गकुलम् इति प्रयुज्यते। उदाहरणेऽस्मिन् तथा च गङ्गायां घोष इत्यादौ पूर्वोक्तेऽर्थेप्यस्यैवाधिकरणस्योपयत्तिः भवितुं शक्यते, परञ्च लक्षणान्तरेऽधिका व्यापकता-सामीपिकः सम्बन्धः स्यादथवाधारान्तर्गत एवाधेयः स्यादुभयत्र लक्षणमिदं संघटते। फलत औपश्लेषिकमधिकरणं सामीप्येन, संयोगेन वा केनापि सम्बन्धेन भवितुं शक्नोति[२]। उपश्लेषस्य 'संयोग' इत्यर्थ स्वीकारे 'वटे गावः शेरते' गुरौ वसतीत्याद्युदाहरणेषु संयोगाभावादौपश्लेषिकमधिकरणमनुपपन्नं भविष्यति। परञ्चेयं शङ्का निःसारा। संयोगस्यार्थ इतोऽप्यधिको व्यापकः - गवा संयुक्तस्य देशस्यापि संयोगस्संयोग एवास्ति। वटे निश्चप्रचमीदृगेव संयोगः। इत्थम् 'इको यणची'त्यत्र इक्निरुपिता कालिकी सामीप्यरूपसंयोगस्य सत्तास्ति[३]।

(३) वैषयिकमधिकरणम् —

विषयसम्बन्धेन जायमानमधिकरणं वैषयिकम्। विषयस्यार्थे प्राचीन-नवीनयोर्मतभेदो विद्यते। प्राचीनाचार्याणां मतेऽनन्यत्रभावो विषयः। प्राचीनाचार्येषु हेलाराज (वा.प. ३/७/१४९ टीका) जिनेन्द्रबुद्धि (न्यास पृ. ५६२) मुख्यौ। जिनेन्द्रबुद्धिः-कथयति यद्यथा चक्षुप्रभृतीन्द्रियाणि रूपादेः पृथङ् न प्राप्नुवन्ति, अतश्चक्षुरादिः विषयाणि रुपादीनि कथ्यन्ते, तथैव 'गुरौ वसति' इत्यादौ न गुरुणा पृथग्विषयस्य सत्ता, अतो गुरुशिशष्यस्य विषयोऽस्ति। नवीनवैयाकरणव्याख्यानपृष्ठभूमिरप्यस्यैव न्यासे निहितास्ति।

प्रश्नोऽयं यदाधारस्यार्थ आश्रयः तदा स संयोग-सम्बन्धेन समवायेन वा भविष्यति। शिष्यस्य गुरुणा सहानयोर्न कोऽपि सम्बन्धस्तदा गुरुरधिकरणं कथमभवत्?

१. यद्वा एकदेशावच्छेदेन श्लेषेऽपि श्लेषस्य समीपमुपश्लेषं तत्कृतमित्यौपश्लेषिकत्वमित्यभिप्रायेण तदुदाहरणम् ( = कटे शेते)। —ल.श.शे., पृ.४७८

२. द्रष्टव्य – प.ल.म. (वंशी), पृष्ठ १५९।

३. सि. कौ. (लक्ष्मी टीका), पृ. ८५१

(४) वैषयिकम् –

हृदि ब्रह्मामृतं परम् (निदिध्यासतां स्फुरति) बोधः—हृदयाभिन्नाश्रयक आत्मधारणानुकूलः स्फुरणानुकूलो वा एकब्रह्माभिन्नाश्रयको वर्तमानो व्यापारः।

(५) नैमित्तिकम्—

युद्धे सन्नह्यते वीरः। युद्धाभिन्नाधारकः कवचबन्धनानुकूल एकधीराभिन्नाश्रयको वर्तमानो व्यापारः। निमित्तार्थो हेतुः। अत्र कवचबन्धनस्योद्देश्यं युद्धम् अतः तन्निमित्तम्। फलमपि कदाचिद्धेतुः कथ्यते। अतोऽस्यान्तर्भावो वैषयिके कर्तुं शक्यते।

(६) औपचारिकम्—

एकस्मिन् स्थिते विद्यमानस्य सम्बन्धस्य स्थानान्तर आरोप औपचारिकम्। यथा—अङ्गुल्यग्रे करिणां शतम्। अङ्गुल्यग्राभिन्नाश्रयक आत्मधारणानुकूलः करिसम्बन्धशताभिन्नाश्रयको वर्तमानो व्यापारः। करि-पृथिव्योराधाराधेयः सम्बन्धोऽङ्गुल्यग्रभाग आरोपितः इदमप्यौश्लेषिकमेव। लघुमञ्जूषाकारमत एषान्त्रयाणामौपश्लेषिकेऽन्तर्भावोस्ति।

इत्थं त्रयाणामधिकरणानामेव चरमवर्गीकरणस्वीकारे न कापि क्षति र्यतोह्यौपश्लेषिकस्य व्याप्तिरत्यधिकाविद्यते।

## विभक्त्यर्थत्वे प्रथमात्वं द्वितीयात्वम् इत्यादिविभक्तीनां पर्यालोचनम्

द्रव्याणां पूर्वोक्तरीत्या क्रियाजनकशक्तयः षोढा विद्यन्ते। संस्कृतशब्दानुशासने एषः सर्वस्वीकृतः अन्तिमसिद्धान्तः वर्तते। तदनुसारं षड्कारकभेदाः सन्ति, उक्तञ्च—

कर्त्ता कर्म च करणञ्च सम्प्रदानं तथैव च।
अपादानाधिकरणञ्च इत्याहुः कारकाणि षट्।।

यद्यपि कारकशब्दस्य व्युत्पत्तिनिमित्तं (अवयवानाम् अर्थबोधकताशक्तिः) केवलकर्तुरेव शक्तिं सन्धत्ते, तथापि शास्त्रतः यदा व्यापकार्थे एतद् गृह्णीमः तदा

एषां षण्णां कारकाणां बोधकं भवति। तानि च कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम् तथा अधिकरणं विद्यन्ते। वस्तुतः एषां वैविध्यप्रसवः द्रव्यशक्तिद्वारा एव भवति। यदि द्रव्येण केवलं क्रियानिष्पत्तेः बोधो भवेत् तर्हि एतानि सर्वाण्यपि कारकाणि स्वनिष्ठकर्तृत्वशक्तिं प्रदर्शयिष्यन्ति, यतो हि प्रतिकारकविशेषे द्विधा क्रियोत्पादिकाशक्तिस्तिष्ठति - सामान्यविशेषश्च। सामान्यशक्तिस्तु सर्वेषु समाना एव तिष्ठति। अतः यदा तस्य प्रदर्शनं विवक्ष्यते तदा तस्य अव्यक्तकर्तृत्वशक्तिः अभिव्यज्यते। यथा–'स्थाली पचति', एधाः पचन्ति, असिश्छिनत्ति'। द्रव्येषु अपराविशेषशक्तिः वर्तते, येन तस्य परस्परं व्यावृतेः बोधो भवति। एकस्यामेव पाकक्रियायां काष्ठं, स्थाली, ओदनः, अग्निः तथा सूपकारः इत्येषां पाकक्रियासिद्धिरुपः सामान्यव्यापारः समानः वर्तते, किन्तु विशेषव्यापारे भेदः विद्यते। काष्ठं यथा उपकारकोऽस्ति तथा स्थाल्याः व्यापारः नास्ति। व्यापारविशेषस्य एषा अभिव्यक्तिरेव कारकाणां वैयक्तिकस्वरुपं प्रददाति, येन तानि कर्तृ कर्म करणादीनि उच्यन्ते[१]।

वयम् अस्मिन् अध्याये दृष्टवन्तः यत् क्रियायाः व्यापारेण फलेन च साक्षात्सम्बन्धः कर्तुः कर्मणश्च भवति, यतो हि आश्रयिरुपेण व्यापारः कर्तरि फलञ्च कर्मणि समवेतं विद्यते। एतस्मात् कारणाद् द्वे कारके क्रियायाः व्यापारसम्पादने फलप्राप्तौ च सर्वाधिकसहायके वर्तेते। अनया रीत्या प्रथमचरणे सर्वेषु कारकेषु कर्तृत्वशक्तेः निहितत्वात् कर्तुः प्रधानं स्थानं वर्तते। द्वितीयचरणे साक्षात् क्रियोप-कारकत्वेन कर्तुः कर्मणश्च तत्स्थानं विद्यते। अन्यकारकाणि एताभ्यामुभाभ्याम् एकेन माध्यमेन क्रियोपकारकाणि भवन्ति। अत एव तानि गौणार्थे कारकाण्युच्यन्ते। यथा–'स्थाल्यां पचति' अधिकरणकारकस्य उदाहरणमस्ति। अत्र स्थालीनिष्ठ अधिकरण-त्वशक्तिः क्रियोपकारिका अस्ति तस्य कारणन्तु स्थाली क्रियाजन्यफलधारकम् ओदनं (कर्म) बिभर्ति। अत एषा क्रियया परोक्षतः सम्बद्धाऽस्ति। तथा 'असिना छिनत्ति'

१. (क) 'निष्पत्तिमात्रे कर्तृत्त्वं सर्वत्रैवास्ति कारके।
व्यापारभेदापेक्षायां करणत्वादिसम्भवः'।। — वा.प. ३/७/१८

(ख) 'निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते।
षोढा कर्तृत्वमेवाहुस्तत्प्रवृत्तेनिर्बन्धनम्'।। — तत्रैव, ३/७/३७

इत्यत्र असिनिष्ठ करणत्वशक्तिः छेदनक्रियायां कर्तुः सहायिका वर्तते। कर्ता छेदनक्रियायां स्वतन्त्रतया प्रवृतः सन्नपि असिरुपसाधनस्य आवश्यकतां जानाति, यस्य प्रयोगानन्तरं क्रिया व्यवधानरहितसुचारुरुपेण निष्पन्ना भवति।

कर्तृकर्मकरणाधिकरणानि - एषां चतुर्णां कारकाणामेव सूक्ष्मकर्तृत्वशक्तिः सामान्यतया अभिव्यक्तुं शक्यते। अनया दृष्ट्या सम्प्रदानापादानम् अनुवर्ति भवति। अत एव तृतीयचरणे वयमेषां चतुर्णामेव प्रधानकारकत्वं स्वीकुर्महे।